ya Samaj Foundation Chenn

GAIRVANI

1973

omain. Gurukul Kangri Col

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

077923

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

077923

STOCK VERIFICATION
Central
Library
2024-25 G.K.D.U., Hdr.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

COMPILED

दूरध्वनिः – "संस्कृतम्"

वाणीं भजत गैर्वाणीम् !

गैर्वाणी

077923

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आं. प्र.) भारतम्.

संपुटः ११ | 28th NOVEMBER 1973 | क्रमांकः ११

RT-0236

प्रमादीच-कार्तिकांकः

शकाब्दाः १८९५

मूल्यम् ०–४० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूचिका

१. रजतमहोत्सवः, संस्कृतभाषाप्रचारिणी सभा, चित्तूरु १
२. विजयतां कर्णाटकराज्यम् १०
३. गांधीकथा १२
४. श्री अप्पय्यदीक्षितेन्द्रजयन्ती १३
५. प्रमादीच - उत्तरायणपरीक्षाणां सन्नाहकार्यक्रमः १४
६. स्थायिकेन्द्राणि १५
७. श्री एम्. पि. दिग्वेकरस्य आगमनम् १६
८. मुकुन्दविलासः १७
९. सुभाषितानि १९
१०. आन्ध्रभाषायां अद्वैतग्रन्थः २०
११. प्रमादीच - दक्षिणायनपरीक्षाफलानि २१
१२. प्रमादीच - दक्षिणायनपरीक्षासु उपयुक्तानि केन्द्राणि २५
१३. परीक्षाफलसारिणी २६
१४. तज्जीवनं भारतभूमिगौरवम् २७
१५. जयतु गैर्वाणी २८
१६. Audit Report for '72 २९
१७. Audit Report for '73 ३३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजतमहोत्सवः

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु

(१२–१०–७३ तः १४–१०–७३ पर्यन्तम्)

१९४५ वर्षे संस्थापितयाः अत एव १९७० वर्षे एव रजतोत्सवयोग्यायाः अस्याः सभायाः रजतमहोत्सवः अक्टोबरमासे १२, १३, १४ तिथिषु त्रिषु दिनेषु महता वैभवेन संपन्न आसीत् ।

भारते दूरदूरप्रदेशेभ्योपि अतिथयस्समागच्छन् । जीवकारुण्यसंघे, बालाजीवसतिभवने, यात्रिभवने, कार्यदर्शिगृहे, प्रधानमन्त्रिगृहे, अन्यत्र च यथायोग्यं निवासभोजनादिव्यवस्था कल्पिता । विजयवाडा आकाशवाणी केन्द्रेण च समीक्षकत्वेन श्री तिरुमल रामचंद्रः प्रेषितः । दिशः प्रजानां मनांसि च प्रसन्नान्यासन् ।

१२–१०–७३ दिने प्रातः ७-३० A. M. पण्डिताः, संस्कृताभिमानिनः, संस्कृतविद्यार्थिनः, अतिथयः, अन्ये च संस्कृतशुभाकांक्षिणः वेदघोषेण नगरयात्रामारभ्य ८-३० A. M. वेलायां प्राचीनसभाभवनस्य द्वारदेशं समुपागमन् । चित्तूरुमंडलदंडनायकः श्री ए. वल्लियप्पन्महोदयः श्री सि. वेंकटरमण अय्यरश्च सपूर्णकुंभं स्वागतेन सत्कृतौ सभान्तः प्राविशताम् । तत्र च शुक्लवितानालंकृतकाममाने महति आयोजितायां सभायां श्रीमति सि. वेंकटरमणार्ये आध्यक्ष्यं वहति सति श्री वल्लियप्पमहोदयः (चित्तूरु दंडनायकः) संस्कृतं तस्य प्रचारावश्यकत्वं, तत्र एतया सभया क्रियमाणानि कार्याणि च प्रशस्य एवमवोचत् – एतत्सभायाः कर्तव्यनिष्ठामभिनन्द्य तिरुमल तिरुपति देवस्थानेन पंचाशत्सहस्रं रूप्यकाणि अधुना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्तानि । तेन च अधुना रजतोत्सवशालायाः मूलशिला मया अर्प्यते । अपि चाहं अभिकांक्षे एकवत्सरांतर एव परिपूर्णस्य सभाभवनस्य उद्घाटनमपि कुर्यामिति । एवं वदता तेन चंद्रकान्तमूलशिलायाः यवनिका अपसारिता । सभ्याश्च चंदनतांबूलादिभिस्सत्कृताः सममोदन्त ।

अथ १० A. M. वेलायां जीवकारूण्यसंघभवने संस्कृतपुस्तकानां संस्कृतपत्राणां च प्रदर्शनं समुद्घाटितं चित्तूरुसर्वकारकलाशालाप्रांशुपालेन श्रीमता आर्. यस्. सुदर्शनमहोदयेन । स च स्वभाषणे ग्रन्थानां प्रभावं तत्रापि संस्कृतग्रन्थानां अधुनातनकाले संरक्षणीयतां परिशीलनीयतां च सुव्यक्तमवदत् ।

मध्याह्ने ३ P. M. वेलायां अष्टावधानसभा जीवकारुण्यसंघे समाविष्टा आसीत् । अनेकशतवधानकर्ता शतावधानी श्री सि.वि. सुब्बन्नः अवधानोद्यत आसीत् । श्री के. वेंकटेशाचार्यः सर्वकारकलाशालायाः आंध्रशाखाध्यक्षः सभाया आध्यक्ष्यमवहत् । प्रष्टारश्च अष्टौ समाविशन् येषु शिरोमणिः विद्वान् पि. सुब्बराघवय्यः समस्यां, विद्वान् श्री वेंकटरेड्डिः दत्तपदीं, विद्वान् श्री एम्. कृष्णमराजः निषेधाक्षरीं, प्रवीणः प्रचारकः श्री मुंगरशंकरराज अप्रस्तुतप्रशंसां, विद्वान् टि. वेणुनादपिळ्ळः वर्णनं, विदुषी श्रीमती आर्. कमलम्मा पुराणपठनं, विद्वान् अवधानं कृष्णशर्मा आशुकवित्वं, श्री के. राममूर्तिः M. A. घंटानदं च स्वीकृत्य अवधानिनोऽवधानं पर्यैक्षन्त ।

बहवः रसिकाः आन्ध्रदेशभाग्यभूतायाः एतस्याः अवधानक्रियायाः साक्षादनुभवेन परमानन्दमविन्दन्त ।

सायं ५-३० P. M. वेलायां डा० डि. जगन्नाथरेड्डिः (उपकुलपतिः श्री वेंकटेश्वरविश्वविद्यालयस्य) महोदयस्य आध्यक्ष्येण रजतोत्सवसंचिका श्री ए. वल्लिअप्पन् (चित्तूरुमण्डलाधिप) महो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दयेन आविष्कृता। साहित्यसम्राट् इत्यादिबिरुदविभूषितः श्री जम्मुलमडक माधवरामशर्मा "संस्कृतसंस्कृतिः" इत्यंशं लक्षीकृत्य बहु उपन्यास्थत्, यत्रोपन्यासे काव्यपुराणवेदयज्ञमन्त्रतन्त्रागमादिशास्त्राणां प्रस्तावः पदे पदे समभवत्। एवं भारतीयसंस्कृतेः संस्कृतमेव मूलं, तस्मात् संस्कृतरक्षणाद्विना भारतीयतैव न जीविष्यतीति स सनिर्दनमवोचत्।

श्री जगन्नाथरेड्डिश्च स्वाध्यक्षभाषणे विश्वविद्यालयेषु संस्कृतविभागे विद्यार्थिनः दुर्लभा भवन्ति। संस्कृते परिशोधनविभागेपि अल्पा एव उपतिष्ठन्ति। संस्कृतं कस्यापि जातेः कुलस्य वा धन न भवति। भारतीयजातीयविद्याविधाने नियतं एतत् प्रवेश्य विद्याविधानमेव पुनरुद्धरणीयं द्योतते। एतस्या भाषायाः प्रवेशस्य माध्यमिकाः उन्नताश्च शाला एव योग्याः। आन्ध्रप्रदेशे ३२ संस्कृतपाठशालासु द्विशतं विद्यार्थिनः संस्कृतं पठन्ति। २६ नूतनाः प्राच्यविद्यालया अपि संस्कृतं बोधयन्ति। जातीयैकतां, सांस्कृतिकैकतां, राजकीयैकतां च अपेक्ष्य संस्कृतं अवश्यं भारतदेशे सर्वत्र प्रबोधनीयं इति अवदत्।

रात्रिकालीया विनोदकार्यक्रमाश्च श्रीरामविलाससभाभवने निर्वर्तनीयत्वेन परिवर्तिताः।

अतः ८-३० P. M. वेलायां श्रीरामविलाससभाभवने रङ्गे तिरुपति श्री वेंकटेश्वर प्राच्यकलाशालीयया ललिताकलासमित्या "अश्वत्थामशपथम्" नाम्ना वेणीसंहारस्य तृतीयांकः प्रदर्शितः। कथाभागः आन्ध्रभाषायामनूद्य मुद्रितः सामजिकेभ्यः प्रदत्त आसीत्, येन ते संस्कृते प्रवर्तमानमपि नाटकं सुपरिचितमिव अन्वभूवन् आस्वादयंश्च। श्री वेदव्यासः अश्वत्थाम्नः, विजयकुमारः कृपस्य, मुरलीकृष्णारेड्डिः कर्णस्य, कृष्णप्रसादः सूतस्य भूमिकां अवहन्। आबालवृद्धं अभूतपूर्वं इदं संस्कृतरङ्गप्रदर्शनं प्रतिपदमस्तुवन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयदिने १३-१०-७३ प्रातः जीवकारुण्यसंघभवने संस्कृत-भाषाप्रचारिण्यास्सभायाः सर्वसभ्यसमावेशस्समवर्तत । श्री ति. कं. तिरुवेङ्कटाचार्यः प्रधानमन्त्री आध्यक्ष्यमवहत् । आयव्ययपट्टिका च कार्यदर्शिना श्रीमता एन्. रामनाथार्येण पठिता सर्वैः आमोदिता च ।

परिपालकवर्गः कार्यनिर्वाहकवर्गश्च नूतनतया निर्वाचितः, यत्रैते वर्तन्ते ।

परिपालकवर्गः

गौरवाध्यक्षः – श्री एम्. अनन्तशयनं अय्यंगार्यः,
भूतपूर्वराज्यपालः, तिरुपति.

१. अध्यक्षः – श्री डा० बेजवाड गोपालरेड्डिः,
भूतपूर्वराज्यपालः, नेल्लूरु.

२. उपाध्यक्षः – श्री पी. राजगोपालनायुडु, चित्तूरु.

३. कार्यदर्शी – श्री एन्. रामनाथार्यः, अड्वोकेट्, चित्तूरु.

४. उपकार्यदर्शी – शिरोमणिः श्री एम्. वरदराजं पन्तुलु,
कांचीपुरम्.

५. कोशाधिपः – श्री ए. कन्नय्यश्रेष्ठी, चित्तूरु.

६. सभ्याः –श्री सी. वेंकटरमण अय्यर, अड्वोकेट्, चित्तूरु.

७. शिरोमणिः श्री कप्पगन्तुल लक्ष्मणशास्त्री, हैदराबाद.

८. श्री ति. कं. तिरुवेङ्कटाचार्यः, चित्तूरु.

९. श्री के. वी. एन्. अप्पाराव्, प्रांशुपालः,
आंध्रगीर्वाणकलाशाला, कोव्वूरु.

१०. श्री वी. एन्. रामस्वामिशास्त्री, गोपिचेट्टिपालेम्.

११. श्री आर्. करुणाकरन्, प्रांशुपालः,
केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपति.

१२. श्रीमती रत्नाबायी, M. A. चित्तूरु.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

१३. चित्तूरु मंडलाधिपः (Ex-officio)

१४. श्री चिवुकुल मार्कंडेयशास्त्री (Ex-officio)
(उपविद्यानिर्देशकः)

संरक्षकवर्गः

१. अध्यक्षः – श्रीमती सरोजिनी महिषी,
स्टेटमिनिस्टर, टूरिजम्, न्यूडेल्ही.

२. श्री वासुदेवद्विवेदी शास्त्री,
सार्वभौमसंस्कृतप्रचारकार्यालयः, वारणासी.

कार्यनिर्वाहकवर्गः

१. प्रधानमन्त्री – श्री ति. कं. तिरुवेङ्कडाचार्यः, चित्तूरु.

२. परीक्षामन्त्री – श्री के. श्रीनिवासाचार्यः, मद्रास्-४३.

३. प्रकाशकमन्त्री – श्री के. मुनिरेड्डिः, चित्तूरु.

४. प्रचारकमन्त्री – श्री एन्. अनन्तरामशास्त्री, M. A.
गुंटूरु.

५. निधिमन्त्री – श्री पि. सुब्बराघवय्यः, चित्तूरु.

सभ्या -६. श्री एन्. रामनाथ अय्यर्, चित्तूरु. (Ex-officio)

७. श्री के. प्रह्लादगुप्तः, आल्लगड्डु.

८. श्री पि. वि. रमणमूर्तिः, M. A.
संस्कृतोपन्यासकः, सर्वकारकलाशाला, चित्तूरु.

९. श्री वि. शेषाचार्यः, तिरुपति.

१०. श्री के. एम्. मुरलीधरन्, पाकाल.

११. श्री सोमा श्रीनिवासन्, ४७, बरोडावीथी, मद्रास् - ३३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२. श्री एम्. वरदराजन्, चित्तूरु.

१३. श्री बी. गोविन्दराजुलुशेट्टि, चित्तूरु.

पाठ्यक्रमनिर्णायकसमितिः

१. श्री चिवुकुल मार्कंडेयशास्त्री, M. A. (Ex-officio)

२. श्री एन्. रामनाथय्यर्, B. A., B. L., चित्तूरु.

३. विद्याप्रवीणः श्री टि. के. तिरुवेङ्कटाचार्यः, चित्तूरु.

४. शिरोमणिः श्री के. श्रीनिवासाचार्यः, मद्रास्.

५. शिरोमणिः कप्पगन्तुल लक्ष्मणशास्त्री, हैदराबाद.

६. शिरोमणिः श्री के. मुनिरेड्डिः, चित्तूरु.

७. शिरोमणिः श्री ए. वरदराजन्, चित्तूरु.

परितेषु प्रस्तावेषु केचन मुख्यांशा अत्र दीयन्ते ।

(क) केन्द्रसर्वकारविज्ञापनाः

१. केन्द्रसर्वकारेण संकल्पितः संस्कृतविश्वविद्यालयः संस्कृतिकेन्द्रभूते तिरुपतिनगरे यथाशीघ्रं प्रतिष्ठापनीयः ।

२. भारतदेशे सर्वत्र पाठशालासु, कलाशालासु च संस्कृतोपाध्यायः एकैकः वा अवश्यं नियोजयितव्यः, शिल्पोपाध्यायावत् परिश्रमोपाध्यायवत् ।

३. भारतदेशीयेषु विश्वविद्यालयेषु सकलेषु च आन्ध्रविश्वविद्यालयादर्शेन स्वानुबन्धकलाशालासु संस्कृतडिप्लमो परीक्षाणां निर्वहणं संप्रार्थ्यते ।

४. भारतदेशे प्रतिप्रान्तं एकैका संस्कृतशोधसंस्था स्थापनीया ।

५. एतत्सभापरीक्षा कोविदा उन्नतस्तरेति निश्चित्य विश्वविद्यालयसंस्कृतपरीक्षाणां शिरोमणिविद्याप्रवीणादीनां पूर्वभाग (प्रिलिमनरी) सदृशतां आंध्रप्रदेशसर्वकारः अदादिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणात् केन्द्रसर्वकारोऽपि एतां शास्त्रिपरीक्षासदृशीं अंगी-कुर्यात् ।

(ख) आंध्रप्रदेशसर्वकारं प्रति विज्ञापना:

१. आंध्रप्रदेशे माध्यमिकोन्नतपाठशालासु प्रवर्तमानस्य संस्कृताभ्यासस्य अविच्छेदेन आन्तं प्रचलनार्थं जूनियरकलाशालासु अपि द्वितीयभाषात्वेन नियतं संस्कृतं आदेष्टुं प्रार्थयामहे ।

२. एतत्सभाकोविदोत्तीर्णानां संस्कृतबोधनाभ्यासपरीक्षायां प्रवेशं दापयेदित्यभ्यर्थना ।

३. उन्नतपाठशालीयसंस्कृतविद्यार्थिनां देशभाषाया इव संस्कृतस्यापि अंकान् समतया निर्णीय संस्कृतस्य देशभाषया सह समान प्रतिपत्तिं प्रददतु ।

४. श्री वेंकटेश्वरविश्वविद्यालयमादर्शत्वेनांगीकृत्य प्राच्य संस्कृत बी. ए. परीक्षाः प्रकटय्य, अन्ये च विश्वविद्यालयाः पाठ्यप्रणाल्यां आंग्लमपि संयोज्य, तेषां भाषापट्टभद्राणां राजकीयेषु सकलेषु उद्योगेषु अवकाशं कल्पयेयुः ।

मध्याह्ने ३ P. M. वेलायां गेयगैर्वाण्या आविष्करणमभूत् । अत्र आध्यक्ष्यवहनायाहूतस्य श्री आर्. करुणाकरमहोदयस्य अनुपस्थितेः तेन प्रेषितः श्री देवरकोंड सत्यनारायणमहोदय अध्यक्षपीठमधिष्ठाय श्रीकरुणाकरप्रदत्तं अध्यक्षभाषणं अपठत्, गेयगैर्वाणीमाविश्चकर च । चतुश्शास्त्रविद्वान् एन्. एस्. रामानुजताताचार्यः संस्कृतस्य गेयसाहित्यस्य च प्रशंसापूर्वकं गेयगैर्वाणीं प्राशंसत । ततः गेयगैर्वाणी संकलनकर्ता श्री ए. वरदराजमहोदयः तत्रत्यानि कतिचन गेयानि प्रगीय सभ्याननन्दयत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सायं ५-३० P. M. श्री वी. राघवमहोदयाध्यक्ष्येण महाजनसभा समपद्यत । श्री वासुदेव द्विवेदी शास्त्री (सार्वभौमसंस्कृतप्रचारकार्यालयः, वारणासी) संस्कृतप्रचारस्यावश्यकतां प्रचारे च प्रचारकैरनुभूयमानानि संकटानि, संस्कृतस्य अद्यतनीमभिवृद्धिं च सुलभललितं उपन्यास्थत् । श्री कप्पगन्तुल लक्ष्मणशास्त्रिमहोदयः आन्ध्रे तदन्ववदत् । द्विवेदी महोदयश्चैवमवदत् – बहूनि संस्कृतसंस्थानानि भारते मयावलोकितानि । परन्तु एषा संस्कृतप्रचारसंस्था सर्वसंपन्ना मयानुभूयते । अन्यासंस्थानां स्वीयं निवासभवनं प्रायशः नास्त्येव । नागपुरे अत्र च मया संस्कृतगृहमवालोक्यत इति ।

रात्रौ श्रीरामविलाससभाभवने विनोदकार्यक्रमः समवर्तत । श्री वाणीसंगीतनाट्यमंडल्या रोहिणीप्रायाभिर्बालिकाभिः भरतनाट्यं प्रदर्शितम् ।

ललितकलासमित्या "हनुमत्संदेश" नाम्ना अभिषेकनाटकस्य तृतीयांकः प्रदर्शितः ।

श्री वेदव्यासः रावणस्य, सदानन्दशास्त्री आंजनेयस्य, विजयकुमारः विभीषणस्य, हरिहरशास्त्री शखकर्णस्य च भूमिकां अधरत् ।

तृतीयदिने (१४-१०-७३) प्रातः ८-३० A. M. वेलायां पाठ्यग्रन्थनिर्णायकवर्गसमावेशः समवर्तिष्ट । सभ्याः परिचयाभिज्ञविचक्षणपाठ्यानि यथापूर्वमंगीकुर्वन्, समर्थकोविदयोश्च कानिचन परिवर्तनानि अरचयन्, परीक्षाशुल्केषु परीक्षकेभ्यो देये च काचन अभिवृद्धिः आदिष्टा । एष नूतननियमः १९७५ संवत्सर सेप्टंबर परीक्षतः आचारे अवतरिष्यति ।

मध्याह्ने ३-०० P. M. वेलायां गैर्वाणीताम्रोत्सवः प्रावर्तत । श्री कप्पगन्तुल लक्ष्मणशास्त्री (भूतपूर्व उपविद्यानिर्देशकः) आध्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्ष्यमवहत् । श्री सी. वी. शेषाचार्यः (श्री वेंकटेश्वरप्राच्यकलाशालोपन्यासकः) संस्कृतपत्रनिर्वहणक्लेशान्, गैर्वाण्या प्रकाशनरीतिं, एतत्पत्रिकाविशेषांश्च अस्तोत् स्वभाषणे। अध्यक्षमहोदयश्च स्वभाषणे संस्कृतभाषयाः अन्यभारतीयभाषाणां च पारस्परिकं सन्निहितसंबन्धं उदाहरणपूर्वकमुपन्यस्य गैर्वाणीपत्रिकायाः संस्कृतप्रचारे सुलभतरभाषाविस्तरणे च कृतार्थतां, छन्दस्य अप्रदानेपि एतत्पत्रस्य नियतप्रेषणेन ग्राहकाणां मनःपरिवर्तनं च प्राशंसत ।

सायं ५-३० वेलायां श्री कृष्णशर्मणां अनुपस्थितया व्याकरणशास्त्रपारीणः श्री बी. एन्. रामस्वामिशास्त्री महासभाध्यक्ष्यमवहत् । मधुरगानविशारदस्य यज्ञनारायणशर्मणः गीतगोविन्दगानेन सभा समारब्धा ।

डा० दिवाकर्ल वेंकटावधानिमहोदयः शाकुन्तलम्-कालिदासः इति विषयमधिकृत्य कालिदासकविताविशेषं तत्रापि शाकुन्तले तस्य सामर्थ्यविशेषं च सोदाहरणं उपन्यास्थत् ।

रात्रौ ९-३० P. M. वेलायां श्रीरामविलाससभाभवने विनोदकार्यक्रमः समजनि । वाणीसंगीतनाटचमंडल्या रोहिणीप्रायाभिः बालिकाभिः ससंगीतं भरतनाटचं प्रदर्शितम् । ललितकलासमित्या च "चाणक्यतन्त्रम्" नाम्ना मुद्राराक्षसतृतीयांकः प्रदर्शितः । अत्र ईश्वराचारी चाणक्यस्य, मुरलीकृष्णारेड्डिः चंद्रगुप्तस्य, कृष्णप्रसादः कंचुकिनश्च भूमिका अधरन् ।

त्रिष्वपि दिनेषु संस्कृतनाटकानि प्रजानां स्तोत्रपात्रण्यासन्, तत्र च दर्शकः भूमिकाधारी च वेदव्यासः प्रस्तुतोऽभवत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विजयतां कर्णाटकराज्यम्

(मैसूरुराज्यस्य कर्णाटकराज्यमिति शुभनामकरणोत्सव पवित्रसन्दर्भे)

रचयिता विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्

श्रीरामः किल यत्र वा जनकजां भार्यां विचिन्वन्पुरा
शूरैर्वायुसुतादिभिस्समुचितं साह्यं हि लेभे स्वयम् ।
अज्ञातां वसतिं च यत्र कठिनां पाण्डोस्सुताः चक्रिरे
देशोऽयं जगतीतले विजयतां कर्णाटनामा सदा ॥

भाषावाक्यमधूनि नाटककुले संवत्सहस्रद्वया-
त्पूर्वं ग्रीकजनैः मुदा किल मुहुः पीतानि यस्यैव वा ।
यद्वाण्यां बहुधा पुरन्दरमुखैः भक्तिश्च संवाहिता
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ॥

ग्रंथो वा कविराजमार्गकलितः यस्यादिमः कीर्तितः
पम्पाद्यैः कवितल्लजैश्च महिमा ख्यातः मुहुर्यस्य वा ।
आरब्धो 'बसवेन' वा शिवपरः यत्रैव धर्मो नवः
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ॥

'हयूयन्स्तांग'मुखैर्विदेशपथिकैः संकीर्तिता यत्प्रजाः
"निर्व्याजा अतिथिप्रियाश्शुभपराः कार्तज्ञ्यभूषा" इति ।
सीमा यस्य सरित्कवेरतनुजा गोदावरी वा स्मृता
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशे यत्र महासतीति विदिताः वीरांकिता वा शिलाः
पातिव्रत्यकथां च वीरचरितं नित्यं वदन्त्येव ताः ।
यस्योद्धारमहाध्वरेऽपि वनिताः दीक्षां गता यत्र वा
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ।।

यद्देशे जकणादिशिल्पचतुरैः निर्मापितान्यादरात्
बेलूरादिपुरीषु शिल्पकलया संशोभितान्यन्वहम् ।
आकर्षन्ति च मन्दिरणि जनतां संदर्शनोत्कान् मुहुः
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ।।

सङ्गीते निजनामशोभितमहामार्गः नवीनः पुरा
सृष्टो लास्यपथे यशः किल महत् संपादितं येन वा ।
विद्यारण्यमुखैर्यतीन्द्रसहितैः सम्पूजितो भक्तितः
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ।।

यत्संरक्षणकार्यजातनिरताः 'चेन्नम्म' मुख्यास्त्रियः
काव्यक्षेत्रसुदीपने च निरताः 'होन्नम्म'मुख्यास्तथा ।
भक्ताग्रेसरकीर्तिशोभिवनिताः 'अक्का'दयो यत्र वा
देशोयं भुवनेश्वरीकरुणया संवर्धतामन्वहम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गांधीकथा

रचयिता विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्.

कविसार्वभौमः भारतराष्ट्रीय-साहित्यसंगीतकलाक्षेत्रज्ञः विश्व-विख्यात 'नोबेल' पुरस्कारविजेता रवीन्द्रनाथठाकूरमहाशयः कस्य वा भारतीयस्य चित्तपथाद्दूरो भवेत्? साहित्यसंगीतकलादिषु नवनवीनमार्गस्य संशोधने, तद्रचनाया ञ्चानवरतं तस्योत्साहः । क्रमेणात्मनस्सुखमपि सर्वथा विस्मृत्य कार्येऽस्मिन्संलग्नो बभूव । आत्मनः प्रकोष्ठे, बहिरुद्याने यत्र कुत्र वा स्थित्वा, दिवानिशं रचयति स्म गीतकानि नवानि, स्वरप्रस्तारान्नूत्नान् । अनेनैवानल्पेन कार्योत्साहेन तस्य स्वास्थ्यं क्रमेण जह्रास । विश्रान्त्यै मित्रैः दत्ता अपि परामर्शा मोघा बभूवुः ।

एवं स्थिते, जातु महात्मागांधीमहाशः सत्यप्रियः, कविताप्रियस्य रवीन्द्रस्य संदर्शनार्थं आजगाम । संदर्शनात्पूर्वं केचन कवेर्नीरोगताकांक्षिण स्सुहृदः महात्मनस्सन्निधिमागत्य प्रार्थयामासुः "राष्ट्रपितः" अयन्तु कविराजः शान्तिनिकेतनसंस्थापकः आत्मनशान्ति सर्वथा विस्मृत्यानवरतं रचनाप्रपञ्चे मग्नोस्ति । अस्मद्विनीतां प्रार्थनामपि तिरस्करोति । अतः भवान् एव समर्थः तत्सन्मार्गनयने । कृपया संदर्शनवेलायां तेन साकं, तद्विश्रान्त्यै उचिता व्यवस्था करणीया" इति ।

राष्ट्रपितुः तत्रतो निर्गमनदिने तस्य प्रस्थापनसमारम्भे स्वयं ठाकुर आगत आसीत् । तदा गांधीमहोदयः गुरुदेवं प्रति "भोः कविवर ! अस्ति मदीया भिक्षैका भवत्सन्निधौ । यदि प्रतिजानीते यच्छामिति वदाम्यवश्यम्" इत्यब्रवीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"किं तत्? अवश्यं दास्यामि" इति प्रतिज्ञातम् रवीन्द्रेण। "सा तु भिक्षात्यल्पैका। भवता प्रत्यहं मध्याह्नात्परं एकापि होरा वा विश्रान्तिरुपलब्धव्या" इति स्वाशयं स्पष्टचकरोत् महात्मा।

वासरस्यैकस्य मध्याह्न समयः। कवीन्द्रस्य दर्शनार्थं तन्निकटसखा आचार्यः क्षितिमोहनसेनः आगतः। रवीन्द्रस्य प्रकोष्ठद्वारः बद्ध आसीत्। बहिरेवस्थितः आचार्यः "गुरो! तत्र भवद्दर्शनार्थं आगतोस्मि। अपि कस्मिन्नपि कार्ये मग्न.?" इत्यपृच्छत्। गम्भीरेण स्वरेण उत्तरं प्रकोष्ठान्तर्भागादेवावाप" महात्मने गांधीमहाशयाय भिक्षां यच्छन्नस्मि इति। उत्तरेण चकितः सेनमहोदयः कवाटरन्ध्रेणापश्यत्, रवीन्द्रः खट्वायां अर्धनिमीलितनेत्र आसीत्।

श्री-अप्पय्यदीक्षितेन्द्रजयन्ती (४२१)

सिकंदराबादनगरीयकीसोन्नतपाठशालायां १२-१०-७३ दिने सायं एष जयन्तीमहोत्सवः महावैभवेन संपन्नः आसीत्। तस्मिन् दिने प्रातः एकोदशरुद्राभिषेकः, दीपाराधनं, अर्चनं इत्यादयः मरेडपल्यां ग्रन्थप्रकाशनसमितिकार्यालये आचर्यन्त।

सायं श्री के. एन्. अनन्तरामन् I. A. S. महोदयः सभाध्यक्षतां अवहत्, सामवेदपठनेन कार्यक्रमः प्रारब्धः। श्री डी. जी. षडे स्वागतवचनानि अवोचत्, श्री रामस्वामी घनपाठी दीक्षितेन्द्रस्य शुभचरित्रं व्यवृणोत्, श्री परायतं कृष्णमूर्तिशास्त्री दीक्षितेन्द्रस्य महाग्रन्थान् प्रास्तौत्, श्री वी. चंद्रमौलिः, I. A. S. दीक्षितेन्द्रस्य पांडित्यविशेषं समस्तुवत्। अध्यक्षः स्वभाषणे दीक्षितस्य आन्ध्रजातौ आन्ध्रभाषायां च अभिमानविशेषं प्राशंसत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमादीच - उत्तरायणपरीक्षाणां सप्ताहकार्यक्रमः

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु (आं. प्र.)

Programme for Samskrita Examination, March 1974

विना विलम्बशुल्कं आवेदनपत्राणां प्रेषणायान्तिमावधिः	१ रू. विलम्बशुल्केन सह आवेदनपत्र-प्रेषणाय अन्तिमावधिः	परीक्षाणां प्रचलनसमयः 1974 मार्च मासे
20—1—74	31—1—74	कोविदः 9, 10, 11 तिथिषु, विचक्षणसमर्थौ 9, 10 तिथ्योः, परिचयाभिज्ञे 9 तिथौ

संस्कृतभाषाप्रचारिणी सभा,
चित्तूरु. (आ० प्र०)
10-11-73

की. श्रीनिवासाचार्यः,
परीक्षामन्त्री.

सूचनाः

१. प्रेषितं परीक्षाशुल्कं कथं चिदपि न प्रत्यर्प्येत, न परिवर्त्येत, न वा स्थाप्येत । अतः आलोच्य आवेदनपत्रं परिपूर्य प्रेषणीयं ।

२. न्यूनतया प्रेषितं शुल्कं न कार्यकरि भवेत् । अतः यावदावश्यकं आलोच्य एकदैव प्रेषणीयं ।

३. न्यूनशुल्कं आवेदनपत्रं तच्छुल्केन सह व्यर्थं भवेत् । अतः शुल्कस्य आवेदनपत्राणां च अत्यंतसंगतिरावश्यकी ।

४. लेखे आवेदकानां नामानि, तच्छुल्कस्य प्रत्येकविवरणं चावश्यकानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

५. विशेषानुमति (Examption) कृते एकमासात्पूर्वमेव ५-०० रूप्यकाणि, पृथक् योजनीयानि तत्तदावश्यकयोग्यातापत्रादश्च प्रेषयित्वा अनुमतिर्गृहीतव्या ।

६. एकस्मिन्नगरे बहूनि केन्द्राणि नांगीक्रियेरन्, नैकमपि पञ्चन्यूनाभ्यर्थिसत्वे, न वा समीपस्थेऽन्यकेन्द्रे ।

७. केन्द्रस्थापनविषये न केवलं विद्यार्थिनां संख्या प्रधानं, अपि तु दुराचाराणां असंभवोपि परिशील्येत परीक्षामन्त्रिणा ।

संस्कृतभाषाप्रचारिण्यास्सभायाः

स्थायिकेन्द्राणि

आन्ध्रप्रदेशे –

(१) अनन्तपुरम् (२) अनकापल्ली (३) आल्लगड्डु (४) कडप (५) काकिनाड (६) गुंटूरु (७) चित्तूरु (८) तिरुपति (९) दोम्मरनन्द्याला (१०) पेद्दापुरम् (११) भीमवरम् (१२) मछलीपट्टणम् (१३) मंत्रालय (१४) राजमंड्री (१५) विजयवाडा (१६) विजयनगरम् (१७) हिंदूपूरु (१८) हैदराबाद ।

द्राबिडप्रदेशे –

(१) अंबत्तूरु (मद्रास्) (२) क्रोंपेट (मद्रास् - ४४) (३) कोयंबत्तूरु - ए (४) कोयंबत्तूरु - बी (५) तंजावूरु (६) तिरुचिरापल्लि (७) तिरुवेण्गाडु (८) तिरुनेल्वेलि (९) त्यागरायनगर (१०) मदुरै - ए (११) मदुरै - बी (१२) मन्नार्गुडि (१३) मेट्टूरुडाम् (१४) श्रीरंगम् (तिरुच्चि) (१५) सेलम् ।

कर्णाटकप्रदेशे –

(१) बेंगलूरु (२) शाहपूर ।

उत्तरप्रदेशे –

न्यूडेल्ही ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिलभारतीयसंघटनाकार्यदर्शिनः माननीयस्य

एम्. पि. दिग्वेकरस्य आगमनम्

पेद्दापुरीग्रामे विश्वहिन्दूपरिषद्शाखा १९६७ वत्सरे स्वर्गीय-श्री जटावल्लभुल पुरुषोत्तममहोदयस्य शुभाशीर्भिस्संस्थापिता। तच्छाखाधिपैः एव सम्यक् समालोच्य परीधाविनामसंवत्सरे मार्गशीर्षेकादश्यां निश्शुल्कसंस्कृतपाठशाला, धर्मवैद्यशाला, अन्नवितदानकेन्द्रं च पुरजनसहकारेण समारब्धानि।

प्रतिदिनं सायंकाले पञ्चघण्टात आरभ्य घण्टाद्वयपर्यन्तं संस्कृताचार्येण श्री दर्भा चलमय्यशास्त्रिणा पाठशालाकार्यक्रमः प्रचाल्यते। तस्मिन्नेव समये डाक्टर श्री बच्चु सूर्यनारायणमूर्तिमहोदयेन, डाक्टर श्री चिलकमर्रि तिरुवेंगळाचार्यमहोदयेन च निश्शुल्कवैद्यशालाकार्यक्रमः स्वस्वकाम्पौण्डरसहायेन निर्वाह्यते। प्रतिभानुवासरं प्रातः पञ्चाशत् दीनेभ्यः जनेभ्यः श्री तम्मन सुब्बारावमहाशयस्य अचंचलदीक्षया अन्नवितरणकार्यक्रमः निरूह्यते। एतद्विश्वहिन्दूपरिषद् कार्यक्रमस्य पर्यवेक्षणाय अखिलभारतीयसंघटना कार्यदर्शी माननीय एम्. पाण्डुरङ्ग दिग्वेकर महोदयः आगतवान्। तदागमनशुभसमये तद्गौरवार्थं पेद्दापुरीग्रामस्थ श्री कन्यकापरमेश्वरी - आलये ११-१०-७३ भृगुवासरे प्रातःकाले अष्टघण्टारभ्य महती बहिरङ्गसभा प्रचालिता। बहवः पण्डिताः, जनाः, न्यायवादिनश्च आहूताः आगताश्च। पाठशालाविद्यार्थिभिः गीतापठनं, आदित्यहृदयपारायणं, सूर्याष्टकपठनं, विद्यार्थिनीनां संस्कृतसंभाषणं च अक्रियत दिग्वेकर महोदयस्य समक्षं। दिग्वेकरमहोदयाय परिषदध्यक्षेण परिषदाशयानुद्दिश्य स्वागतपत्रं समर्पितं। तदनन्तरं दिग्वेकरमहोदयेन उपन्यस्तम्। उपन्यासानन्तरं संस्कृतभाषाप्रचारिण्यास्सभायाः परिचयकक्ष्यायां उत्तीर्णेभ्यः विद्यार्थिभ्यः भगवद्गीतापुस्तकानि दिग्वेकरमहोदयेन बहूकृतानि। संस्कृताचार्येण वंदनसमर्पणं च कृतं।

***

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुकुन्दविलासः

श्री कुण्टिमद्दि शेषशर्मा:, अनन्तपुरम्.

बालमुकुन्दविलासः

श्रीवत्सचिह्नमपि शङ्खरथाङ्गपाणिं
मौळिस्फुरन्मणिकिरीटविभासमानम् ।
मन्दस्मितञ्च जननीतपसः फलञ्च
गोपालबालकमुकुन्दमहं नमामि ॥

कारागृहं स्वतनुकोमलकान्तिपूरै-
रापूरयन्तमरविन्ददलायताक्षम् ।
आनन्दखेदजनकं सकृदेव मातुः
गोपालबालकमुकुन्दमहं नमामि ॥

उद्गच्छति स्म कुतुकेन कळिन्दकन्या
यत्पादकञ्जयुगळीपरिचुम्बनाय ।
प्रादर्शयच्च पदवीं गमनाय रात्रौ
गोपालबालकमुकुन्दमहं नमामि ।

आविर्बभूव वसुदेवकळत्रगर्भा-
दानन्दहेतुरपि यः किल नन्दपत्न्याः ।
एकाऽऽमनस्यमपरा मुदमाप येन
गोपालबालकमुकुन्दमहं नमामि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पीत्वा विषाक्तममरारिकुरङ्गनेत्रा-
स्तन्यं सजीवनमरुद्भिरमारय द्यः ।
भक्तैस्समं परमधाम निनाय तां, तं
गोपलबालकमुकुन्दमहं नमामि ॥

उद्धृत्य मञ्जुनिनदन्मणिकिङ्किणीक-
पादाङ्गदे, रहसि सिक्थितदुग्धमण्डम् ।
हर्तुं, न्यसन्तमवनौ चरनौ च मन्दं
गोपालबालकमुकुन्दमहं नमामि ॥

जग्ध्वा दधीनि प्रतिवेशगतानि, शेषं
तद्गोपिकावदनसीम्नि विलिप्य, तूर्णम् ।
यान्तं, विलोक्य जननीं प्रचलायितक्षं
गोपालबालकमुकुन्दमहं नमामि ॥

चूडामणीकृतमनोज्ञमयूरबर्हं
पादाङ्गदायितपुराणवचोविलासम् ।
वंशीनिनादहृतवल्लवयौवनं तं
गोपालबालकमुकुन्दमहं नमामि ॥

कादम्बिनीरुचिरमोहनदेहकान्ति
कादम्बपाण्डुमधुरस्मितभासमानम् ।
फुल्लत्कदम्बसुमहारविराजमानं
गोपालबालकमुकुन्दमहं नमामि ॥

कालाहिदन्तुरफणानटनाभिरामं
कायप्रभाद्विगुणयामुनपूरदीप्तिम् ।
कन्दर्पदर्पहरसुन्दरदिव्यमूर्ति
गोपालबालकमुकुन्दमहं नमामि ॥

– (अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितानि

अनुवादकः श्री एन्. रामनाथार्यः.

[पूर्वानुबन्धः]

कृतांतपाशबद्धानां दैवोपहतचेतसां ।
बुद्धयः कुब्जगामिन्यः भवन्ति महतामपि ॥ ॥ ५१० ॥

Even great men deviate from rightful conduct, when they are afflieted by adverse fate and they are caught in the snares of death·

शनैश्शनैश्श्च भोक्तव्यं स्वयं वित्तमुपार्जितं ।
रसायनमिव प्राज्ञैः हेलया न कदाचन ॥ ॥ ५११ ॥

One should enjoy wealth earned by him, little by little, like a potent medicine, but not in a casual manner·

रविरपि न दहति तादृक् यादृक् वा दहति वालुकानिकरः ।
अन्यस्माल्लब्धपदो नीचः प्रायेण दुस्सहो भवति ॥ ॥ ५१२ ॥

The sun's rays do not scorch as severely as a burnt heap of sand; a low person, having obtained his position from another, generally becomes intolerable·

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो दुर्जनसंसर्गात् मानहानिः पदे पदे ।
पावको लोहसङ्गेन मुद्गरैरभिहन्यते ॥ ॥ ५१३ ॥

By associating with the wicked, one loses his reputation at every stage; fire is constantly beaten, when it is in contact with iron.

अपि वेत्ति षडक्षराणि चे दुपदेष्टुं यतते स्वयं हरम् ।
वसनाशनमात्रमस्ति चेत् धनदादप्यतिरिच्यते खलः ॥ ५१४ ॥

A wicked person, even though he knows very little, feels himself competent to advise even Lord Hara! when possessed of only food and clothing, he feels greater than Lord Kubera!

(अनुवर्तते)

आन्ध्रभाषायां अद्वैतग्रन्थः

सुरेश्वराचार्यस्य अद्वैतमतावष्टम्भनं विवृण्वन् श्री डा. सी. मार्कंडेयशास्त्री (उपविद्यानिर्देशकः आंध्रप्रदेशस्य) कंचन ग्रन्थमरचयत् । स च २९-१०-७३ दिने विजयवटिकायां आन्ध्रप्रदेशोन्नत-न्यायस्थानन्यायाध्यक्षेण श्री जी. वेंकट-रामशास्त्रिणा आविष्कृत आसीत् । श्री बी. रजनीकान्ताराव (Director AIR) महोदयेन, आचार्य ई. वि. आर. श्रीकृष्णशर्मणा (वेंकटेश्वरविश्वविद्यालयः संस्कृत-शाखाध्यक्षेण) श्री पुल्लेल श्रीरामचंद्रुडुना, श्री ई. अनन्तरामय्येन च ग्रन्थस्थ विशेषांशान् प्रति सुष्ठु भाषितिमासीत् ।

प्राचीनसंस्कृतग्रन्थानामन्येषामपि तत्तद्भाषासु अनुवादाः विमर्शाः संग्रहाश्च उद्भवन्तु येन प्रजाः संस्कृतमाहात्म्यं विदित्वा मूल-ग्रन्थपठनोत्सुका भूत्वा भारतीयसंस्कृतिं दृढाध्यवसाया भवेयुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२१ पुस्तकालय 077923 गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

Samskritha Bhasha Pracharini Sabha,

CHITTOOR. (A. P.)

संस्कृतभाषाप्रचारिण्यास्सभायाः

प्रमादीच - दक्षिणायनपरीक्षाफलानि

चित्तूरु. (आं. प्र.)

RESULTS OF SEPTEMBER EXAMINATIONS 1973.

The following are the Register Numbers of successful Candidates who appeared for the Samskrita Examinations held on 8th, 9th and 10th September, 1973.

PARICHAYA

I Class:- 9 20 28 33 34 35 38
41 42 48 53 54 55 71 117 119 145
146 150 151 158 159 160 171 196 203 278
338 346 378 379 389 390 393 396 397 400
401 402 404 410 476 477 485 520 521 522
523 524 525 526 552 553 554 556 557 562
602 604 619 621 628 630 633 635 639 640
643 724 725 727 728 729 753 756 876 877
886 887 889 893 894 899 900 and 907.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

II Class:- 7 8 37 44 45 46 47
50 51 52 59 61 66 69 70 95 97
105 118 120 125 128 140 142 143 144 147
161 163 165 168 169 170 173 188 189 190
192 97 198 199 255 258 272 281 322 336
337 353 355 357 370 372 375 377 380 383
367 388 398 4 3 475 481 493 501 505 527
532 533 535 538 555 558 559 560 591 592
620 626 628 629 631 636 644 657 658 666
670 671 682 696 699 710 712 713 730 731
754 755 757 758 781 784 790 791 804 824
828 829 831 833 874 875 879 880 881 882
883 884 885 888 901 933 and 945.

III Class:- 2 3 4 5 6 18 49
60 65 67 96 104 109 111 127 130 131
138 141 148 149 162 164 167 172 174 175
176 191 193 195 200 201 202 254 259 260
261 266 273 274 275 283 310 311 312 318
315 316 318 321 324 325 335 339 340 343
345 356 373 376 382 384 385 386 391 392
394 399 423 424 425 480 482 483 486 487
489 491 495 498 499 500 502 504 511 512
528 529 530 534 536 537 563 583 593 594
601 603 618 622 624 625 637 669 673 681
683 686 697 698 711 715 726 734 737 738
751 759 782 783 785 786 806 807 825 826
835 837 839 840 841 845 873 905 906 908
910 and 937.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

ABHIJNA

I Class:- 11 12 19 121 122 236 252 441 541 548 651 676 677 678 741 811 and 938.

II Class:- 14 80 106 123 135 181 183 186 208 229 230 232 233 237 251 328 330 359 361 362 367 368 395 405 406 407 427 433 435 438 440 442 444 445 446 448 452 539 540 543 544 545 549 550 572 596 598 606 646 647 648 649 650 652 701 702 703 704 705 706 709 716 718 720 760 761 762 763 766 776 779 810 812 857 929 939 940 941 942 and 952.

III Class:- 1 16 74 75 76 79 81 108 112 113 152 153 156 179 182 184 185 187 205 215 216 217 218 225 228 231 234 238 240 242 243 347 348 349 363 408 409 428 432 434 443 449 450 451 453 454 456 546 551 565 566 568 569 570 571 573 574 577 580 595 597 605 693 700 708 717 719 721 722 723 749 764 768 778 787 788 789 809 855 856 858 862 864 920 921 923 928 947 and 948.

VICHAKSHANA

I Class:- 770 771 772 and 813.

II Class:- 82 85 246 253 462 584 585 599 600 661 662 663 664 769 773 774 814 815 903 953 954 959 and 960.

III Class:- 17 21 83 84 86 245 247 332 333 470 519 581 582 595 679 956 957 and 958.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAMARTHA

I Class:- Nil.

II Class:- 116 and 479.

III Class:- 87 114 115 478 611 665 924 925 and 926.

I Part only:- 90 286 287 288 289 290 291 292 293 294 297 299 300 301 and 680.

II Part only:- 32 612 and 775.

KOVIDA

I Class:- Nil.

II Class:- Nil.

III Class:- 91 and 92.

I, II & III Parts only:- 93 and 94.

I & III Parts oniy:- 473 613 614 615 and 616.

I, III, IV & V Parts only:- 40 only.

I, III & V Parts only:- 474 only.

II & III Parts only:- 302 303 304 306 307 and 308.

II & IV Parts only:- 818 and 823.

III Part only:- 305 & 931.

III & V Parts only:- 816 and 817.

IV Part only:- 617 819 821 and 822.

The following candidates stood First in I Class in the Examinations mentioned below. Prizes will be awarded te them in due course.

PARICHAYA:- No. 553, Y. Rani, Puduchartam.

ABHIJNA:- No. 236, K. S. Srimathi, Chromepet, Madras.

VICHAKSHANA:-No. 772, S. Vedavalli, Srirangam.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमादीच - दक्षिणायनपरीक्षासु उपयुक्तानि केन्द्राणि – ५३

(१) अनन्तपुरम् (२) अंबत्तूरु (३) अनकापल्ली (४) आर्यवटम् (५) इन्द्रप्रस्थम् (६) कडप (७) कपिलेश्वरपुरम् (८) कलिंगपट्टणम् (९) काकिनाड (१०) कुंभकोणम् (११) कोंडमाचुपल्ली (१२) कोत्तपेट (१३) कोरसवाड (१४) कोयंबत्तूरु - ए (१५) कोयंबत्तूरु - बी (१६) क्रोम्पेट (१७) चित्तूरु (१८) तंजावूरु (१९) तांबरम् (२०) तांडूरु (२१) तिरुपति (२२) तिरुचिरापल्ली (२३) तिरुनगर (२४) तिरुनल्वेलि (२५) त्यागरायनगर (२६) दोम्मरनंद्याल (२७) निवगाम् (२८) नेल्लूरु (२९) पांडिचेरी (३०) पिठापुरम् (३१) पुदुच्चत्रं (३२) पेद्दापुरम् (३३) भीमवरम् (३४) मंत्रालयः (३५) मदनपल्ली (३६) मदुरा - ए (३७) मदुरा - बी (३८) मछलीपट्टणं (३९) मन्नार्गुडि (४०) मुक्कामळ (४१) राजमहेन्द्रवरम् (४२) लेपाक्षी (४३) वडुवूरु (४४) विल्लुपुरम् (४५) विशाखपट्टणं (४६) वृद्धाचलं (४७) श्रीकाकुलम् (४८) श्रीरंगम् (४९) श्रीरामापुरम् (५०) सत्यवेडु (५१) सेलम् (५२) हिन्दुपुरम् (५३) हैदराबाद् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षाफलकारिणी

प्रमादीच - दक्षिणायनपरीक्षासु उत्तीर्णाः – ६४०.

SEPTEMBER EXAMINATIONS 1973.

परीक्षाः	अभ्यर्थिनः	उत्तीर्णा			
		प्र. श्रे.	द्वि.श्रे.	तृ.श्रे.	खंडशः
परिचयः	513	85	126	141	–
अभिज्ञः	316	17	80	89	–
विचक्षणः	64	4	24	18	–
समर्थः	40	–	2	9	18
कोविदः	27	–	–	2	25
आहत्य	960	106	232	259	43

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तज्जीवनं भारतभूमिगौरवम्

ले. श्री वैद्य रामस्वरूपशास्त्री, संपादकः, बालसंस्कृतम्, बम्बई-८६

तज्जीवनं यद्धनदानसुन्दरं तज्जीवनं यत्र न लोभपाशः ।
तज्जीवनं यत्र न रागरोगः तज्जीवनं यत्परितोषपूर्णम् ॥
तज्जीवनं यत्र च सत्यमस्ति तज्जीवनं यत्र च शौचमस्ति ।
तज्जीवनं यत्र मनोविनिग्रहः तज्जीवनं यत्र दया परेषु ॥
तज्जीवनं कर्मपरायणं यत् तज्जीवनं धर्मपरायणं यत् ।
तज्जीवनं यत्र च यत्नपूजा तज्जीवनं यत्र परोपकारः ॥
तज्जीवनं यत्र धनागमः स्यात् तज्जीवनं यत्र च देशपूजा ।
तज्जीवनं यत्र गृहे सुखानि तज्जीवनं यत्र सतां समागमः ॥
तज्जीवनं यत्र च शौर्यमस्ति तज्जीवनं यत्र च धैर्यमस्ति ।
तज्जीवनं यत्र सुदक्षता स्यात् तज्जीवनं यत्र प्रसन्नता स्यात् ॥
तज्जीवनं यत्र नवीनता स्यात् तज्जीवनं यत्र न हीनता स्यात् ।
तज्जीवनं यत्र विशेषता स्यात् तज्जीवनं यत्र नवोन्नतिः स्यात् ॥
तज्जीवनं यत्र च देशनीति तज्जीवनं यत्र मिथः प्रतीतिः ।
तज्जीवनं यत्र जनानुरागः तज्जीवनं यत्र चमत्कृतिः स्यात् ॥
तज्जीवनं यत्र मिथो नमस्या तज्जीवनं यत्र च सन्मतिः स्यात् ।
तज्जीवनं यत्र सुसंस्कृतिः स्यात् तज्जीवनं यत्र च संस्कृतं स्यात् ॥
तज्जीवनं यत्क्षमया समेतं तज्जीवनं यद्विपदा विमुक्तम् ।
तज्जीवनं यत्समतापरीतं तज्जीवनं यत्र गुणानुरागः ॥
तज्जीवनं येन पिता प्रतुष्यति तज्जीवनं यत्र च हृष्यति प्रसूः ।
तज्जीवनं यत्र गुरोः प्रसन्नता तज्जीवनं यत्र हरिः प्रपद्यते ॥
तज्जीवनं यद्विनयेन भाति तज्जीवनं यत्र विभाति विद्या ।
तज्जीवनं यद्विनयेन रोचते तज्जीवनं विज्ञतयातिसुन्दरम् ॥
तज्जीवनं यत्र हरेरुपासनं तज्जीवनं यत्र गुरोश्च पूजनम् ।
तज्जीवनं यत्र गवां समर्हणं तज्जीवनं यद्यजनेन शोभते ॥
पठन्ति गीतां सकलाश्च लोकाः रामायणं भारतमेव भारते ।
स्वसंस्कृतेश्चापि चरन्ति चर्या तज्जीवनं भारतभूमिगौरवम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयतु गैर्वाणी

लेखकः श्री आर्. गोपालन्, चित्तूरु.

वाचामगोचरां वाणीं गैर्वाणीं निगमाम्बुधिम् ।
ध्यायेऽहं स्तौमि वन्दे च मनोवाक्कायशुद्धये ॥
स्वर्गापवर्गदां देवीं गैर्वाणीं सुमनोरमाम् ।
भजन्ति सुधियो लोके त्रिवर्गफलकाङ्क्षिणः ॥
सुधामयीं तु गैर्वाणीं अवाप्यापि दिवौकसः ।
पयोधिमथनं कृत्वा सुधायै क्लेशमाप्नुवन् ॥
ज्ञानं ददाति विज्ञानं प्रज्ञानं च तथा भुवि ।
ददाति वाञ्छितार्थं च नृभ्यो वाक् सुरसंस्कृता ॥
लोकैकमधुरां वाचं गैर्वाणीं वेदसंश्रिताम् ।
आनन्दमयकोशस्य निलयं प्रणमाम्यहम् ॥
चित्पुरीनिलयां दिक्षु प्रसरन्तीं यशस्विनीम् ।
गैर्वाणीं शङ्करीं यूयं सदा भजत भूतये ॥
गैर्वाणीपादसेवायां निरता ये महाशयाः ।
धन्या भवन्ति ते सर्वे कृतकृत्याः यशस्विनः ॥
वेदोपनिषदैः पूता या वाणी संस्कृता शुभा ।
सा नः पुनातु पापेभ्यो मोचयित्वा निरन्तरम् ॥
अष्टादशपुराणाढ्या इतिहाससमन्विता ।
स्मृतिभिस्सेविता दैवी वागस्तु भवतारिणी ॥
रसरीतिगुणोपेतैस्सर्वालङ्कारभूषितैः ।
काव्यैर्विराजते चैषा गैर्वाणी जगतीतले ॥
सर्वासु लोकभाषासु व्याप्तेयं सुरभारती ।
नालिप्ता लोकभाषाभ्यः तस्मादेषा विशिष्यते ॥
संश्लिष्टार्था ध्वनियुता गंभीरस्वरसंयुता ।
मन्त्रशास्त्रैकनिलया दैवी वाक् पातु नस्सदा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAMSKRITA BHASHA PRACHARINI SABHA, CHITTOOR.

Income and Expenditure Account for the Year ended 31-3-1972

EXPENDITURE

To Opening Stock of Books			18,872	70
,, Cost of Paper & Ptg. Exps. for publication of books			4,955	54
,, Cost of Out-side Purchase of books			928	65
,, Cost of Job Printing and question papers			1,089	57
,, Cost of Subscriptions for News paper & Periodicals			152	52
,, Cost of M. O. & Bank Charges			38	35
,, Cost of Audit Fees			50	00
,, Cost of Conveyance Charges			188	42
,, Cost of Building Maintenance			129	60
,, Cost of Stationery and General Charges			620	91
,, Cost of Paper and Ptg. Exps. for Silver Jubilee Sowneer.			2,000	00
GAIRWANI MAGAZINE :				
To Salary for Editor	1800	00		
,, Salary for Sub. Editor	1440	00		
,, Salary for Clerk & Peon	720	00		
,, Cost of Blocks	90	60		
,, Cost of Paper Purchased	2499	86		
,, Cost of Ptg Exps.	2307	00		
,, Postage	194	45		
			9,051	91
,, Remn. of Pracharaks			3,600	00
,, Remn. of Teachers			7,200	00
,, Remn. of Clerk, Attender, and Sweeper			1,020	00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

„	Presentations for Students		800	00
„	Postage Expenses		1,370	54
„	Remn. Paid to Examiners		590	30
„	Remn. Paid to Supdts.		621	20
„	EXCESS OF INCOME OVER EXPENDITURE		10,778	20
		Rs.	64,058	41

INCOME

By	Sale of Books			5,871	60
„	Subscription from Members			14	00
„	Subscription from Gairwani			505	00
„	Examination Fees			5,088	01
„	Interest Recd.			2,059	43
„	Donations			17,350	60

GOVERNMENT GRANTS :

For	Pracharaks Etc.	4050	00		
„	Library thro' Central Library	425	00		
„	Gairwani Magazine	3000	00		
„	Silver Jubilee Celebrations	300	00		
				7,775	00
„	Closing Stock of Books			25,345	55
„	Suspence Account			3	22
„	Donations for Silver Jubilee			46	00
		Rs.		64,058	41

For Associated Auditors,

K. Harikrishnan,

Sai. 12—10—73 *Partner.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAMSKRITHA BASHA PRACHARINI SABHA, CHITTOOR.

Balance Sheet as on 31st March, 1972.

LIABILITIES

SUNDRY CREDITORS				1,828	33
Capital Account :					
B/F	Rs.	94,055	97		
Add : Excess of Income over Expenditure		10,778	20		
				1,04,834	17
Difference in Books				61	46
			Rs.	1,06,723	96

ASSETS

Cash on hand				1,435	57
Cash At Banks :					
The Co-op Town Bank :					
S. D.	3079	2,232	23		
S. D.	3386	101	29		
C. D.	2941	303	21		
C. D.	1938	834	41		
				3,471	14
Fixed Deposits :					
The Co-op Town Bank		28,837	00		
The Andhra Bank Ltd.		1,000	00		
				29,837	00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Cost of Furniture :		
As per last B/Sheet	1,875 07	
Add : During the year	505 25	
		2,380 32
Cost of Building :		
As per last B/Sheet	30,693 83	
Add : During the year	234 40	
		30,928 23
Cost of Library Books :		
As per last B/Sheet	10,620 09	
Add : During the year	1,066 79	
		11,686 88
Closing Stock of Books		25,345 55
SUNDRY DEBTORS		1,639 27
	Rs.	1,06,723 96

AUDIT REPORT

We Certify that the above Statements of the Samskritha Basha Pracharini Sabha, Chittoor have been prepared in accordance with the books maintained by them and they are found to be correct to the best of our knowledge.

For Associated Auditors,
K. Harikrishnan,
Partner.

Sai. 12—10—73

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAMSKRITA BHASHA PRACHAIRNI SABHA, CHITTOOR.

INCOME AND EXPENDITURE STATEMENT FOR THE YEAR ENDED 31 st MARCH 1973

EXPENDITURE

			Rs.	Ps.
To Opening stock of books			25,345	55
,, Cost of paper and printing charges for publication of books			6,298	42
,, Cost of outside purchase of books			721	05
,, Cost of Job Printing and Question papers			1,016	48
,, Cost of subscription for News Paper and Periodicals			96	00
,, Cost of M. O. and Bank Charges			73	57
,, Cost of Audit fees			75	00
,, Cost of Telegraph ie., Address Regn.			50	00
,, Cost of Conveyance Charges			681	67
,, Cost of Building maintenance			91	30
,, Cost of stationary and general charges			458	81
Gairwani Magazine :				
To Salary for Editor	1,800	00		
,, Salary for Sub-Editor	1,440	00		
,, Salary for clerk and peon	720	00		
,, Cost of blocks	34	00		
,, Cost of paper purchased	2,011	33		
,, Cost of printing charges	2,218	00		
,, Cost of postage	174	48		
,, Cost of S. D. for Prepayment	20	00		
			8,417	81
To Remuneration of Pracharaks			3,600	00
,, Remuneration of Teachers			7,200	00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

	Rs.	Ps.
To Remuneration of Clerk, Attender and Sweeper	1,220	75
,, Cost of presentations for students	1,150	00
,, Cost of Postage paid	1,537	06
,, Remuneration paid for Examiners	580	55
,, Remuneration paid to Superintendents	752	90
,, Excess of Income over Expenditure	12,166	70
TOTAL	71,533	62

INCOME

			Rs.	Ps.
By Sale of books			7,120	72
,, Subscription from members			68	25
,, Subscription from Gairwani			576	60
,, Examination fees			4,979	25
,, Interest Receipts			4,223	13
,, Donations			14,206	25
By Government Grants :				
For Pracharaks, Teachers	4,050	00		
,, Gairwani Magazine	3,000	00		
,, Silver Jubilee Celebration	1,000	00		
			8,050	00
By Closing Stock of books			32,240	80
,, Suspence Account			68	62
			71,533	62

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAMSKRITHA BASHA PRACHARINI SABHA, CHITTOOR.

Balance Sheet as on 31st March, 1973.

LIABILITIES

			Rs.	Ps.
SUNDRY CREDITORS			2,338	28
Capital Account :—				
B/F Rs.	1,04,834	17		
Add : Excess of Income over Expenditure	12,166	70		
			1,17,000	87
		Rs.	1,19,339	15

ASSETS

			Rs.	Ps.
By Cash on hand			664	83
Cash At Banks :				
The Co-op Town Bank Ltd.				
S. D. 3079	2,252	12		
S. D. 3386	105	83		
C. D. 2941	303	50		
C. D. 1938	838	63		
			3,500	13
Fixed Deposits :				
The Co-op Town Bank	34,362	00		
The Andhra Bank Ltd.	1,000	00		
			35,362	00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Cost of Building :—				
As per last Balance Sheet			30,928	23
Cost of Furniture :—				
As per last B/S	2,380	32		
Add : During the year	904	56	3,284	98
Cost of Library Books				
As per last B/S	11,686	88		
Add : During the year	1,038	05		
			12,724	93
Closing Stock of Books			32,240	80
Sundry Debtors			484	14
Difference in books			149	11
		Rs.	1,19,339	15

AUDIT REPORT

We Cercify that the above Statements of the Samskritha Basha Pracharini Sabha, Chittoor have been prepared in accordance with the books maintained by them and they are found to be correct to the best of our knowledge.

(TRUE COPY)

For Associated Auditors,
K. Harikrishnan,
Partner.

Sai. 12—10—73.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

List of Subscribers for Gairvani

1.	Sri T. Bhaskra Rao, M. A. Guntur	25-00
2.	Sri Vishnubhatla Koneswara Sarma, Guntur-2	25-00
3.	Sri B V. L. Narayana Sastry, M. A., Vijayawada-4	4-00
4.	Sri G. Sathyanarayana, M. A., Vijayawada-4	4-00
5.	Sri Lakshminarayana, M. A., Guntur-4	4-00
6.	Sri D. R. K. Sarma, B. Sc., B. Ed, Guntur	4-00
7.	Sri P. Sathyanarayana, M. A., Vijayawada-5	4-00
8.	Sri A. Narasimhamurthy, M. A., Vijayawada-4	4-00
9.	Sri P. V. Acharya, M. A., Vijayawada-2	4-00
10.	Sri M. N. Guptha, M. A., Vijayawada-4	4-00
11.	Sri M. Gopalakrishnamurthy Sastry, Vijayawada-4	4-00
12.	Sti R. Muralidhara Rao, Vijayawada-4	4-00
13.	Sri K. Narasimha Rao, M. A., Vijayawada-4	4-00
14.	Sri P. S. Prasad, M. A., Guntur-2	4-00
15.	Sri K. G. C. Harivithal, M. Sc., Vijayawada-4	4-00
16.	Kumari P. Kalyani, M. A., Vijayawada-4	4-00
17.	Sri K. Suryanarayana, M. A., Vijayawada-4	4-00
18.	Sri V. V. R. Somayaji, M. A., Vijayawada-4	4-00
19.	Sri Pulicherla Sambasiva Rao, M. A., Guntur-4	4-00
20.	Sri Ch. Anjaneya Sastry, Vijayawada-4	4-00
21.	Sri M. S. Nageswara Rao, M. A., Guntur-2	4-00



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 1845/60. *Postal R. H. No. 493.*
आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.
Licensed to Post without Prepayment. LICENCE No. 57.

पुस्तकालय
[illegible] कांगड़ी विश्ववि[illegible]
हरिद्वार

…सर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ४-००

प्रहेलिका

शीर्षे यस्य विराजते श्रुतिपदं गर्भेन्तशब्दं तथा
पादो यस्य यतीन्द्रनामलसितः घण्टावतारस्स्वयम् ।
पंक्त्यास्यारिसगर्भ्यमार्गपथिकः दुर्वादिसिंहः कविः
कोऽयं रङ्गकृपासुधांशुकलितो विज्ञोऽश्ववक्त्रार्चकः ॥

(वेदान्तदेशिकः)

विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्.

Published by Sri N. Ramanatha Aiyer B. A; B. L., Advocate & Secretary S. B. P. Sabha, Chittoor (A. P.)
Printed by Sri T. K. Thiruvengadacharya at Vijaya Press, Guntur (A. P.) C. 1500

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

दूरध्वनिः — "संस्कृतम्"

वाणीं भजत गैर्वाणीम् !

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आं. प्र.) भारतम्.

संपुटः ११ | 15 th DECEMBER 1973 | क्रमांकः १२

प्रमादीच-मार्गशीर्षांकः | शकाब्दाः १८९५ | मूल्यम् ०-४० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूचिका

१. गैर्वाणीस्तवः १
२. (सम्पादकीयम्) चतुरंगक्रीडा २
३. तिरुपतिदेवस्थानस्य संस्कृतप्रचारदीक्षा ४
४. मुकुन्दविलासः ५
५. सुभाषितानि ७
६. "आर्षविद्याभूषणस्य" की. शे. जटावल्लभुल पुरुषोत्तमस्य जीवितसंग्रहः ९
७. प्रवर्धतां संस्कृतवैभवं भुवि ११
८. पंडित वासुदेव द्विवेदिनां आन्ध्रप्रदेशे संस्कृतप्रचारः १३
९. आधुनिकरीत्या संस्कृतभाषाबोधनाय भारतसर्वकारस्य प्रयत्नः १४
१०. स्यमन्तकोपाख्यानम् १५
११. एकोत्तरम् २१
१२. अभिनन्दनपत्रिका २२
१३. प्रमादीच - उत्तरायणपरीक्षाणां सन्नाहकार्यक्रमः २३
१४. संस्कृतभाषाप्रचारिण्यास्सभायाः स्थायिकेन्द्राणि २४
१५. गांधीकथा २५
१६. माघीयं सर्वशास्त्रपाण्डित्यम् २६
१७. श्रीशंकराचार्यः
१८. Sriman T. K. Tiruvenkatacharya passes away
१९. हा हन्त वज्रमापतितम् !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गैर्वाणीस्तवः

लेखकः श्री ति. गो. अनन्तसुब्रह्मण्यम्, तिरुपति.
(शिरोमणिः, विद्वान्, सङ्गीतभूषणं, डिप्-टीच्)

रागः – रञ्जनी *   **आ – स-रि-ग-म-ध-सं**

तालः – आदि   **अ – सं-नि-ध-म-ग-स-रि-स**

पल्लवी

सुमधुरवाणि – गैर्वाणि
सुमनोहरमणि मामव जननि ॥   ॥ सुमधुर ॥

अनुपल्लवी

बुधजनसेवितवाग्विकासिनि
भूसुरादिनुतागमवासिनि ॥   ॥ सुमधुर ॥

चरणम्

सारसनयने - सरसिजवदने
सरसकविहृत्पद्मसुखासने ।
नवरसमण्डितशास्त्रसुसदने
नववनमल्लिकामुकुलसुरदने ॥   ॥ सुमधुर ॥

---

* रञ्जनीरागः ५९-तम धर्मवती मेलरागजन्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

चतुरंगक्रीडा

प्रपंच: चतुरङ्गफलकमासीत् । तत्र च अमेरिका रष्यदेशौ अन्यान् स्वस्वरथगजतुरगपदातित्वेन परिकल्प्य क्रीडेते । अस्यां क्रीडायां बहुवारं स्वनीते: विजयदशा अपजयदशा च अन्वभूयत । क्रीडनपरा: यथा गजं गजेन अश्वं अश्वेन योधयन्ति तद्वत् एतावपि देशौ तत्र तत्र स्वस्वमुष्टिवशान् देशान् विविधसंकटेषु पातयित्वा उपलाल्य तोषयित्वा भीषयित्वा आयुधैस्सन्नाह्य पुर: प्रचोद्य पश्चादाकृष्य विविधप्रकारै: प्रपंचमेव भीतिभूतव्याकुलं कुर्वाते ।

भारतपाकिस्थाने आलंब्य कश्चन भयंकरस्सन्निवेश: समुपस्थापित: दैववशात् तात्कालिकतया प्रशान्तप्रायोपि नाडीव्रणवत् पुनपुन: अंकुरं प्रदर्शयत्येव । बांग्लादेशपार्थक्यसमस्यां अपरिष्कृतां विधायतौ किमपि किमपि विधत्सत: । काश्मीरसमस्यां मृतप्रायामपि संजीवनौषधिप्रयोगेण पुनरुत्थापयितुं सर्वदा प्रयास: क्रियते । एतेन भारतपाकिस्थानयो: संधय: सर्वेपि शिथिलप्राया एवानुभूयन्ते । प्रतिपदं भुट्टो धृष्टभाषणै: सन्धीनां मूल्यं डालरमूल्यमिव क्षीणक्षीणं प्रतीयते ।

अद्य ईजिप्ट-इस्रेल विवाद: प्रपंचे प्रमुखस्थानं भजते । भद्रतासमिते स्सूचना: लालना: आदेशाश्च व्यर्था एव भवन्ति । भद्रतासमितिरपि अग्रराज्ययन्त्रिता स्थिरशान्तिसम्पादिकाश्चर्या: स्वीकर्तुं नैव पारयति । एतावता भद्रतासमितिरेव चित्रगतैश्शासक [illegible] निष्प्रयोजनस्संवृत्त: ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्यतने विवादे तैलसमस्या काचन भीकरा समुत्पन्ना कृत्यैव आकृत्यैव भीषयति प्रपंचं प्रधानतः अमेरिकादेशम् । एतद्भीतोऽमेरिकादेशः यद्यपि इज्रेलं शान्तिप्रवणं कर्तुं मुद्युङ्क्ते तथापि भाविनिकालो अरेबियाप्रान्तमेव यथाकथा च विधया अमेरिकया कबलितो भवेच्चेत् नात्राश्चर्यं किंचित् भवेत् ।

यंत्राणां वाहनानां च असंख्याकतया विद्यमानतया प्रपंचे तैलस्य इंगालस्य विद्युतश्च आवश्यकता अतीव वर्धते । एतेषु यस्यकस्यापि न्यूनतायां सत्यां त्रिदोषेष्वेकस्य न्यूनतायां देहिनः स्थितिः यादृशी तादृश्येव प्रपंचस्थायिस्थितिः । पश्यत अद्ययावत् अस्मद्देशे विद्युदुत्पत्तेः न्यूनतया परिश्रमाणां कृषेः च अकालसंस्तम्भनं समजनि । सुधायाः उत्पत्तिस्थगनान्महाभवन - सेतु - निर्माणानां संभवेन सह सामान्यजनस्य कुटीरपुनर्निर्माणादिकमपि स्थगितमासीत् इंगालस्य न्यूनतया पट्टिकाशकटानां बहूनां निरोध आसीत् येन जनाः वस्तूनि च प्रदेशान्तरं नेतुं अशक्तानि प्रजानां प्रभुत्वस्य च महती व्यथां जनयन्ति । तैलन्यूनता आरभराज्यैः कल्पिता भीषयति भारतं सत्यं । एतेन तैलमूल्यमभिवर्धितम् । पाचकज्योतींषि, तमोवारकज्योतींषि, तैलयानानि च कष्टज्वाल्यानि कष्टचोद्यानि च अभवन् ।

अमेरिकादेशे तु तैलस्तम्भनेन महतीहानि राशंकयते । तदपनोदनार्थं इज्रेलमनुनीय संधिसंघटनाय अमेरिका यतते । परन्तु ईजिप्ट - इज्रेलौ गजकच्छपाविव परस्परं युद्धचतः नजानीमः को वा गरुडः द्वे अपि राज्ये कबलयिष्यतीति ।

एवं सबलराज्ययोः परस्परस्पर्धायां दुर्बलानि राज्यानि विध्वस्तानि भवन्ति । तयोः चतुरंगे उपकरणत्वेन तदधीनानि राज्यानि उपयुज्यन्ते । अन्ते कस्य वा विजय इति अनवगमेपि पुरश्चोदितानां राज्यानां तु नाशः तथ्यमिति स्पष्टमवगम्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिरुपतिदेवस्थानस्य संस्कृतप्रचारदीक्षा

श्री वी. के. रावु महाशयः तिरुपति मुपस्थाय वेदशास्त्र-आगमविद्वत्सदसि देवस्थानस्य संस्कृतप्रचारकृषिं प्राशंसत ।

हिन्दूधर्मप्रचाराया प्रतिवर्षं लक्षरूप्यकाणां व्ययोगींकृतः । तदनुगुणं प्रथमोपयोगत्वेन पंचलक्षरूप्यकैः आर्षसंस्कृतसदः हिन्दू-धर्मप्रतिष्ठान मित्यादिसंस्थाः संचाल्यन्ते । शास्त्राणां वेदानां आगमानां च प्रचाराय देवस्थानस्य कार्यक्रमः स्तुत्यो वर्तते इति सोवदत् ।

एंडोमेंटबोर्ड कमिषनरः श्री के. वासुदेवराव. आत्मप्रसंगे शास्त्रबोधनार्थं पोस्टग्राडचुएट् केन्द्रत्वेन अभिवर्धितायां संस्कृत-पाठशालायां गुरुकुलपद्धत्या बोधनं प्रचलति । संस्कृतप्रोत्साहाय प्रतिमुख्यग्रामं स्थानिकसंस्थाः स्थापनीयाः । वेदान् आगमांश्च बोधयितुं न्यूनातिन्यूनं प्रारंभावस्थयापि चर्याः कर्तुं तत्तद्देवस्थाना-धिकारिणः संसूच्यन्ते । तथाचेत् उन्नतविद्याभ्यासाय तिरुमलं आगन्तुं शक्यते । अत्र अभ्यासकुशलाः अर्चकत्वेन यत्र कुत्रापि कार्यं कर्तुं प्रभवेयुः । वल्लियप्पन् सदसः स्वागत मर्पयन् चित्तूरु संस्कृतभाषाप्रचारिण्यास्सभायाः संस्कृतप्रचारसेवामप्यस्तुवत् । वासुदेवराव उत्तीर्णेभ्यः ४९ पंडितेभ्यः रांकवालंकरणपूर्वकं संभा-वनाः आर्पयत् ।

यजुर्वेदभाष्यं, कृष्णयजुर्वेदः, शुक्लयजुर्वेदः, न्यायवेदान्त-मीमांसा आगमेषु एते उत्तीर्णाः । परीक्षकेभ्यश्च विंशतिसंख्याकेभ्यः पारितोषिकानि अदीयन्त ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुकुन्दविलासः

श्री कुण्टिमद्दि शेषशर्मा, अनन्तपुरम्.

(पूर्वानुबन्धः)

कस्तूरिकातिलकमुग्धललाटपट्टं
फालस्फुरद्भ्रमरकं कमलायताक्षम् ।
बिम्बाधरस्फुरितमन्दमनोज्ञहासं
गोपालबालकमुकुन्दमहं नमामि ॥

आनीत[1]लोप्त्रनवनीतविलिप्तवक्त्रं
गोपाङ्गनाभिरभितः परिमृग्यमाणम् ।
दिक्षु प्रसारितविलोलकटाक्षमालम्
गोपालबालकमुकुन्दमहं नमामि ॥

आजन्मनिष्ठुरनिशाटनिबर्हणाय
संरक्षणाय च सतां रचितावधानम् ।
ब्रह्मादिभिश्च कथमप्यवितर्क्यतत्त्वं
गोपालबालकमुकुन्दमहं नमामि ॥

पीयूषमण्डदधिमाक्षिकनिर्विशेषं
पेपीयमानगरळाग्निशिखाकलापम् ।
अम्बां जगत्स्ववदने परिदर्शयन्तं
गोपालबालकमुकुन्दमहं नमामि ॥

---

1 स्तेयं लोप्त्रं तु तद्धनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भग्नाध्वरेण कुपितेन पुरन्दरेण
वृष्टं कराळकरकाऽऽकुलकुम्भवर्षम् ।
छत्रीकृतेन च नगेन निवारयन्तं
गोपालबालकमुकुन्दमहं नमामि ।।

कीशं प्रदर्श्य तरुशाखगतं परस्य,
तत्पाणिसंगतमपूपमथाहरन्तम् ।
तूर्णं निगीर्य, रसनां परिदर्शयन्तं
गोपालबालकमुकुन्दमहं नामामि ।।

धेनूभवंश्च, [1]वृषभन्नपि, तर्णकन्यः
रज्जूभवन् किल जहारविधेश्च गर्वम् ।
गोपस्तदीयवसनन्, लगुडश्च, तोत्रन्
गोपालबालकमुकुन्दमहं नमामि ।।

राकासुधाकरकरैर्धवलायमाने
बृन्दावने च यमुनासिकतातले च ।
गोपाङ्गनावलयरासविलासलोलम्;
गोपालबालकमुकुन्दमहं नमामि ।।

अन्तर्हितं मिहिरसूनुतटीविहारे;
लोलैस्सकज्जलजलैश्च विशालनेत्रैः ।
गोपाङ्गनाभिरभितः परिमृग्यमाणं
गोपालबालकमुकुन्दमहं नमामि ।।

अक्रूरहूतिमवकर्ण्य बलेन[2]सत्रा
यान्तं, रथस्थित, मथाप्यधिवारि दृष्टम् ।
केयूरकुण्डलकिरीटविलोलहारं
गोपालबालकमुकुन्दमहं नमामि ।।

इति बालमुकुन्दविलासः ।

---

[1] वृषभादिभ्यः क्विबन्तेभ्यः शतृ। [2] सह।

(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

सुभाषितानि

अनुवादकः श्री एन्. रामनाथार्यः.

[पूर्वानुबन्धः]

उपकारमेव तनुते विपद्गतः सद्गुणो महतां ।
मूर्छां गतो मृतो वा निदर्शनं पारदोत्र रसः ॥ ५१५ ॥

Though in distress themselves, great men, always help the needy· Mercury, though calcinated or burnt, is an example in this regard·

अयाचितः सुखं दत्ते याचितश्च न यच्छति ।
सर्वस्वं चापि हरते विधिरुच्छृंखलो नृणां ॥ ॥ ५१६ ॥

The course of Fate is unfettered· Unsolicited it bestows happiness on some and denies it to others who ask for it and it takes away the entire wealth of others.

प्राप्तव्यमर्थं लोभते मनुष्यः दैवोपि तं लङ्घयितुं न शक्तः ।
तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं नहि तत्परेषाम् ॥

Everyone obtains the thing he is destined to get; even gods cannot prevent it· I therefore never grieve over nor feel surprised at my lot since what is destined to be mine can never belong to others.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न तत् स्वर्गेपि सौख्यं स्यात् दिव्यस्पर्शनशोभने ।
कुस्थानेपि भवेत्पुंसां जन्मनो यत्र सम्भवः ॥ ॥ ५१८ ॥

The happiness people enjoy in their place of birth, though that place is an insignificant one, connot be even in Heaven, though charming and contacted by celestials.

तावत्स्यात् सुप्रसन्नास्यः तावद्गुरुजने रतिः ।
पुरुषो योषितां यावत् न शृणोति वचो रहः ॥ ॥ ५१९ ॥

As long as a person is not guided by the advice of women tendered in secret, so long does he exhibit a pleasing countenence and is attached to elders.

कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम् ।
कुराजांतानि राष्ट्राणि कुकर्मान्तं यशो नृणाम् ॥ ५२० ॥

Families get ruined due to quarrels between the members, friendship is lost due to harsh words, kingdoms are lost due to bad kings, and the fame of persons is lost due to their bad conduct.

दुर्गः त्रिकूटः, परिखा समुद्रः, रक्षांसि योधाः, धनदाच्च वित्तम् ।
शास्त्रं च यस्योशनसा प्रणीतं स रावणो दैववशाद्विपन्नः ॥ ५२१ ॥

Even Ravana who had the Trikuta mountain as his fort, the ocean itself as the moat, the Rakshasas as his warirors. Kubera as his treasurer, and whose policy was in accordance with the political science laid down by Sukracharya, had to succumb to Fate.

– (अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"आर्षविद्याभूषणस्य"

की. शे. जटावल्लभुल पुरुषोत्तमस्य

जीवितसंग्रहः

लेखकः श्री दर्भा वलमय्यशास्त्री.

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत !
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहं ॥

गीतावाक्यानुसारेण अस्मिन् कलियुगे मतसंस्कृतीनां निरादरणसमये, हिन्दूमतप्रबोधाय भगवान् श्रीकृष्णः पुरुषोत्तमरूपेण विश्वावसु - नामसंवत्सरमाखबहुळसप्तमी - स्थिरवासरे (१७-२-१९०६) पूर्वगोदावरी मण्डलान्तर्गते नडवपल्लिग्रामे अवततार। अस्य पिता वेदश्रौतविद्यायां पण्डितः कृष्णसोमयाजी, माता महासाध्वी महालक्ष्मीः च। अनयोः दम्पत्योः तपःफलसम्भूतः पुरुषोत्तम इति नात्र संशयः। अस्य धर्मपत्नी श्रीमती बालात्रिपुरसुन्दरी।

श्रीपुरुषोत्तमः बाल्ये एव पितुस्सन्निधौ संस्कृतभाषाध्ययनं कृतवान्। उन्नतपाठशालायां एस्. एस्. एल्. सि. परीक्षायां उत्तीर्णोऽभवत्। तदैव श्रीवेमूरि रामगोविन्दशास्त्रिणः सन्निधौ काव्यनाटकालङ्कारादि - ग्रन्थान् अपठत्। तदनन्तरं वैयाकरणकेसरिबिरुदाङ्कितस्य श्रीपुल्य उमामहेश्वरशास्त्रिणः समीपे व्याकरणशास्त्राध्ययनं अकरोत्। विजयनगरमहाराज कलाशालायां सम्यक् पठित्वा (बि.ए.) पट्टभद्रोऽभवत्। १९३४ वत्सरे एम्.ए. पट्टं प्राप्तवान्। कोव्वूरुग्रामे श्रीकोम्पेल्ल सत्यनारायणशास्त्रिणः निकटे वेदाध्ययनं कृतवान्।

श्रीपुरुषोत्तममहोदयः प्रथमतः पिठापुरं महाराजकलाशालायां ट्यूटर् पदवीं निर्वाह्य, ततः अनतिकाले एव कोव्वूरुग्रामे 'आन्ध्रगीर्वाणविद्यापीठे' प्रधानाचार्यपदं प्राप। तत्र बहुकालं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्पदवीं निर्वाह्य, विजयवाड-पुरस्थायां आंग्लकलाशालायां संस्कृतोपन्यासकपदवीं स्वीकृतवान्। १-८-१९६६ वत्सरे षष्ठिपूर्त्यनन्तरं पदवीविरमणं कृत्वा काकिनाडपत्तने श्रीपैण्डा सत्यनारायणमूर्ति - संस्कृतकलाशालायां प्रधानाचार्यपदवीं स्वीकृत्य जीवितपर्यन्तं अत्यन्तसमर्थतया तां निरवहत्।

भगवद्गीताप्रवेश:, भारतीयविज्ञानं, भारतीयवैभवम्, महाकविसन्देश:, जगद्गुरुप्रशस्ति:, हिन्दूमतं, वेदकालपु स्त्रीलु, स्मृतिकालपु स्त्रीलु, धर्ममञ्जरी, चित्रशतकम् इत्यादय बहव: उत्तमग्रन्था: श्रीपुरुषोत्तममहोदयेन सम्यक् विरचिता:। बहव: आध्यात्मिकप्रसङ्गा: बहुषु ग्रामेषु, अत्यन्तावेशयुक्ततया, गाम्भीर्येण च अक्रियन्त। आकाशवाणी केन्द्रे चापि बहुवारं तेन उपन्यस्तम्।

श्रीपुरुषोत्तमोत्तम: आन्ध्रप्रदेशे विश्वहिन्दूपरिषदध्यक्षपदवीं स्वीकृत्य निर्विरामकृषिं कृत्वा आन्ध्रप्रदेशे सर्वत्र विश्वहिन्दूपरिषद: शाखोपशाखा: अनेका: स्थापयित्वा संस्कृतभाषाप्रचारं, हिन्दूमतधर्मप्रचारं च कृतवान्। आन्ध्रदेशे अथर्वणवेदोद्धरणाय निकामं कृषिं अकरोत्। तिरुपतिहिन्दूधर्मप्रतिष्ठानसभायां सभ्य: अभवत्। ग्रीष्म-विरामकालेषु अनेका: धर्मप्रबोधकपाठशाला: स्थापयित्वा मन्वादिधर्मशास्त्ररहस्यानि प्रबोधयामास। काकिनाडपत्तने वेणुगोपाल संस्कृतप्रचारसभां स्थापयित्वा रात्रिसंस्कृतपाठशाला:, वेदस्मार्तपाठशाला:, संस्कृतकलाशाला:, सद्गोष्ठीश्च निर्वाह्य अशेषप्रजानीकस्य मार्गदर्शकोऽभवत्। आन्ध्रप्रदेशे संस्कृतविद्यालयसंस्थापनाय पुरुषोत्तममहाभागस्य उपदेशान् शिरसा ग्रहीतुं अस्मद्राष्ट्रप्रभुत्वं सिद्धसंकल्पं अभवत्।

श्रीकामकोटि जगद्गुरूणां आदेशानुसारेण हिन्दूमतधर्मान् उपन्यसितुम् श्रीपुरुषोत्तम: बद्धकङ्कणोऽभवत्। एष: महनीय: आन्ध्रलोकं त्यक्त्वा २८-१०-७२ दिने प्रात:काले स्वगृहे एव दिवंगत:। अस्य पुत्रत्रयं, पुत्रिकाचतुष्टयं च सदा पितु: कीर्तिं निरन्तरां रक्षतु। ***

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवर्धतां संस्कृतवैभवं भुवि

रचयिता विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्

आखण्डलाद्यैर्महिमा च यस्य वा
नित्यं मुदा स्वीयकथाप्रसङ्गतः ।
सङ्कीर्त्यते देवकुले विशेषतः
प्रवर्धतां संस्कृतवैभवं भुवि ॥

यच्छब्दराशिः सकलो विलक्षणैः
संसृज्यते शास्त्रवचोभिरन्वहम् ।
प्राचीनता यस्य सभैः समादृता
प्रवर्धतां संस्कृतवैभवं भुवि ॥

ज्ञानप्रवाहः प्रथमो वनान्तरे
दृष्टः किलाम्नायचतुष्टयात्मकः ।
पूर्वं मुनीन्द्रैः तपसा च यस्य वा
प्रवर्धतां संस्कृतवैभवं भुवि ॥

यस्य प्रभावाद्भुवनाङ्गणे पुरा
सुसंस्कृतासीत्किल भारतावनिः ।
विशाललोके बहुधाह्यसंस्कृते
प्रवर्धतां संस्कृतवैभवं भुवि ॥

ज्ञानादियोगत्रयसङ्गमो वरः
नदीत्रयाणामिव यत्र राजते ।
आचार्यवर्यैर्महितैर्नुतं तथा
प्रवर्धतां संस्कृतवैभवं भुवि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलङ्कृतिः काव्यकुले कवीश्वरैः
गुरुत्वमर्थस्य पदस्य सौष्ठवम् ।
प्रवर्तितान्येव च यत्र वा तथा
प्रवर्धतां संस्कृतवैभवं भुवि ॥

यन्मोक्षमूलादिभिरादृतं पुरा
सङ्कीर्तितं "कीत"मुखैः बिदेशगैः ।
देशीयभाषाजननस्य कारणम्
प्रवर्धतां संस्कृतवैभवं भुवि ॥

यद्राष्ट्रभाषापदवीं लभेत चेत्
भाषाविवादस्स्वयमेव शाम्यति ।
धर्मेण दूरा अपि धर्ममार्गगाः
प्रवर्धतां संस्कृतवैभवं भुवि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पंडित वासुदेव द्विवेदिनां

आन्ध्रप्रदेशे संस्कृतप्रचारः

वारणासीस्थ - सार्वभौमसंस्कृतप्रचारकार्यालय - सञ्चालकाः वासुदेवद्विवेदी शास्त्रिणः चित्तूरनगरस्य संस्कृतभाषाप्रचारिण्याः सभाया रजतोत्सवसमारोहे सम्मिलितुं समाहूता अक्टूबरमासस्य द्वादशतारिकातो दिनत्रयं तत्र स्थित्वा ततः श्री कप्पगन्तुल लक्ष्मण-शास्त्रिमहोदयैः साकं प्रस्थाय तिरुपति, येर्पेडु, प्रोद्दुटूर प्रभृति-स्थानेषु संस्कृतप्रचारं कुर्वन्तः अक्टूबरमासस्य विंशतारिकायां हैदराबादनगरं समायाताः ।

महत्सौभाग्यमेतन्नगरवासिनां यत् द्विवेदिनां सरलतमानि संस्कृतस्य भाषणानि श्रोतुं शुभावसरो लब्धः । अस्मिन् नगरे विश्व-विद्यालये, वंशीलाल बालिकाविद्यालये, कर्नाटकसाहित्यमन्दिरे तथा अन्येषु संस्थानेषु संस्कृतभाषाप्रचारात्मकानि भाषणानि प्रचलितानि । एतेषां सरलतमं ललितं च संस्कृतभाषणं शृण्वन्तो भावुका अत्यन्तमाश्चर्यं प्रकटयन्तः चित्रार्पिता इव आत्मानं विस्मृत्य प्रमोदन्ते स्म । बहूनां मनसि संस्कृतं सरलतममिति, इयमेव भाषा भारतराष्ट्रभाषा भूयादिति च प्रगाढतरा भावना उदपद्यत ।

द्विवेदिमहोदयाः हैदराबादनगरे संस्कृतप्रधानानि बहूनि अर्यसमाजमन्दिरादीनि स्थानानि सन्दर्श्य तत्र क्रियमाणानि संस्कृत-प्रचारकार्याणि च अनुशील्य महान्तं प्रमोदं प्राचीकटन् ।

एते अस्मिन् नगरे आनवम्बरमासान्तं स्थित्वा अन्येषु अपि स्थानेषु संस्कृतप्रचारकार्यक्रमान् निरवहन् । अत्र एतेषां निवासः आदर्शनगरस्थिते श्रीकप्पगन्तुल लक्ष्मणशास्त्रिणां गृहे अवर्तत । दूरभाषिण्याः संख्या– ३३७८२ विद्यते ।

—श्री वेंकटेश्वरशास्त्री.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधुनिकरीत्या संस्कृतभाषाबोधनाय भारतसर्वकारस्य प्रयत्नः

पंचमपञ्चवर्षप्रणाल्यां संस्कृतभाषासमुन्नतबोधनार्थं केन्द्रसर्वकारः समकल्पयत् । भाषाबोधनकेन्द्राणां स्थापनं, उपाध्यायानां बोधनशिक्षणं, आवश्यकबोधनपरिकराणां समर्पणं, एतादृशानि कतिचन कार्याणि सुनिश्चितानि । सेकंडरीपाठशालासु संस्कृतभाषाबोधनाय कठिनविधानं अवलंब्येत । संस्कृतपाठशालानां आधुनिकीकरणं, वैज्ञानिकरीत्या भाषाबोधनं, परीक्षासु कतिचन संस्काराः, इति अंशाः निर्णीताः । पश्चिमवंगेषु उत्तरप्रदेशे च कतिचन पाठशालाः पुनर्व्यवस्थीक्रियेरन् । इतरप्रदेशेषु च तादृशाः पाठशालाः विद्यासंस्थात्वेन विपरिणमय्य आदर्शसंस्कृतविद्यालयैः केन्द्रीयसंस्कृतविद्यालयनाम्ना व्यवह्रियेरन् । एताः संस्थाः सेंट्रल् स्कूलत्वेन केंद्रीयसंस्कृतविद्यापीठानां अनुबन्धत्वेन वर्तिष्यन्ते । चत्वारि दक्षिणराज्यानि, पश्चिमवंगः, बिहारः, ओरिस्सा, अस्सां, हिमाचलप्रदेशः, पंजाबः, हर्याना, उत्तरप्रदेशः, राजस्थानम्, महाराष्ट्रम्, घूर्जरम् एतेभ्यस्सर्वेभ्यः अनुगुणत्वेन एकः जातीयसंस्कृतसर्वे (विचारण) विभागः प्रणालिकासमये निर्वाह्येत । भारतदेशे विलक्षणपांडित्यशालिनां पंडितानां पट्टिका काचित् संसिद्धा क्रियेत येन अवसरे तेषां सहायसहकारौ संस्कृतबोधने लभेयाताम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

स्यमन्तकोपाख्यानम्

बोधकरत्नं, रामायणज्योतिः, उपन्यासचक्रवर्ती, ज्यौतिषविद्वान्
मु. वि. श्रीनिवासराघवाचार्यः, अवलूर्.

पुरा द्वापरयुगे सत्राजिन्नाम राजा चिरं राज्यशासनं कुर्वन् सूर्यदेवोपासनां च आचरन्नास्त। राज्यशासनं तपःकरणं च युगपत् निर्वोढुं अशक्यं आसीत्। तस्मात् राज्यशासनं मन्त्रिषु निक्षिप्य मधुवनं गत्वा सूर्यदेवप्रसादं संपूर्णतया प्राप्तुं पंचाग्निमध्ये तपश्चकार। निदाघे तस्योग्रतपःकरणेन सन्तुष्टः देवः आदित्यः तस्य पुरतः प्रत्यक्षीभूय तस्मै स्यमन्तकाख्यं दिव्यमणिं अदात्, आह च "राजन्, तव तपसा तुष्टः अहं, मामेव विशिष्टं देवं मन्यमानाय अत्युग्रं तपः आचरितवते तुभ्यं त्वदितरेणालभ्यं इमं मणिं अदाम्। अस्य मणेः प्रभावं च शृणु। यत्र कुत्रापि पावनस्थले असौ मणिः निक्षिप्तो भवेत् ततः तस्योत्थापनानन्तरं तन्निक्षिप्तस्थले अष्टभारतुलितस्वर्णं निक्षेप्ता अवाप्स्यति"। इति। तदाकर्ण्य राजा सत्राजित् देवं भानुं आमन्त्र्य परमानन्दभरितः तं मणिं स्वकण्ठे धारयन् स्वनगरं प्रत्यागत्य मन्त्रिभ्यः राज्यशासनं प्रतिगृह्य पूर्ववत् राज्यं कुर्वन्नास्त।

यदा भगवान् विष्णुः भूलोके यमुनातीरवर्तिन्यां मधुरानगर्यां वसुदेव-देवक्योः सुतवत् अवतीर्य कंसभयात् ततः गोकुले यशोदा-नन्दगोपगृहे पोषितः सर्वजनैः श्रीकृष्ण इत्याहूतः स्वशैशव-बाल्यकालयोः कंसप्रेषितान् पूतना-शकटासुर-तृणावर्त-वत्सासुर-बकासुर-अघासुर-धेनुकासुरादीन् बहून् राक्षसान् अवलीलया प्रमथ्य अक्रूरद्वारा कंसेनाहूतः मधुरामागम्य प्रखरान् कंससैनि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कान् कंसं च हत्वा मधुराराज्य-पालनं उग्रसेनहस्ते समर्प्य समुद्रतीरे स्वस्मै नूतनामेकां पुरीं निर्माय तस्याः द्वारका इति नाम च कृत्वा वैदर्भीं रुक्मिणीं च परिणीय रेवतीतिभार्यया सहितेन बलरामाख्येन स्वपूर्वजेन साकं देवकीवसुदेवाभ्यां सहितः तस्यां द्वारकायां पुर्यां निवसति स्म ।

तदा राजा सत्राजित् अतिमनोहारिण्यां नाक इव विराजमानायां तस्यां द्वारकापुर्यां राजवीथ्यां महासदनमेकं स्वभृत्यैः कारयित्वा उष्णातपकाले तत्र वासितुं ऐच्छत् । अथ कदाचिदेकदा निदाघे सः कण्ठालंकृतस्यमन्तकमणिना प्रकाशमानः स्वसदने निवासं कर्तुमिच्छन् द्वारकापुरीराजवीथ्यां आगच्छन्नास्त । दूरत एव तं राजानं दृष्ट्वा सर्वे द्वारकावासिनः जनाः सूर्यदेवं तं अमन्यन्त । तेषां मध्ये केचन कृष्णभक्ताः कृष्णसमीपमेत्य तं "गोपाल, गोविन्द, यदुनन्दन, रामानुज, दामोदर, यशोदातनय, देवकीपुत्र, रुक्मिणीपते, वासुदेव, नन्दकुमार, अरविन्दलोचन, नीलमेघश्यामलवर्ण, जगत्पते" इति स्तुत्वा "तत्रभवन्तं द्रष्टुं सूर्यदेवः अत्र आगच्छति" इति श्रीकृष्णं अवोचन् । तेषां वचनमाकर्ण्य श्रीकृष्णः तानेवमाह "अयि भो वयस्या ; नायं देवस्सूर्यः, अयं तु सत्राजिन्नामा क्षत्रियो राजा स्वगृहं प्रति गच्छति । अत्र न आगमिष्यति । तस्य कण्ठस्थः मणिः वः सूर्यभ्रान्ति उत्पादयति" इति । अथ स राजा कृष्णोक्तप्रकारं स्वभवनमेवागात् ।

उत्कृष्टोयं मणिः भगवते भवतु इति मन्यमानैः कृष्णवयस्यैः भक्तैः स मणिर्याचितः । राजा तान् प्रकुप्य न दत्तवान् । "तृणादपि कृशः तूलः, तूलादपि च याचकः" इति लोकरीत्या याचकानां कृष्णभक्तानां आदरः नासीत् । तान् भर्त्सयित्वा राजा विसर्जयामास । अथ कदाचित् राजा सत्राजित् तं मणिं स्वकण्ठात् अवमुच्य अधः निक्षिप्य विशेषकार्यगौरवात् क्षणमिव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र कुत्रापि अगच्छत्। तादृशं अवकाशं प्रतीक्षमाणः तस्यानुजः प्रसेनो नाम सत्राजितः गमनानुपदं झटिति तं मणिं स्वकण्ठे धृत्वा कंचनाश्वमारुह्य मृगयायै वनं जगाम। वने अश्वारूढमनुजकण्ठस्थं तादृशं अतिजाज्वल्यमानं तं मणिं वीक्ष्य सिंहः कश्चित् तदुपरि निपत्य अश्वं नरं च हत्वा तं मणिं स्वमुखे धृत्वा पलायते स्म। दूरत एव तं मणिं आस्ये धरन्तं सिंहं अवलोक्य भल्लूकः कश्चित् सिंहसमीपमेत्य सिंहेन सह युद्धं कृत्वा तं हत्वा मणिं गृहीत्वा पर्वतमध्ये स्वगुहां प्रविश्य स्वशिशोः तं मणिं क्रीडनकं चकार।

राजा सत्राजित्तु यदा मणिं स्मृत्वा पुनरेत्य मणिनिक्षेपस्थलं पश्यति तदा तत्र अष्टभारतुलितस्वर्णमेवालभत मणिं तु नालभत। चिन्ताकुलः राजा तत्रत्यान्स्वसेवकान् "मणिः कुत्र?" इत्यपृच्छत्। "राजन्, भवतः अनुजः प्रसेनः तं मणिं स्वकण्ठे धृत्वा अश्वारूढः मृगयार्थं वनं जगाम" इति ते सेवकाः प्रत्यब्रुवन्। तदाकर्ण्य राजा स्वानुजप्रत्यागमनमपेक्षमाणः आसीत्। इत्थं द्वित्राणि दिनानि गतानि। वने विचित्य विचित्य स्वानुजं मणिं च नष्टौ ज्ञात्वा स राजा सुतरां खिन्नः आसीत्। वनादागतो राजा "भो द्वारकावासिनः, पश्यत कृष्णकृतं अन्याय्यं, कृष्णेन ममानुजः मारितः, मणिश्च चोरितः" इति समीपगृहवर्तिनः जनान् अकथयत्। द्वारकावासिनो बहवो जनाः कृष्णपक्षपातिन इदं न अंगीचक्रुः, किंकर्तव्यतामूढहृदया अभवन् च। कथं कथमपि कर्णाकर्णिकया शनैश्शनैः राजवचनं सर्वैः जनैः अपि ज्ञातमासीत्। त्रयः चत्वारो जनाः यत्र कुत्रापि मिलित्वा इदमेव अब्रुवन्। केचन जनाः अयि भो वयस्याः राजवचनं तथ्यं भवेद्वा? इति कांश्चन जनानपृच्छन्। तं प्रति केचन प्रत्यब्रुवन् "मित्रमणयः, कृष्णः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बाल्ये गोकुले नवनीतचोरः, स्त्रीणां वस्त्रापहर्ता इति शृणुमो ननु? तस्मात् राजमणिहर्ता भवेद्वा? इति सन्देहस्संजायते, किन्तु कृष्णः इदानीं ऋजुः। को जानाति कृष्णस्य माहात्म्यं"? इति। अन्ये केचित् अवदन् च "को जानाति बाल्याभ्यासः देहावसानपर्यन्तं नरं न जहाति। तमिल भाषायां "तोट्टिल् पलक्कं चुडुकाडु मट्टुम्" इति विद्यते। तस्मात् कारणात् बाल्यचौर्यवृत्तिः अद्यापि कृष्णं अनुवर्तते वा?" इति। अपरः कश्चिदाह "अयि भो महाशयाः श्रीकृष्णः अत्रायाति" इति। कृष्णमवलोक्य जनाः सर्वेपि तूष्णीं आसन्। तानवलोक्य कृष्णः "अयि भोः प्रियवयस्याः, किमर्थं मां दृष्ट्वा भवन्तः वार्तालापं संत्यज्य तूष्णीं भवन्ति? इत्यपृच्छत्। ते प्रत्यवदन्– "हे कृष्ण, त्वमेव सत्राजिदनुजं रहसि हत्वा स्यमन्तकमणिं अपाहर इति लोकापवादः समजनि। वयं किं कुर्मः? तदधिकृत्य वयं भाषमाणाः स्म" इति। "तथा वा त्रिषयः। आस्ताम् तावत्। तादृशापवादोपि अस्माभिः परिहर्तव्यः। भो वयस्याः, भयेन अलम्। प्रसेनः केन मार्गेण गतवान् तेनैव मार्गेण अस्माभिरपि गन्तव्यम्। आगच्छत गमिष्यामः इति। इत्युक्तः श्रीकृष्णः प्रसेनपदवीं अश्वखुरपादांकितमार्गेण वयस्यैस्सह विचिन्वानः वनं गच्छन्नास्त। ततः अश्वखुरपदन्यासांकितः मार्ग तिरोहितोऽभूत्। तत परं सिंहपदविन्यासः अदृश्यत। तेनैव मार्गेण सर्वे यादवाः कृष्णेन सह गच्छन्त आसन्। अथ सोपि तिरोहितो बभूव। अनन्तरं भल्लूकपदांकितः मार्गः कथं कथमपि सर्वैः ज्ञात आसीत्। तेन पथा सर्वे वने बहुदूरं अगच्छन्। ऋक्षपदांकितचिन्हन्तु कस्यचित् गिरेः अधस्तात् समाप्तं आसीत्। तत परं किमपि कर्तुमशक्नुवन्तः सर्वेपि क्षणं तूष्णीं आसन्। अथ कृष्णः "भो सखायः, पश्यध्वम् इमां गिरिमध्ये दृश्यमानां अल्परन्ध्रयुतां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुहाम्, अहमेकाकी तत्र गत्वा गुहां प्रविश्य विचिनोमि तावत् यूयं अत्रैव तिष्ठन्तु" इत्युक्त्वा तत् बिलं गत्वा गुहां प्राविशत्। कृष्णागमनं प्रतीक्षमाणाः जनाः द्वादशदिनपर्यन्तं तत्रैवातिष्ठन्। कृष्णं अनागतं वीक्ष्य सुतरां खिन्नाः क्षुत्पिपासाभ्यां पीडिताः अन्ये कथं कथमपि द्वारकां प्रत्यागमन्।

कृष्णः यदा बिलं प्राविशत् तदा बिलान्तः महती विशाला प्रकाशमाना च गुहा अदृश्यत। गुहान्तः कस्यचित् भल्लूकशिशोः समीपे स्यमन्तकमणिः अवर्तत। ऋक्षशिशुस्तु तं मणिं क्रीडनकं कृत्वा इतस्ततः क्षिप्त्वा क्रीडन्नास्त। तत् पश्यन्तं गुहान्तरागतं अपूर्वरूपिणं नरं कृष्णं विलोक्य भयात् भल्लूकधात्री (नर्स्) उच्चैः आक्रोशत्। तादृशशब्दं श्रुत्वा ऋक्षराजो जांबवान् झटिति तत्स्थलं आगत्य श्रीकृष्णस्य हस्तद्वयं संगृह्य भल्लयुद्धं चकार। तस्मिन् युद्धे को विजेता भवेदिति निर्णेतुं अशक्नुवन्तः देवाश्च तादृशदृश्यं पश्यन्त आसन्।

द्वारकायां तु जनास्सर्वे वसुदेवबलरामदेवकीरुक्मिणी - सहिताः कृष्णगतिं अजानन्तः सत्राजितमेव निन्दन्तः कृष्णवियोगदुःखं असहमानाः अभवन्।

अत्र गुहायां तु कृष्णभल्लूकयुद्धं अष्टाविंशति - दिनपर्यन्तं अवर्तत। अन्ततः निष्पिष्टांगः अतीव पीडितः ऋक्षराजः स्वापजयं शक्तिहीनतां च कृष्णाय निवेद्य कृष्णं महापुरुषं सनातनं विष्णुं मत्वा "को भवान् किमर्थं अत्रागतवा"नित्यपृच्छत्।

कृष्णस्तु स्वागमनकारणं उक्त्वा मणिमयाचत। जांबवास्तु प्रभो, पुराणपुण्यपुरुष, जगद्रक्षक, मणिस्तु मया महता कृच्छ्रेण संपादितः, समयं विना तुभ्यं दातुं न प्रभवामीत्यवदत्। तदाकर्ण्य कृष्णः "को वा समयः?" इत्यपृच्छत्। यदि मम कन्यां जांबवतीं परिणेष्यसि तर्हि कन्यकाभूषणरूपेण तुभ्यं दास्यामि। "अयमेव समयः" इति प्रत्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वदत् । कृष्णः ओमित्युक्त्वा शुभे मुहूर्ते बहुभिः भूषणैः भूषितां स्यमन्तकमणिना च कण्ठे अलंकृतां ऋक्षराजतनयां जांबवतीं परिणीय ऋक्षबन्धुपरिबारसहितः गुहायाः बहिः आगत्य वनमृगवाद्यघोषवैभवयुक्तः द्वारकां प्रति आगच्छन् आस्त । तादृशकोलाहलध्वनिं शृण्वन्तः द्वारकावासिनस्सर्वेपि आश्चर्यचकिताः किमेतत्? इति पश्यन्तः ऋक्षपरिवारस्य मध्ये कृष्णं वीक्ष्य, कृष्णहस्तगृहीतां ऋक्षसुतां च तस्याः कण्ठे स्यमन्तकमणिं च विलोक्य, परमानन्दपूर्णाः श्रीकृष्णस्य स्वागतनिवेदनं कुर्वन्तः स्वस्तिवाचनमन्त्राणि च उच्चरन्तः ऋक्षैः परिवृतं कृष्णं प्रदक्षिणीकृत्य नूतनजामातरं भगवन्तं प्रणम्य धूप-दीप-गन्ध-पुष्पादिभिः उपचारैर्युतां पूजां अकुर्वन् । इत्थं महावैभवयुतः कृष्णः स्वसदनं प्रविवेश । महति सदसि सत्राजितं आहूय सर्वं वृत्तान्तं उक्त्वा तस्मै स्वनूतनभार्यायाः जांबवत्याः कण्ठादवमुच्य तं मणिं अदात् । राजा सत्राजित्तु अवनतशिराः कृष्णात् तं स्यमन्तकमणिं प्रतिगृह्य स्वसदनमगात् । ततःपरं जनास्सर्वेपि कृष्णप्रभावं जानन्नपि राजा मणिं नोज्जहार । मूर्खः स्वार्थपरः नीचः इति राजानं सत्राजितं निन्दन्ति स्म ।

निन्दां असहमानो राजा स्वमन्त्रिणः अपृच्छत्– "भो भो मन्त्रिमहाशयाः, अत्रत्याः जनास्सर्वेपि सदा मां निन्दन्ति, किं कुर्याम्" इति । निन्दाया दूरीकरणाय मणिप्रदानमेव कार्यम्, किन्तु श्रीकृष्णः मणिं न ग्रहीष्यति, तस्मात् त्वं जांबवानिव तव सुतां सत्यभामां कृष्णाय दत्वा तस्याः कण्ठे स्यमन्तमणिं च भूषय । यदा भवान् कृष्णस्य श्वशुरः भविष्यसि, तदैव जनाः भवन्तं कृष्णश्वशुरं मत्वा निन्दां त्यजेयु इति मन्त्रिणः राजानं ऊचुः । तच्छ्रुत्वा राजा सत्राजित् कृष्णसमीपं आगत्य ममापराधं सोढ्वा मम सुतां रूपशीलगुणाश्रयां भामां नाम्नीं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिणीय मम जामाता भवितुं अर्हसि इति प्रार्थये इति व्यजिज्ञपत् । तदाकर्ण्य श्रीकृष्णः भामां च परिणिनाय । किन्तु विवाहावसाने भामायाः कण्ठात् तं मणिं स्यमन्तकनामानं अवमुच्य संबन्धिश्वशुरप्रतिसंभावनया तस्मै सत्राजिते प्रत्यार्पयत् । इदं श्यमन्तकोपाख्यानं भामापरिणयः च पश्चात् सत्यभामया नरकासुरसंहारार्थमेव इति ज्ञायते । नरकासुरश्च स्वमरणकाले सत्यभामासहितं कृष्णं इत्थं संप्रार्थितवान् । "ममान्तिमकालं पुण्यकालं मत्वा सर्वे जनाः स्वबन्धुपरिवारसहिताः तैलस्नानं कुर्युः, गंगास्नानफलं च आप्नुयुः, पंचभक्ष्यपरमान्नं भगवते निवेद्य तद्भुक्त्वा उत्साहयुताः महोत्सवं मन्यमानाः आबालवृद्धं तोषं आप्नुयुः" इति ।

अस्य स्यमन्कोपाख्यानस्य श्रवणेन श्रोतृणां अपवादादिपापनिरसनं ऐहिकामुष्मिककफलं च भवेत् ।

एकोत्तरम्

वल्मीकजातस्य मुनेस्तु चित्र -
प्रसादिकाऽकर्दमवाहिनी का ?
कुहूनिशा केन सदा वृता च ?
ह्येकोत्तरं त्वं वद पण्डिताग्रणीः ॥

(तमसा)

रचयिता विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्तूरुनगरस्थ संस्कृतभाषाप्रचारिणीसभाया:
रजतमहोत्सवये पठिता
अभिनन्दनपत्रिका

रचयिता– श्री भ. न. रामस्वामिशास्त्री, गोविचेट्टिपालयम्.

गैर्वाणि मात: सकलार्तिहन्त्रि नादात्मिके विष्णुशिवादिरूपे ।
ज्ञानक्रियेच्छाभिधशक्तिरूपे त्वत्पादनम्रान् सुखिनो विधेहि ।।
त्वां देवभाषेति, मृतेति मन्दा नाध्येतुमिच्छन्त्यथ च द्विषन्ति ।
सर्वान्स्वपुत्रान्स्ववशे विधाय त्वत्पादनम्रान्सुखिनो विधेहि ।।
गीर्वाणभाषाप्रसराय बद्धश्रद्धा सभेयं जयताच्चिराय ।
नक्तन्दिवं या चतुरै: समूढा प्रधानमन्त्रिप्रमुखैर्महद्भि: ।।

"श्रेयांसि बहुविघ्नानी"त्येतद्गाथानुसारत: ।
तदा तदान्तरायेऽपि वृद्धिमेष्यति सा ध्रुवम् ।।
सुमनोभिस्सहृदयैरादृता शुभदाननु ।
न हि कल्याणकृत्काचिद्दुर्गतिं प्राप्स्यति ध्रुवम् ।।
गैर्वाणी सरसा सदा विबुधवाक्पीयूषनिष्यन्दिनी
शास्त्राख्यानकथायुता निजपरप्रान्तीयवृत्तान्तदा ।
कृत्याकृत्यविवेकदा श्रुतिपथे, मार्गे तथा लौकिके,
सर्वस्येष्टफलप्रदा विजयतां देशे विदेशे तथा ।।

समेधतां संस्कृतवाक्प्रचारिणी सभा स्वया पत्रिकया युता सदा ।
वितन्वती शासनकर्तृपक्षगान् स्वकान्, सदा सार्वजनीनवर्त्मगान् ।।

श्रीवेङ्कटेशकृपया पुण्यभूमिरियं सदा ।
वेदशास्त्रप्रवीणाढ्या भूयाद्राजन्वती तथा ।।
जयतु जयतु देशो भारत: सज्जनाढ्य:
जयतु जयतु भूय: सत्पथे बद्धचित्त: ।
जयतु जयतु देश: शत्रुबाधाविहीन:
जयतु जयतु दिव्याभारती सर्वपूज्या ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमादीच - उत्तरायणपरीक्षाणां सन्नाहकार्यक्रमः

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु (आं. प्र.)

Programme for Samskrita Examination, March 1974

विना बिलम्बशुल्कं आवेदनपत्राणां प्रेषणायान्तिमावधिः	१ रू. बिलम्बशुल्केन सह आवेदनपत्र-प्रेषणाय अन्तिमावधिः	परीक्षाणां प्रचलनसमयः 1974 मार्च मासे
20—1—74	31—1—74	कोविदः 9, 10, 11 तिथिषु, विचक्षणसमर्थौ 9, 10 तिथ्योः, परिचयाभिज्ञे 9 तिथौ

संस्कृतभाषाप्रचारिणी सभा,
चित्तूरु. (आं. प्र.)
10—12—73.

की. श्रीनिवासाचार्यः,
परीक्षामन्त्री.

सूचनाः

१. प्रेषितं परीक्षाशुल्कं कथंचिदपि न प्रत्यर्प्येत न परिवर्त्येत, न वा स्थाप्येत । अतः आलोच्य आवेदनपत्रं परिपूर्य प्रेषणीयं ।

२. न्यूनतया प्रेषितं शुल्कं न कार्यकरि भवेत् । अतः यावदावश्यकं आलोच्य एकदैव प्रेषणीयं ।

३. न्यूनशुल्कं आवेदनपत्रं तच्छुल्केन सह व्यर्थं भवेत् । अतः शुल्कस्य आवेदनपत्राणां च अत्यंतसंगतिरावश्यकी ।

४. लेखे आवेदकानां नामानि, तच्छुल्कस्य प्रत्येकविवरणं चावश्यकानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५. विशेषानुमति (Examption) कृते एकमासात्पूर्वमेव ५-०० रूप्यकाणि, पृथक् योजनीयानि तत्तदावश्यकयोग्यतापत्रादश्च प्रेषयित्वा अनुमतिर्गृहीतव्या ।

६. एकस्मिन्नगरे बहूनि केन्द्राणि नांगीक्रियेरन्, नैकमपि पञ्चन्यूनाभ्यर्थिसत्वे, न वा समीपस्थेऽन्यकेन्द्रे ।

७. केन्द्रस्थापनविषये न केवलं विद्यार्थिनां संख्या प्रधानं, अपि तु दुराचाराणां असंभवोपि परिशील्येत परीक्षामन्त्रिणा ।

संस्कृतभाषाप्रचारिण्यास्सभायाः

स्थायिकेन्द्राणि

आन्ध्रप्रदेशे –

(१) अनन्तपुरम् (२) अनकापल्ली (३) आल्लगड्डु (४) कडप (५) काकिनाड (६) गुंटूरु (७) चित्तूरु (८) तिरुपति (९) दोम्मरनन्द्याला (१०) पेद्दापुरम् (११) भीमवरम् (१२) मछलीपट्टणम् (१३) मंत्रालय (१४) राजमंड्री (१५) विजयवाडा (१६) विजयनगरम् (१७) हिंदूपूरु (१८) हैदराबाद ।

द्राविडप्रदेशे –

(१) अंबत्तूरु (मद्रास्) (२) कोंपेट (मद्रास् - ४४) (३) कोयंबत्तूरु - ए (४) कोयंबत्तूरु - बी (५) तंजावूरु (६) तिरुचिरापल्लि (७) तिरुवेण्गाडु (८) तिरुनेल्वेलि (९) त्यागरायनगर (१०) मदुरै - ए (११) मदुरै - बी (१२) मन्नार्गुडि (१३) मेट्टूरुडाम् (१४) श्रीरंगम् (तिरुच्चि) (१५) सेलम् ।

कर्णाटकप्रदेशे –

(१) बेंगलूरु (२) शाहपूर ।

उत्तरप्रदेशे –

न्यूडेल्ही ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गान्धीकथा

(विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्).

दक्षिण - आफ्रिका - भूखण्डे गान्धीमहोदयः महावाक्कील आसीत् । तस्य साहाय्यदानार्थं नैके लिपिकाराः कर्मचारिणश्चासन् । तेषु केचन गुर्जरदेशीयाः केचन द्राविडा एवम् ।

तत्र गान्धीवासभवनं पाश्चात्यपद्धत्या सज्जीकृतमासीत् । अतएव स्नातजलादीनां प्रवादसौकर्यार्थं नलिकादयो नासन् । मुखमार्जनादिसमये भाजनमेकं पुरतोऽवस्थाप्य तस्मिन्नेव गण्डूषजलादीनां ष्ठीवनादिकं जनाः कुर्वन्ते स्म । प्रतिप्रकोष्ठे न्यवस्थैतादृशी कृताऽऽसीत् । कर्मचारिणः समेऽपि निजकोष्ठेषु स्थितानां पात्राणां मार्जनायोपयुञ्जन्ते स्म ।

एतन्मध्ये एकः नवीनः गान्धीमहाशयस्य निकटे उद्यमं जगाह । जन्मनान्त्यजः मतपरिवर्तनेन क्रिश्चियन् आसीत् सः । तत् प्रकोष्ठेऽस्थितस्य पात्रवर्गस्योच्छिष्टस्य मार्जनादिकं कर्तुं प्रथमतः निजां भार्यां कस्तूरबामवदत् गान्धीमहाशयः । यद्यपि सः स्वयमेव प्रथमतः मार्गं दर्शयितुं सिद्धोऽभवत् तथापि सहधर्मिणी आत्मनः कर्तव्यं प्रति श्रद्धायुता मध्ये हस्तं क्षिपति स्म । अतएव महात्मा पत्न्यै कार्यमेतत् संवाहयामास ।

जन्मतः भारतीया, विशेषतः वैष्णवधर्मासक्ता 'कस्तूरबा' कथं चैकस्य पञ्चमस्य पात्रं मार्जयेत् । स्वतएव विरुरुधे विरोधः द्वयोः कलहस्थानमाप । येन केनापि मार्गेण पतिदेवः यदा निजां आज्ञां प्रतिग्रहीतुं सिद्धो नाभवत् सा "भवतो भवने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवानेव भवतु, नात्राहं वस्तुं शक्नोमि इत्यन्तिमशरं चिक्षेप पत्युरुपरि। तेन क्रुद्धः पतिदेवः तस्या हस्तौ गृहीत्वा कर्षन् गृहद्वारं यावद्गत्वा "गच्छ, इदानीमेव गच्छ, मद्गृहे अहमेव भवामि" इत्यादिदेश।

तत्रैव स्थित्वा 'बा' स्वामिनं प्रति "किं न लज्जसे? अत्र तु विदेशे मम मातापितरौ न स्तः, न वा बन्धुवर्गः। कुत्र वा गच्छेयम्। मदर्थे सर्वमपि भवानेक एव। पाणिग्रहणदोषात् पतिपदवीमलङ्कुर्वता भवताऽनुक्षणं ताडनमवहेलनं च अनुभवितव्ये किमु? कृपया तूष्णीं भवतु। यदि कोपि पश्यति किं वा ब्रूयात्"? इति निजां दशामात्मनो वर्णयामास। तेन द्रवितः तां पुनः हस्ते स्वयमेव गृहीत्वा गृहाभ्यन्तरं प्रेषयामास आत्मनोऽपराधं स्वयमेव ज्ञात्वा।

माघीयं सर्वशास्त्रपाण्डित्यम्

लेखकः श्री ना. व. निगमान्तः, प्रोद्दूटूरु.

सारस्वतलोके असंख्येषु सत्स्वपि प्रबन्धेषु काव्यपञ्चकमेव सहृदयहृदयानन्दि महाकाव्यपदवी मधिरोहतीतीदं सर्वविदितमेव। तादृशे काव्यपंचके अन्यतमं शिशुपालवधम्। एतद्रचयिता कविसम्राट् श्रीमाघः। माघः बाल्ये एव सकलेष्वपि शास्त्रेषु अतिनिष्णातो विरेजे। अस्मिन् सरस्वत्याः कटाक्षः समग्रो न्यपतत्। कुशाग्रधिषणे एतस्मिन् सर्वशास्त्रीयं कूलङ्कषं ज्ञानं, अनन्यसदृशी कविताशक्तिः, महत्वपूर्णप्रबन्धरचना, इतीयं काव्यनिर्माणसामग्री समग्रा व्यराजिष्ट। एतत्कर्तृका अनेके ग्रन्थाः सन्तीति श्रूयते। शिशुपालवधं हि एतन्निर्मितं अत्युत्तमं काव्यरत्नम्। अत्र भगवता श्रीकृष्णेन कृतः शिशुपालवधः प्रधानतया अभिवर्ण्यते। विंशतिसर्गात्मकस्य काव्यस्यास्य त्रयोदशे, चतुर्दशे च सर्गे यागस्य कृते इन्द्रप्रस्थं प्रति श्रीकृष्णप्रस्थानं, राजसूयाचरणं, यागान्ते भीष्मकृता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकृष्णस्तुतिः, धर्मकृता कृष्णपूजा इतीमे वृत्तान्ताः कविना अतिमधुरं संवर्ण्यन्ते ।

तत्र कविशार्दूलोयं अतिमनोहरैः गूढभावैः पद्यरत्नैः स्वकीयं सर्वशास्त्रपारङ्गतत्वं सम्यक् प्रकटयति । एतत् सर्वं सावधानं पठन्तः सहृदयाः कविवैदुष्यविलक्षाः मधुपानमुग्धमधुकरा इव एतत्काव्यरसं आस्वदेरन् इति निश्चप्रचं शक्यते वक्तुम् । स्थालीपुलाकन्यायेन कैश्चन पद्यैः एतदीयं सर्वशास्त्रकौशलं ईषत् प्रदर्श्यते ।

सहृदयहृदयमयूरनीलमेघोयं कविः प्रथमं इन्द्रप्रस्थप्रवेशसमये "पुरुष पुरं प्रविशति स्म पञ्चभिः सममिन्द्रियैरिव" इति पञ्चेन्द्रियसहितो जीवः शरीरात् शरीरान्तरमिव श्रीकृष्णः पञ्चभिः पाण्डवैः समं इन्द्रप्रस्थं प्रविवेश इति वर्णयति । एतेन "जीवोहि देहात् देहान्तरं पूर्वेन्द्रियैः सह प्रविशति" इतीदं वेदान्तिमतं कविना अनुसृतं इति ज्ञायते । एवं "तज्जुषस्व जुहवानि चाचले" "योगमार्गपतितेन चेतसा" "यं विशन्ति वशिनं मुमुक्षवः" "सत्यवृत्तमपि मायिनं जगद्वृद्धमप्युचितनिद्रमर्थकम्" इत्यादिभिः श्लोकवाक्यैरपि सर्वफलभोक्ता सर्वेश्वरः, स एव मोक्षदायकः लोकवृद्धः जन्महीनः सत्यस्वरूपः सर्वान्तर्यामी च इति वर्णयन् कविरयं वेदान्ते परिनिष्ठितां स्वप्रतिभां साधु प्रकटयति । अन्यत्र यागवर्णनावसरे "बद्धदर्भमयकाञ्चिदामया" मन्त्रप्रयोगपूर्वनिर्मितदर्भगुणं मध्येन धरन्त्या द्रौपद्यासह इति वर्णनात् "मौञ्जेन दाम्ना अन्यतरतः पाशेन योक्त्रेण च" इतीदं आपस्तंबीयं धर्मसूत्रं, "स्नातकं गुरुमभीष्टमृत्विजं" इत्यनया भीष्मोक्त्या पूजार्हबोधकं धर्मशास्त्रं च स्मारिते इति एतदेव एतदीयधर्मशास्त्रपाण्डित्यस्य दृढं निदर्शनम् । एवं तत्रैव "अनेकसंस्कृतप्राकृतैरकृतपात्रसङ्करैः भावशुद्धिसहितैः नाटकैरिव रसं बभार जनः" विभावानुभावसात्विक व्यभिचारिसामग्रीसमुल्लासितः सजातीयविजातीयातिरस्कृतमूर्तिमान् स्थायीभावो रसः, स च नाटकैरुत्पाद्यते सामाजिके इति वर्णयति अनेन कवेरस्य अलङ्कारशास्त्रे स्थितः स्थूलपरिचयः सुष्ठु सूच्यते । अपरत्र कृष्णस्तुतिप्रकरणे "केवलं दधति कर्तृवाचिनः प्रत्ययानिह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातु कर्मणि" धातवः सृज्संहृशास्त्रयः श्रीकृष्णविषये कर्तृवाचिन एव भवन्ति, न तु कर्मवाचकाः तेनैव मूर्तित्रयधारणद्वारा सृष्टि-स्थितिसंहारकारणात् तस्यैव सर्वकर्तृत्वात् इति वर्णनेन "आख्यात-तवाचकः कर्ता" इत्ययं वैयाकरणरसमयः अनुसृत इति कविगतं व्याकरणशास्त्रज्ञानं अकुण्ठितं ज्ञायते ।

अपरत्र "नाञ्जसा निगदितुं विभक्तिभिः .... मन्त्रमूह-कुशलाः प्रयोगिण." ऊहकुशला पण्डिताः अन्यत्र वाक्येषु दृश्यमाना विभक्तीः ज्ञात्वा इतरत्रापि मन्त्रेषु उहया पदविभक्ति विपरिण-मितवन्तः यागे इति वर्णनात् लिङ्गज्ञानेन अनुमित्सतां नैयायिकानां मतं सूचितं भवति । "याज्यया यजनकर्मिणोऽत्यजन् द्रव्यजातमप-दिश्य देवताम्". इत्यनेन "देवतोद्देश्येन द्रव्यत्यागो यागः" इत्य-स्मिन् मीमांसासिद्धान्ते प्रविसारि कविनिष्ठं वैदग्ध्यं सम्यक् ज्ञाप्यते । तथा नगरप्रवेशवर्णनावसरे भीमार्जुनमध्यवर्तिनं रथारूढं श्रीकृष्णं एवं वर्णयति कविराजोयं – "दधतेव योगमुभयग्रहान्तर-स्थितिकारितं दुरुधराख्यमिन्दुना" इति । दुरुधरोनाम अर्कान्यग्रह-मध्ययोगः चन्द्रस्य इति ज्योतिश्शास्त्रे प्रसिद्धः । तदुक्तं "हित्वार्कं सुनफा अनफा दुरुधराः स्वान्त्योभयस्थैः ग्रहैः । शीतांशोः कथितः अन्यथातु बहुभिः केमद्रुमो अन्यैस्त्वसौ ।।" इति । एवं च अर्कान्य-ग्रहमध्यवर्ती चन्द्र इव भीमार्जुनमध्यगतो कृष्णो रराज इति भावः । एवं श्रीकृष्णं उपमितुं ज्योतिश्शास्त्रपारंगत एव शक्नोति नत्वन्य इति ज्योतिश्शास्त्रेपि कवेरस्ति महान् परिचय इति अवगम्यते । एवं "वर्षुकस्य किमपः" "दधिरे पृथक्करिण एव दूरतः" इत्या-दिभिः श्लोकैः कृषिशास्त्र, गजशास्त्रादिषु स्थितं निरङ्कुशं कवि-कौशलं साधु आवेद्यते । किं बहुना ? शिशुपालवधगतानां नवरस-भरितानां मनोहराणां तत्र तत्र स्थितानां पद्यरत्नानां परिशीलनेन समस्तशास्त्रनिचयसागरचुलकीकरणागस्त्येषु भुवि अतिविरलेषु केषुचन कविसार्वभौमेषु अन्यतमः अपूर्वजन्मा अयं घण्टापद-लाञ्छनो माघः इति निस्सन्दिग्धं निश्चेतुं शक्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

शंकरः – "अम्ब! अहं भवदीयं गृहमागतोऽस्मि वाद-भिक्षार्थं। कर्मैव मुक्तिदायकमिति विश्वसता त्वद्भर्त्रा सह वाद-मभिलष्य आगतोऽस्मि। मुमुक्षूणां कर्म-सन्यासपूर्वकं ज्ञान-मार्ग एव आस्थेय इति निरूपयितुं आगतोऽस्मि"– इत्याह।

एतद्वचनं श्रुत्वा मण्डनमिश्रः– "कर्मनिष्ठो मदीयो विश्वासः न केवलं भवता, अपितु ब्रह्मसूत्रकृता वेदव्यासेनाऽपि न परिवर्तयितुं शक्यते" इति प्रत्याह।

शंकरः –व्यासमहर्षेः ब्रह्मसूत्राणि भवान् न सम्यगवगच्छति। कर्ममार्गमेव अवलम्ब्य अतीव लम्बसे। कर्मजन्यं स्वर्गादिसुखजातं न शाश्वतम्। यावन् पुण्यसंचयः तावदेव स्वर्गसौख्यं, क्षीणे पुण्ये मर्त्यलोकं विशन्ति। जन्मराहित्येन मोक्षस्साधनीयश्चेत् ज्ञानमेव शरण्यमिति त्वया सह वादपद्धत्या विचार्य सिद्धान्तयितुं, वादजिता नङ्गीकारयितुं च मन्मतमागतोऽस्मी" त्याह।

मण्डनमिश्रः – न केवलं त्वं, अपितु सहस्रफणामणिमण्डल-मण्डितः आदिशेषोऽपि वादे मां निर्जित्य मन्मतं न परावर्तयेत्"– इति प्रयाह।

शंकरः– "यद्यहं पराजितः तर्हि सन्यासं किहाय कांचिदुद्वाह्य तव शिष्यो भूत्वा कर्ममार्गमनुसरेयम्" – इति शपथमकरोत्।

मण्डनमिश्रः – "यद्यहं जितोऽस्मि, तर्हि संसारं कर्ममार्गं च विहाय, सन्यासं स्वीकृत्य, भवतः शिष्यो भूत्वा ज्ञानमार्गमनु-सरामि" इति प्रतिजज्ञे।

उभयभारती – "श्राद्धकालोऽयं; वाग्वादमुज्झित्य कार्या-चरणे सांप्रतं प्रवर्तध्वम्। श्वः परश्वो वा वादः प्रारब्धुं उचितः" इति वाग्वादान् निवर्तयामास।

१२. उभयभारती

परेद्युः वादप्रारंभसमये "आवयोः मध्यवर्ती को नु भवि-ष्यति?" इति शङ्करं पप्रच्छ मण्डनमिश्रः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शंकरः – "मध्यवर्तिनः यस्य कस्याप्यावश्यकता किमर्था ? विदुषीमणिः भवतः धर्मपत्नी आवयोः मध्यवर्तित्वं निर्वक्ष्यति। माध्यस्थ्याय सैव वरणीये" त्याह।

उभयभारती द्वे पुष्पमाले आनाय्य ताभ्यां धारयित्वा "सत्यान्वेषणमेव ध्येयं भवतु; कोपतापयोरवकाशो माऽभूत्। यावत् युवयोः वादः न पर्यवस्यति तावत् मया अत्रैव युवयोः समक्षं स्थातुं न शक्यते। मम अन्तर्गृहे कृत्यानि निर्वर्तनीयानि सन्ति। यावदहं पुन प्रत्येष्यामि भवत्सन्निधिं तावत् जितस्य पुष्पमाला म्लाना भविष्यति। तदेव निदर्शनं जयापजयोः" इत्युक्त्वा साऽन्तर्गृहं गता।

यावत्सा पुन प्रत्यागता तावत् मण्डनमिश्रस्य माला म्लानाऽदृश्यत। सः पत्नीं प्राह – "वादेऽहं जितोऽस्मि; तथापि मे महान् सन्तोष एव जायते; यतोऽयं शङ्करयतिः सन्मतं खण्डयतीत्येव न; अपितु परब्रह्मणः स्वरूपं निरूप्य मां उपनिषण्मार्ग मुपदिदेश। यथोक्तं यथाशपथं च अहं सन्यासाश्रमं स्वीकृत्य महात्मनोऽस्य शिष्यो भूत्वा अद्वैतमार्गावलम्बी भवामि यावदिति।

उभयभारती – (शंकरं प्रति) "यतिपुङ्गव ! अहमस्य मण्डनमिश्रमहोदयस्य अर्धाङ्गी। वादे यदि मामपि जेष्यसि तदैव ते सम्पूर्णविजयः सिद्ध इति मन्तव्यं भवती"त्याह।

शंकरः – (सहासं) "अम्ब ! नाऽहं जयापेक्षया वादकण्ड्त्या वाऽगतोऽस्मि। मण्डनमिश्राय सत्यमार्गं दर्शयितुमागतोऽस्मि। मदीयब्रह्मसूत्रभाष्यस्य टीकां रचयितुं अयमेव समर्थ इति अस्य गुरुः भट्टपादोऽकथयत्। तदादेशादेव अत्रागतोऽस्मि; मदीयं कर्तव्यं निर्वर्तितम्। स्त्रीभिर्वादः कर्तुं न ह्युचितः" इत्याह।

उभय– "अस्मदीयं मतं खण्डयितुमागतोऽसि यतः तत एव भर्तुः साहाय्यमवश्यं मे कर्तव्यमस्ति। वैदुष्ये, गुणिषु न च लिङ्गं न च वयः। वादे प्रतिभां प्रज्ञां च प्रदर्शय" इति प्रत्याह।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शंकरः गत्यन्तराभावात् वादाय प्रचक्रमे । सप्तदशदिनपर्यन्तं तयोरुभयोः उभयभारतीशंकरयोः वादः प्रवृत्तः । महाविदुषी तं यतिवरं शंकरं वादे जेतुं न प्राभवन् । अन्ततो गत्वा सा विजयप्राप्त्यै कंचि दुपायं आलोचितवती – "अयं किल बालसन्यासी; गृहस्थानां अनुभवप्राप्ता विषया नाऽस्य विदिताः । तादृशान् विषयान् पृष्ट्वाऽमुं पराभावयामि याव" दिति ।

एवं विचिन्त्य उभयभारती शंकरं प्रष्टुमारेभे । सर्वशास्त्रज्ञः शंकरः तस्याः प्रश्नानां सदुत्तराणि दातुं शक्नोति एव । परन्तु यदि सः तस्याः प्रश्नानां समाधानं प्रयच्छति तर्हि अनधिगतगृहस्थाश्रमगन्धस्य शंकरस्य एते रहस्यविषयाः कथं ज्ञाताः ? अयं कपटसन्यासीति परिहसितुं प्रवर्तेत । ततश्च लोकापवादः अनिवार्यो भविष्यति । यदि उत्तराणि न प्रयच्छति तर्हि जितोऽसीति परिहसेत् । एवमुभयतस्पाशा रज्जुः । शंकरः एवमालोच्य– "अम्ब ! मासावधिः समयो देयः, पुनः प्रत्यागत्य भवत्याः प्रश्नानां समाधानं दास्यामि"– इत्याह । साऽपि तथाऽस्तु इति अङ्गीचकार ।

१३. परकायप्रवेशः

शंकरः पद्मपादादिशिष्यैस्सह माहिष्मतीपुरं विहाय अरण्यमार्गेण गच्छन्नास्त । तस्मिन्नरण्ये क्वचिदार्तनादः तैः श्रुतः । शंकरः तत्कारणं ज्ञात्वाऽयाहीति कंचित् शिष्यं प्रैषयत् । स च गतः पुनरागत्य "स्वामिन् ! अमरुको नाम राजा मृगयार्थं आगतः सर्पदष्टो मृतः । पारिवारिकाः जनाः तं परिवृत्य रुदन्ति" इत्याह ।

शंकरः शिष्यानेव मुवाच– "अहं परकायप्रवेशविद्याप्रभावेण तत्कलेबरं प्रविश्य कतिपयदिवसपर्यन्तं गृहस्थो भूत्वा पुनरायास्यामि । तावत्पर्यन्तं मदीयं शरीरं जागरूकैः भवद्भिः संरक्षणीयम्"– इत्युक्त्वा स अमरुकस्य देहमाविवेश ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजा निद्रातः प्रबुद्ध इव उत्थितः। महताऽनन्देन परिवृतेन परिवारजनेन सानन्दं पुरं प्रविवेश।

मृगयार्थं गतस्य, पुनस्ततो निवृत्तस्य च राज्ञः रूपे यद्यपि भेदो न दृश्यते; किन्तु प्रतिभाप्रवृत्त्यादौ तारतम्यं महद्दरीदृश्यते स्म। मेधाविभिः अमरुकस्य अमात्यवर्यैरिदं सुस्पष्टं विज्ञातम्। तेऽचिन्तयन् – "अस्माकं राजा मृगयार्थं गतो मृत इत्येतत्सत्यम्। यः कश्चिद्योगिपुङ्गवः परकायप्रवेशविद्यया अमरुकदेहमाविश्याऽऽगतः! यत्किञ्चिदस्तु, प्रज्ञासंपन्नं नवीनममरुकं वयं न त्यजामः। तस्य योगिनः पूर्वदेहं दग्ध्वा तमस्मिन्नेव शरीरे स्थिरं निवासमामास्तावत्" – इति विचिन्त्य मन्त्रिभिः निर्जीवदेहानां दहनाय भृत्याः प्रेषिताः।

शंकरशरीरं कस्यां चिद्गुहायां निक्षिप्य संरक्षन्तः तदीय शिष्याः "अस्मदाचार्यवर्यः कुतो नायातः एतावत्पर्यन्तं; बहूनि दिनानि व्यतीतानि खलु; इतःपरं प्रतीक्षणं अनर्थायैवे"ति पद्मपादादयः शशंकिरे। अन्ते ते अमरुकपुरं प्रविश्य राजानं ददृशुः।

पद्मपादः राजरूपिणं आचार्यं बोधयामास– "तत्त्वमसि तत्त्वमसि तत्त्वमसि राजन्" इति। परतत्त्वं त्वमेवासीति तदर्थः। शंकरः यमेवार्थं बोधयितुं लोके प्रवृत्तः स एवायं सिद्धान्तः। सूच्यार्थसूचनामनुसृत्य राजरूपी आचार्यः अरण्ये स्वागमनं प्रतीक्षमाणान् स्वदेहं पालयतः स्वशिष्यान् सस्मार। किन्तु तावदेव निर्जीवदेहान् अन्विष्यान्विष्य दग्धुं प्रवृत्तैः राजभटैः शंकरशरीरं शिष्येभ्यः अपकृष्य दग्धुं आरब्धम्। "अयमस्मदीयाचार्यः समाधिनिष्ठः; न मृतशरीरं; नैव दग्धुं योग्यमिति निवारयतो विलपतोऽपि तान् शिष्यान् दूरतोऽपसार्य महामात्यस्य आज्ञेति भीषयित्वा राजभटाः देहं चितामारोप्याऽदहन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sriman T. K. Tiruvenkatacharya passes away.

We regret very much to announce, the sudden demise of **Sriman T. K. Tiruvenkatacharya,** our printer and Pradhanamantri of Samskritha Bhasha Pracharini Sabha, at Chittoor on 14—12—73 at 10-30 A. M.

He was in sole charge of the printing of our journal from its inception. Alas! a great soul and a genuine, pain-staking and hard worker has left us leaving all in utter sorrow, gloom and despair. It is very difficult to choose another of his type to fill up the void.

Sriman Tiruvenkatacharya, is a perfect gentleman with ennobling qualities. He was born on 28—10—1908 and he was 65 years of age when he gave up his mortal coil. He passed the Vidyapraveena examination of the Andhra University in 1931 and passed the Vidwan examination of Madras University in 1938 with a first class. He passed the Hindi Pravesika examination in 1948 held by the Daskhina Bharata Hindi Prachara Sabha.

He was conferred the title of "Sahitya Ratna" by the Samskritha Karyalaya of Ayodhya. He underwent Pandit's training in 1950.

He was working as a Headmaster in Sri Venkateswara Advanced Sanskrit School, Vyasasramam at Yerpedu, Chittoor Dt. from 1933 to 1946. In 1946—47 he worked as a Telugu Pandit in B. Z. High School and then in Kannan's High School, at Chittoor and retired from there.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

He started the Samskrita Bhasha Pracharini Sabha, at Yerpedu originally, which was subsequently shifted to Chittoor, where it was registered as an institution in the year 1948. He is the chief architect of the Sabha, and he has been working in it as an important office bearer and subsequently as Pradhana Mantri for the past 25 years. He took an active part in the Silver Jubilee celebrations held in last October.

He was the printer of our journal from its very inception and he is mainly responsible for its popularity and wide circulation. The editorials and other articles written by him are very much appreciated by all the scholars and lovers of Sanskrit throughout India.

He is an author of books in Telugu and Sanskrit. He had translated Mukundamala in Telugu verse. He had also translated Patanjali's Yoga Sutra with the commentary of Sri Vyasa and also the Tamil Tiruppavai, and Santhana Deepika an astrological work. He is the author of Sanskrit readers 1, 2 and 4, published by our Sabha. Two other books of his are Kathavali and Gadyasangraha both in Sanskrit and published by our Sabha.

A condolence meeting was held at 5 P. M. on 15-12-73 at the Sabha premises. Number of gentlemen spoke on the occasion and paid glowing tributes to the departed soul.

May his soul rest in peace!

N. RAMANATHA AIYAR,
Publisher.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हा हन्त वज्रमापतितम्!

अस्मत्सभाप्रधानमन्त्री दिवं गतः

संस्कृतभाषाप्रचारिण्याः सभायाः प्रधानमन्त्री

श्रीमान् ति. कं. तिरुवेङ्कटाचार्यः

प्रमादीचसंवत्सरमार्गशिरबहुलपञ्चम्यां भृगुवासरे (14-12-73) प्रातः 10-30 घण्टासमये परमपदमगमदिति सनिर्वेदं निवेद्यते ।

अस्मत्सभाप्रधानस्थापकेषु प्रमुखस्य, दिवानिशं संस्कृतभाषाप्रचारैकबद्धकङ्कणस्य, अतीते अक्टोबरमासे अतिवैभवतया सभारजतोत्सवं निर्वर्तितवतः, ६५ वयस्कस्य हठान्मरणं संस्कृतभाषाप्रणयिनां सभासम्बन्धिनां, तथा तद्गुणगणाकृष्टचित्तानां सुहृद्गणानां च महत्खेदमजनयत् । संस्कृतसेवामूर्तेः सभयाऽद्वितीयतामापन्नस्य अभावेन यो लोपः सभायै प्राप्तः स न केनापि पूरयितुं शक्यः । भारतजननी एतादृशानि मृग्यानि रत्नानि कदाचिदेव प्रसूत इत्ययमंशः अनेन महात्मना सुनिरूपितः ।

"जातस्य मृत्युः ध्रुव" एव । तथाप्येतद्व्यक्तिविशेषविषये ध्रुवोऽपि मृत्युरन्याय्यमाचरदित्येव भाति । विधेरियं विचित्रा खलु रीतिः यल्लोकसेवापरानेतादृशान् झटिति हरतीति ।

अस्मिन् सन्दर्भे एतत्सभाकुलपतेः श्री ति. कं. तिरुवेङ्कटाचार्यस्य आत्मशान्तिः, तत्कुटुम्बस्थानां दुःखशान्तिश्च भूमास्तामिति जगदीशं प्रार्थयामहे ।

यन्. रामनाथय्यर्,
कार्यदर्शी.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 1845/60. Postal R. H. No. 493.
आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.
Licensed to Post without Prepayment. LICENCE No. 57.

भारतसर्वकारेण पुरस्कृता च

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

गैर्वाणी

वार्षिकम् ४-००

प्रहेलिका

नेत्रांतरक्तो न तु मद्यपोहम्
वर्णेन कृष्णः नयनांजनं न ।
परस्य धिष्ण्ये परिपालनं मे
मां ब्रूहि भोः पञ्चमरागरक्तम् ॥

(कोकिलः)

(विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्).

Published by Sri N. Ramanatha Aiyer B. A; B. L.. Advocate
& Secretary S, B. P. Sabha, Chittoor (A. P.)
Printed by Sri T. K. Thiruvengadacharya
at Vijaya Press, Chittoor (A. P.) C 1500

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूरध्वनिः – "संस्कृतम्"

वाणीं भजत गैर्वाणीम् !

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आं. प्र.) भारतम्.

संपुटः ११ | 15th NOVEMBER 1973 | क्रमांकः ११



प्रमादीच-कार्तिकांकः | शकाब्दाः १८९५ | मूल्यम् ०–४० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूचिका

१. रजतमहोत्सवः, संस्कृतभाषाप्रचारिणी सभा, चितूरु १
२. विजयतां कर्णाटकराज्यम् १०
३. गांधीकथा १२
४. श्री अप्पय्यदीक्षितेन्द्रजयन्ती १३
५. प्रमादीच - उत्तरायणपरीक्षाणां सन्नाहकार्यक्रमः १४
६. स्थायिकेन्द्राणि १५
७. श्री एम्. पि. दिग्वेकरस्य आगमनम् १६
८. मुकुन्दविलासः १७
९. सुभाषितानि १९
१०. आन्ध्रभाषायां अद्वैतग्रन्थः २०
११. प्रमादीच - दक्षिणायनपरीक्षाफलानि २१
१२. प्रमादीच - दक्षिणायनपरीक्षासु उपयुक्तानि केन्द्राणि २५
१३. परीक्षाफलसारिणी २६
१४. तज्जीवनं भारतभूमिगौरवम् २७
१५. जयतु गैर्वाणी २८
१६. Audit Report for '72 ३१
१७. Audit Report for '73 ३३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजतमहोत्सवः
संस्कृतभाषाप्रचारिणी सभा, चित्तूरु

(१२–१०–७३ तः १४–१०–७३ पर्यन्तम्)

१९४५ वर्षे संस्थापितयाः अत एव १९७० वर्षे एव रजतोत्सवयोग्यायाः अस्याः सभायाः रजतमहोत्सवः अक्टोबरमासे १२, १३, १४ तिथिषु त्रिषु दिनेषु महता वैभवेन संपन्न आसीत्।

भारते दूरदूरप्रदेशेभ्योपि अतिथयस्समागच्छन। जीवकारुण्यसंघे, बालाजीवसतिभवने, यात्रिभवने, कार्यदर्शिगृहे, प्रधानमन्त्रिगृहे, अन्यत्र च यथायोग्यं निवासभोजनादिव्यवस्था कल्पिता। विजयवाडा आकाशवाणी केन्द्रेण च समीक्षकत्वेन श्री तिरुमल रामचंद्रः प्रेषितः। दिशः प्रजानां मनांसि च प्रसन्नान्यासन्।

१२–१०–७३ दिने प्रातः ७-३० A. M. पण्डिताः, संस्कृताभिमानिनः, संस्कृतविद्यार्थिनः, अतिथयः, अन्ये च संस्कृतशुभाकांक्षिणः वेदघोषेण नगरयात्रामारभ्य ८-३० A. M. वेलायां प्राचीनसभाभवनस्य द्वारदेशं समुपागमन्। चित्तूरुमंडलदंडनायकः श्री ए. वल्लियप्पन्महोदयः श्री सि. वेंकटरमण अय्यरश्च सपूर्णकुंभं स्वागतेन सत्कृतौ सभान्त्रः प्राविशताम्। तत्र च शुक्लवितानालंकृतकायमाने महति आयोजितायां सभायां श्रीमति सि. वेंकटरमणार्ये आध्यक्ष्यं वहति सति श्री वल्लियप्पमहोदयः (चित्तूरु दंडनायकः) संस्कृतं तस्य प्रचारावश्यककतां, तत्र एतया सभया क्रियमाणानि कार्याणि च प्रशस्य एवमवोचत् – एतत्सभायाः कर्तव्यनिष्ठामभिनन्द्य तिरुमल तिरुपति देवस्थानेन पंचाशत्सहस्रं रूप्यकाणि अधुना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्तानि । तेन च अधुना रजतोत्सवशालायाः मूलशिला मया अर्प्यते । अपि चाहं अभिकांक्षे एकवत्सरांतर एव परिपूर्णस्य सभाभवनस्य उद्घाटनमपि कुर्यामिति । एवं वदता तेन चंद्रकान्तमूलशिलायाः यवनिका अपसारिता । सभ्याश्च चंदनतांबूलादिभिस्सत्कृताः सममोदन्त ।

अथ १० A. M. वेलायां जीवकारूण्यसंघभवने संस्कृतपुस्तकानां संस्कृतपत्राणां च प्रदर्शनं समुद्घाटितं चित्तूरुसर्वकारकलाशालाप्रांशुपालेन श्रीमता आर्. यस्. सुदर्शनमहोदयेन । स च स्वभाषणे ग्रन्थानां प्रभावं तत्रापि संस्कृतग्रन्थानां अधुनातनकाले संरक्षणीयतां परिशीलनीयतां च सुव्यक्तमवदत् ।

मध्याह्ने ३ P. M. वेलायां अष्टावधानसभा जीवकारुण्यसंघे समाविष्टा आसीत् । अनेकशतवधानकर्ता शतावधानी श्री सि.वि. सुब्बन्नः अवधानोद्यत आसीत् । श्री के. वेंकटेशाचार्यः सर्वकारकलाशालायाः आंध्रशाखाध्यक्ष सभाया आध्यक्ष्यमवहत् । प्रष्टारश्च अष्टौ समाविशन् येषु शिरोमणिः विद्वान् पि. सुब्बराघवय्यः समस्यां, विद्वान् श्री वेंकटरेड्डिः दत्तपदीं, विद्वान् श्री एम्. कृष्णमराजः निषेधाक्षरीं, प्रवीणः प्रचारकः श्री मुंगरशंकरराज. अप्रस्तुतप्रशंसां, विद्वान् टि. वेणुनादपिळ्ळः वर्णनं, विदुषी श्रीमती आर्. कमलम्मा पुराणपठनं, विद्वान् अवधानं कृष्णशर्मा आशुकवित्वं, श्री के. राममूर्तिः M. A. घंटानदं च स्वीकृत्य अवधानिनोऽवधानं पर्यैक्षन्त ।

बहवः रसिकाः आन्ध्रदेशभाग्यभूतायाः एतस्याः अवधानक्रियायाः साक्षादनुभवेन परमानन्दमविन्दन्त ।

सायं ५-३० P. M. वेलायां डा॰ डि. जगन्नाथरेड्डिः (उपकुलपतिः श्री वेंकटेश्वरविश्वविद्यालयस्य) महोदयस्य आध्यक्ष्येण रजतोत्सवसंचिका श्री ए. वल्लियप्पन् (चित्तूरुमण्डलाधिप) महो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दयेन आविष्कृता । साहित्यसम्राट् इत्यादिविरुदविभूषितः श्री ज़म्मुलमडक माधवरामशर्मा "संस्कृतसंस्कृतिः" इत्यंशं लक्षीकृत्य बहु उपन्यास्थत्, यत्रोपन्यासे काव्यपुराणवेदयज्ञमन्त्रतन्त्रागमादि-शास्त्राणां प्रस्तावः पदे पदे समभवत् । एवं भारतीयसंस्कृतेः संस्कृत-मेव मूलं, तस्मात् संस्कृतरक्षणाद्विना भारतीयतैव न जीविष्यतीति स सनिर्दनमवोचत् ।

श्री जगन्नाथरेड्डिश्च स्वाध्यक्षभाषणे विश्वविद्यालयेषु संस्कृतविभागे विद्यार्थिनः दुर्लभा भवन्ति । संस्कृते परिशोधनविभागेपि अल्पा एव उपतिष्ठन्ति । संस्कृतं कस्यापि जातेः कुलस्य वा धनं न भवति । भारतीयजातीयविद्याविधाने नियतं एतत् प्रवेश्य विद्या-विधानमेव पुनरुद्धरणीयं द्योतते । एतस्या भाषायाः प्रवेशस्य माध्य-मिकाः उन्नताश्च शाला एव योग्याः । आन्ध्रप्रदेशे ३२ संस्कृतपाठ-शालासु द्विशतं विद्यार्थिनः संस्कृतं पठन्ति । २६ नूतनाः प्राच्य विद्यालया अपि संस्कृतं बोधयन्ति । जातीयैकतां, सांस्कृतिकैकतां, राजकीयैकतां च अपेक्ष्य संस्कृतं अवश्यं भारतदेशे सर्वत्र प्रबोधनीयं इति अवदत् ।

रात्रिकालीया विनोदकार्यक्रमाश्च श्रीरामविलाससभाभवने निर्वर्तनीयत्वेन परिवर्तिताः ।

अतः ८-३० P. M. वेलायां श्रीरामविलाससभाभवने रङ्गे तिरुपति श्री वेंकटेश्वर प्राच्यकलाशालीयया ललिताकलासमित्या "अश्वत्थामशपथम्" नाम्ना वेणीसंहारस्य तृतीयांकः प्रदर्शितः । कथाभागः आन्ध्रभाषायामनूद्य मुद्रितः सामजिकेभ्यः प्रदत्त आसीत्, येन ते संस्कृते प्रवर्तमानमपि नाटकं सुपरिचितमिव अन्वभूवन् आस्वादयंश्च । श्री वेदव्यासः अश्वत्थाम्नः, विजयकुमारः कृपस्य, मुरलीकृष्णारेड्डिः कर्णस्य, कृष्णप्रसादः सूतस्य भूमिकां अवहत् । आबालवृद्धं अभूतपूर्वं इदं संस्कृतरङ्गप्रदर्शनं प्रतिपदमस्तुवन् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयदिने १३-१०-७३ प्रातः जीवकारुण्यसंघभवने संस्कृतभाषाप्रचारिण्यास्सभायाः सर्वसभ्यसमावेशस्समवर्तत । श्री ति. कं. तिरुवेङ्कटाचार्यः प्रधानमन्त्री आध्यक्ष्यमवहत् । आयव्ययपट्टिका च कार्यदर्शिना श्रीमता एन्. रामनाथार्येण पठिता सर्वैः आमोदिता च ।

परिपालकवर्गः कार्यनिर्वाहकवर्गश्च नूतनतया निर्वाचितः, यत्रैते वर्तन्ते ।

परिपालकवर्गः

गौरवाध्यक्षः – श्री एम्. अनन्तशयनं अय्यंगार्यः,
भूतपूर्वराज्यपालः, तिरुपति.

१. अध्यक्षः – श्री डा० बेजवाड गोपालरेड्डिः,
भूतपूर्वराज्यपालः, नेल्लूरु.

२. उपाध्यक्षः – श्री पी. राजगोपालनायुडु, चित्तूरु.

३. कार्यदर्शी – श्री एन्. रामनाथार्यः, अड्वोकेट्, चित्तूरु.

४. उपकार्यदर्शी – शिरोमणिः श्री एम्. वरदराजं पन्तुलु,
कांचीपुरम्.

५. कोशाधिपः – श्री ए. कन्नय्यश्रेष्ठी, चित्तूरु.

६. सभ्याः –श्री सी. वेंकटरमण अय्यर, अड्वोकेट्, चित्तूरु.

७. शिरोमणिः श्री कष्पगन्तुल लक्ष्मणशास्त्री, हैदराबाद.

८. श्री ति. कं. तिरुवेङ्कटाचार्यः, चित्तूरु.

९. श्री के. वी. एन्. अप्पाराव्, प्रांशुपालः,
आंध्रगीर्वाणकलाशाला, कोव्वूरु.

१०. श्री वी. एन्. रामस्वामिशास्त्री, गोपिचेट्टिपालेम्.

११. श्री आर्. करुणाकरन्, प्रांशुपालः,
केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपति.

१२. श्रीमती रत्नाबायी, M. A. चित्तूरु.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३. चित्तूरु मंडलाधिपः (Ex-officio)

१४. श्री चिवुकुल मार्कंडेयशास्त्री (Ex-officio)
(उपविद्यानिर्देशकः)

संरक्षकवर्गः

१. अध्यक्षः – श्रीमती सरोजिनी महिषी,
स्टेटमिनिस्टर, टूरिजम्, न्यूडेल्ही.

२. श्री वासुदेवद्विवेदी शास्त्री,
सार्वभौमसंस्कृतप्रचारकार्यालयः, वारणासी.

कार्यनिर्वाहकवर्गः

१. प्रधानमन्त्री – श्री ति. कं. तिरुवेङ्कडाचार्यः, चित्तूरु.

२. परीक्षामन्त्री – श्री के. श्रीनिवासाचार्यः, मद्रास्-४३.

३. प्रकाशकमन्त्री – श्री के. मुनिरेड्डिः, चित्तूरु.

४. प्रचारकमन्त्री – श्री एन्. अनन्तरामशास्त्री, M. A.
गुंटूरु.

५. निधिमन्त्री – श्री पि. सुब्बराघवय्यः, चित्तूरु.

सभ्याः- ६. श्री एन्. रामनाथ अय्यर्, चित्तूरु. (Ex-officio)

७. श्री के. प्रह्लादगुप्तः, आल्लगड्ड.

८. श्री पि. वि. रमणमूर्तिः, M. A.
संस्कृतोपन्यासकः, सर्वकारकलाशाला, चित्तूरु.

९. श्री वि. शेषाचार्यः, तिरुपति.

१०. श्री के. एम्. मुरलीधरन्, पाकाल.

११. श्री सोमा श्रीनिवासन्, ४७, बरोडावीथी, मद्रास् - ३३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२. श्री एम्. वरदराजन्, चित्तूरु.
१३. श्री बी. गोविन्दराजुलुसेट्टि, चित्तूरु.

पाठ्यक्रमनिर्णायकसमितिः

१. श्री चिवुकुल मार्कंडेयशास्त्री, M. A. (Ex-officio)
२. श्री एन्. रामनाथय्यर्, B. A., B. L., चित्तूरु.
३. विद्याप्रवीणः श्री टि. के. तिरुवेङ्कटाचार्यः, चित्तूरु.
४. शिरोमणिः श्री के. श्रीनिवासाचार्यः, मद्रास्.
५. शिरोमणिः कप्पगन्तुल लक्ष्मणशास्त्री, हैदराबाद.
६. शिरोमणिः श्री के. मुनिरेड्डिः, चित्तूरु.
७. शिरोमणिः श्री ए. वरदराजन्, चित्तूरु.

परितेषु प्रस्तावेषु केचन मुख्यांशा अत्र दीयन्ते ।

(क) केन्द्रसर्वकारविज्ञापनाः

१. केन्द्रसर्वकारेण संकल्पितः संस्कृतविश्वविद्यालयः संस्कृतिकेन्द्रभूते तिरुपतिनगरे यथाशीघ्रं प्रतिष्ठापनीयः ।
२. भारतदेशे सर्वत्र पाठशालासु, कलाशालासु च संस्कृतोपाध्यायः एकैकः वा अवश्यं नियोजयितव्यः, शिल्पोपाध्यायावत् परिश्रमोपाध्यायवत् ।
३. भारतदेशीयेषु विश्वविद्यालयेषु सकलेषु च आन्ध्रविश्वविद्यालयादर्शेन स्वानुबन्धकलाशालासु संस्कृतडिप्लमो परीक्षाणां निर्वहणं संप्रार्थ्यते ।
४. भारतदेशे प्रतिप्रान्तं एकैका संस्कृतशोधसंस्था स्थापनीया ।
५. एतत्सभापरीक्षा कोविदा उन्नतस्तरेति निश्चित्य विश्वविद्यालयसंस्कृतपरीक्षाणां शिरोमणिविद्याप्रवीणादीनां पूर्वभाग (प्रिलिमनरी) सदृशतां आंध्रप्रदेशसर्वकारः अदादिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणात् केन्द्रसर्वकारोपि एतां शास्त्रिपरीक्षासदृशीं अंगीकुर्यात् ।

(ख) आंध्रप्रदेशसर्वकारं प्रति विज्ञापना:

१. आंध्रप्रदेशे माध्यमिकोन्नतपाठशालासु प्रवर्तमानस्य संस्कृताभ्यासस्य अविच्छेदेन आन्तं प्रचलनार्थं जूनियरकलाशालासु अपि द्वितीयभाषात्वेन नियतं संस्कृतं आदेष्टुं प्रार्थयामहे ।

२. एतत्सभाकोविदोत्तीर्णानां संस्कृतबोधनाभ्यासपरीक्षायां प्रवेशं दापयेदित्यभ्यर्थना ।

३. उन्नतपाठशालीयसंस्कृतविद्यार्थिनां देशभाषाया इव संस्कृतस्यापि अंकान् समतया निर्णीय संस्कृतस्य देशभाषया सह समान प्रतिपत्तिं प्रददतु ।

४. श्री वेंकटेश्वरविश्वविद्यालयमादर्शत्वेनांगीकृत्य प्राच्य संस्कृत बी. ए. परीक्षा: प्रकटय्य, अन्ये च विश्वविद्यालया: पाठ्यप्रणाल्यां आंग्लमपि संयोज्य, तेषां भाषापट्टभद्राणां राजकीयेषु सकलेषु उद्योगेषु अवकाशं कल्पयेयु: ।

मध्याह्ने ३ P. M. वेलायां गेयगैर्वाण्या आविष्करणमभूत् । अत्र आध्यक्ष्यवहनायाहूतस्य श्री आर्. करुणाकरमहोदयस्य अनुपस्थिते: तेन प्रेषित: श्री देवरकोंड सत्यनारायणमहोदय अध्यक्षपीठमधिष्ठाय श्रीकरुणाकरप्रदत्तं अध्यक्षभाषणं अपठत्, गेयगैर्वाणीमाविश्चकर च । चतुश्शास्त्रविद्वान् एन्. एस्. रामानुजताताचार्य: संस्कृतस्य गेयसाहित्यस्य च प्रशंसापूर्वकं गेयगैर्वाणीं प्राशंसत । तत: गेयगैर्वाणी संकलनकर्ता श्री ए. वरदराजमहोदय: तत्रत्यानि कतिचन गेयानि प्रगीय सभ्यानानन्दयत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सायं ५-३० P. M. श्री वी. राघवमहोदयाध्यक्ष्येण महाजनसभा समपद्यत। श्री वासुदेव द्विवेदी शास्त्री (सार्वभौमसंस्कृतप्रचारकार्यालयः, वारणासी) संस्कृतप्रचारस्यावश्यकतां प्रचारे च प्रचारकैरनुभूयमानानि संकटानि, संस्कृतस्य अद्यतनीमभिवृद्धिं च सुलभललितं उपन्यास्थत्। श्री कप्पगन्तुल लक्ष्मणशास्त्रिमहोदयः आन्ध्रे तदन्वबदत्। द्विवेदी महोदयश्चैवमवदत् – बहूनि संस्कृतसंस्थानानि भारते मयावलोकितानि। परन्तु एषा संस्कृतप्रचारसंस्था सर्वसंपन्ना मयानुभूयते। अन्यासंस्थानां स्वीयं निवासभवनं प्रायशः नास्त्येव। नागपुरे अत्र च मया संस्कृतगृहमवालोक्यत इति।

रात्रौ श्रीरामविलाससभाभवने विनोदकार्यक्रमः समवर्तत। श्री वाणीसंगीतनाट्यमंडल्या रोहिणीप्रायाभिर्बालिकाभिः भरतनाट्यं प्रदर्शितम्।

ललितकलासमित्या "हनुमत्संदेश" नाम्ना अभिषेकनाटकस्य तृतीयांकः प्रदर्शितः।

श्री वेदव्यासः रावणस्य, सदानन्दशास्त्री आंजनेयस्य, विजयकुमारः विभीषणस्य, हरिहरशास्त्री शखकर्णस्य च भूमिकां अधरत्।

तृतीयदिने (१४-१०-७३) प्रातः ८-३० A. M. वेलायां पाठ्यग्रन्थनिर्णायकवर्गसमावेशः समवर्तिष्ट। सभ्याः परिचयाभिज्ञविचक्षणपाठ्यानि यथापूर्वमंगीकुर्वन्, समर्थकोविदयोश्च कानिचन परिवर्तनानि अरचयन्, परीक्षाशुल्केषु परीक्षकेभ्यो देये च काचन अभिवृद्धिः आदिष्टा। एष नूतननियमः १९७५ संवत्सर सेप्टंबर परीक्षतः आचारे अवतरिष्यति।

मध्याह्ने ३-०० P. M. वेलायां गैर्वाणीतास्त्रोत्सवः प्रावर्तत। श्री कप्पगन्तुल लक्ष्मणशास्त्री (भूतपूर्व उपविद्यानिर्देशकः) आध्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्ष्यमवहत् । श्री सी. वी. शेषाचार्यः (श्री वेंकटेश्वरप्राच्यकलाशालोपन्यासकः) संस्कृतपत्रनिर्वहणक्लेशान्, गैर्वाण्या प्रकाशनरीतिं, एतत्पत्रिकाविशेषांश्च अस्तोत् स्वभाषणे । अध्यक्षमहोदयश्च स्वभाषणे संस्कृतभाषयाः अन्यभारतीयभाषाणां च पारस्परिकं सन्निहितसंबन्धं उदाहरणपूर्वकमुपन्यस्य गैर्वाणीपत्रिकायाः संस्कृतप्रचारे सुलभतरभाषाविस्तरणे च कृतार्थतां, छन्दस्य अप्रदानेपि एतत्पत्रस्य नियतप्रेषणेन ग्राहकाणां मनःपरिवर्तनं च प्राशंसत ।

सायं ५-३० वेलायां श्री कृष्णशर्मणां अनुपस्थित्या व्याकरणशास्त्रपारीणः श्री बी. एन्. रामस्वामिशास्त्री महासभाध्यक्ष्यमवहत् । मधुरगानविशारदस्य यज्ञनारायणशर्मणः गीतगोविन्दगानेन सभा समारब्धा ।

डा० दिवाकर्ल वेंकटावधानिमहोदयः शाकुन्तलम्-कालिदासः इति विषयमधिकृत्य कालिदासकविताविशेषं तत्रापि शाकुन्तले तस्य सामर्थ्यविशेषं च सोदाहरणं उपन्यास्थत् ।

रात्रौ ९-३० P. M. वेलायां श्रीरामविलाससभाभवने विनोदकार्यक्रमः समजनि । वाणीसंगीतनाटचमंडल्या रोहिणीप्रायाभिः बालिकाभिः ससंगीतं भरतनाटचं प्रदर्शितम् । ललितकलासमित्या च "चाणक्यतन्त्रम्" नाम्ना मुद्राराक्षसतृतीयांकः प्रदर्शितः । अत्र ईश्वराचारी चाणक्यस्य, मुरलीकृष्णारेड्डिः चंद्रगुप्तस्य, कृष्णप्रसादः कंचुकिनश्च भूमिका अधरन् ।

त्रिष्वपि दिनेषु संस्कृतनाटकानि प्रजानां स्तोत्रपात्रण्यासन्, तत्र च दर्शकः भूमिकाधारी च वेदव्यासः प्रस्तुतोऽभवत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विजयतां कर्णाटकराज्यम्

(मैसूरुराज्यस्य कर्णाटकराज्यमिति शुभनामकरणोत्सव पवित्रसन्दर्भे)

रचयिता विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्

श्रीरामः किल यत्र वा जनकजां भार्यां विचिन्वन्पुरा
शूरैर्वायुसुतादिभिस्समुचितं साह्यं हि लेभे स्वयम् ।
अज्ञातां वसतिं च यत्र कठिनां पाण्डोस्सुताः चक्रिरे
देशोऽयं जगतीतले विजयतां कर्णाटनामा सदा ॥

भाषावाक्यमधूनि नाटककुले संवत्सहस्रद्वया-
त्पूर्वं ग्रीकजनैः मुदा किळ मुहुः पीतानि यस्यैव वा ।
यद्वाण्यां बहुधा पुरन्दरमुखैः भक्तिश्च संवाहिता
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ॥

ग्रंथो वा कविराजमार्गकलितः यस्यादिमः कीर्तितः
पम्पाद्यैः कवितल्लजैश्च महिमा ख्यातः मुहुर्यस्य वा ।
आरब्धो 'बसवेन' वा शिवपरः यत्रैव धर्मो नवः
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ॥

'हयूयन्स्तांग'मुखैर्विदेशपथिकैः संकीर्तिता यत्प्रजाः
"निर्व्याजा अतिथिप्रियाश्शुभपराः कार्तज्ञचभूषा" इति ।
सीमा यस्य सरित्कवेरतनुजा गोदावरी वा स्मृता
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशे यत्र महासतीति विदिता: वीरांकिता वा शिला:
पातिव्रत्यकथां च वीरचरितं नित्यं वदन्त्येव ता: ।
यस्योद्धारमहाध्वरेऽपि वनिता: दीक्षां गता यत्र वा
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ॥

यद्देशे जकणादिशिल्पचतुरै: निर्मापितान्यादरात्
बेलूरादिपुरीषु शिल्पकलया संशोभितान्यन्वहम् ।
आकर्षन्ति च मन्दिरणि जनतां संदर्शनोत्कान् मुहु:
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ॥

सङ्गीते निजनामशोभितमहामार्ग: नवीन: पुरा
सृष्टो लास्यपथे यश: किल महत् संपादितं येन वा ।
विद्यारण्यमुखैर्यतीन्द्रमहितै: सम्पूजितो भक्तित:
देशोयं जगतीतले विजयतां कर्णाटनामा सदा ॥

यत्संरक्षणकार्यजातनिरता: 'चेन्नम्म' मुख्यास्त्रिय:
काव्यक्षेत्रसुदीपने च निरता: 'होन्नम्म'मुख्यास्तथा ।
भक्ताग्रेसरकीर्तिशोभिवनिता: 'अक्का'दयो यत्र वा
देशोयं भुवनेश्वरीकरुणया संवर्धतामन्वहम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गांधीकथा

रचयिता विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्.

कविसार्वभौमः भारतराष्ट्रीय-साहित्यसंगीतकलाक्षेत्रज्ञः विश्व-विख्यात 'नोबेल' पुरस्कारवि-जेता रवीन्द्रनाथठाकूरमहाशयः कस्य वा भारतीयस्य चित्तपथा-द्दूरो भवेत्? साहित्यसंगीतकला-दिषु नवनवीनमार्गस्य संशोधने, तद्रचनाया ञ्चानवरतं तस्यो त्साहः । क्रमेणात्मनस्सुखमपि सर्वथा विस्मृत्य कार्येऽस्मिन्सं-लग्नो बभूव । आत्मनः प्रकोष्ठे, बहिरुद्याने यत्र कुत्र वा स्थित्वा, दिवानिशं रचयति स्म गीतकानि नवानि, स्वरप्रस्तारान्नूत्नान् । अनेनैवानल्पेन कार्योत्साहेन तस्य स्वास्थ्यं क्रमेण जह्लास । विश्रा-न्त्यै मित्रैः दत्ता अपि परामर्शा मोघा बभूवुः ।

एवं स्थिते, जातु महात्मा-गांधीमहाशः सत्यप्रियः, कविता-प्रियस्य रवीन्दस्थ संदर्शनार्थं आजगाम । संदर्शनात्पूर्वं केचन कवे र्नीरोगताकांक्षिण स्सुहृदः महात्मनस्सन्निधिमागत्य प्रार्थया-मासुः "राष्ट्रपितः" अयन्तु कवि-राजः शान्तिनिकेतनसंस्थापकः आत्मनशान्तिं सर्वथा विस्मृत्या-नवरतं रचनाप्रपञ्चे मग्नो-स्ति । अस्मद्विनीतां प्रार्थना-मपि तिरस्करोति । अतः भवान् एव समर्थः तत्सन्मार्गनयने । कृपया संदर्शनवेलायां तेन साकं, तद्विश्रान्त्यै उचिता व्यवस्था कर-णीया" इति ।

राष्ट्रपितुः तत्रतो निर्गमन-दिने तस्य प्रस्थापनसमारम्भे स्वयं ठाकुर आगत आसीत् । तदा गांधीमहोदयः गुरुदेवं प्रति "भोः कविवर ! अस्ति मदीया भिक्षैका भवत्सन्निधौ । यदि प्रतिजानीते यच्छामिति वदा-म्यवश्यम्" इत्यब्रवीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"किं तत्? अवश्यं दास्यामि" इति प्रतिज्ञातम् रवीन्द्रेण। "सा तु भिक्षात्यल्पैका। भवता प्रत्यहं मध्याह्नात्परं एकापि होरा वा विश्रान्तिरुपलब्धव्या" इति स्वाशयं स्पष्टचकरोत् महात्मा।

वासरस्यैकस्य मध्याह्न समयः। कवीन्द्रस्य दर्शनार्थं तन्निकटसखा आचार्यः क्षितिमोहनसेनः आगतः। रवीन्द्रस्य प्रकोष्ठद्वारः बद्ध आसीत्। बहिरेवस्थितः आचार्यः "गुरो! तत्र भवद्दर्शनार्थं आगतोस्मि। अपि कस्मिन्नपि कार्ये मग्न.?" इत्यपृच्छत्। गम्भीरेण स्वरेण उत्तरं प्रकोष्ठान्तर्भागादेवावाप" महात्मने गांधीमहाशयाय भिक्षां यच्छन्नस्मि इति। उत्तरेण चकितः सेनमहोदयः कवाटरन्ध्रेणापश्यत्, रवीन्द्रः खट्वायां अर्धनिमीलितनेत्र आसीत्।

श्री-अप्पय्यदीक्षितेन्द्रजयन्ती (४२१)

सिकंदराबादनगरीयकीसोन्नतपाठशालायां १२-१०-७३ दिने सायं एष जयन्तीमहोत्सवः महावैभवेन संपन्नः आसीत्। तस्मिन् दिने प्रातः एकादशरुद्राभिषेकः, दीपाराधनं, अर्चनं इत्यादयः मरेडपल्यां ग्रन्थप्रकाशनसमितिकार्यालये आचर्यन्त।

सायं श्री के. एन्. अनन्तरामन् I. A. S. महोदयः सभाध्यक्षतां अवहत्, सामवेदपठनेन कार्यक्रमः प्रारब्धः। श्री डी. जी. षडे स्वागतवचनानि अवोचन्, श्री रामस्वामी घनपाठी दीक्षितेन्द्रस्य शुभचरित्रं व्यवृणोत्, श्री परायतं कृष्णमूर्तिशास्त्री दीक्षितेन्द्रस्य महाग्रन्थान् प्रास्तौत्, श्री वी. चंद्रमौलिः, I. A. S. दीक्षितेन्द्रस्य पांडित्यविशेषं समस्तुवत्। अध्यक्षः स्वभाषणे दीक्षितस्य आन्ध्रजातौ आन्ध्रभाषायां च अभिमानविशेषं प्राशसत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमादीच - उत्तरायणपरीक्षाणां सन्नाहकार्यक्रमः

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु (आं. प्र.)

Programme for Samskrita Examination, March 1974

विना विलम्बशुल्कं आवेदनपत्राणां प्रेषणायान्तिमावधिः	१ रू. विलंबशुल्केन सह आवेदनपत्र-प्रेषणाय अन्तिमावधिः	परीक्षाणां प्रचलनसमयः 1974 मार्च मासे
20—1—74	31—1—74	कोविदः 9, 10, 11 तिथिषु, विचक्षणसमर्थौ 9, 10 तिथ्योः, परिचयाभिज्ञे 9 तिथौ

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आ० प्र०) 10-11-73

की. श्रीनिवासाचार्यः,
परीक्षामन्त्री.

सूचनाः

१. प्रेषितं परीक्षाशुल्कं कथं चिदपि न प्रत्यर्प्येत, न परिवर्त्येत, न वा स्थाप्येत । अतः आलोच्य आवेदनपत्रं परिपूर्य प्रेषणीयं ।

२. न्यूनतया प्रेषितं शुल्कं न कार्यकरि भवेत् । अतः यावदावश्यकं आलोच्य एकदैव प्रेषणीयं ।

३. न्यूनशुल्कं आवेदनपत्रं तच्छुल्केन सह व्यर्थं भवेत् । अतः शुल्कस्य आवेदनपत्राणां च अत्यंतसंगतिरावश्यकी ।

४. लेखे आवेदकानां नामानि, तच्छुल्कस्य प्रत्येकविवरणं चावश्यकानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५. विशेषानुमति (Examption) कृते एकमासात्पूर्वमेव ५-०० रूप्यकाणि, पृथक् योजनीयानि तत्तदावश्यकयोग्यातापत्रादश्च प्रेषयित्वा अनुमतिर्गृहीतव्या ।

६. एकस्मिन्नगरे बहूनि केन्द्राणि नांगीक्रियेरन्, नैकमपि पञ्चन्यूनाभ्यर्थिसत्वे, न वा समीपस्थेऽन्यकेन्द्रे ।

७. केन्द्रस्थापनविषये न केवलं विद्यार्थिनां संख्या प्रधानं, अपि तु दुराचाराणां असंभवोऽपि परिशीलयेत परीक्षामन्त्रिणा ।

संस्कृतभाषाप्रचारिण्यास्सभायाः

स्थायिकेन्द्राणि

आन्ध्रप्रदेशे –

(१) अनन्तपुरम् (२) अनकापल्ली (३) आल्लगड्डु (४) कडप (५) काकिनाड (६) गुंटूरु (७) चित्तूरु (८) तिरुपति (९) दोम्मरनन्द्याला (१०) पेद्दापुरम् (११) भीमवरम् (१२) मछलीपट्टणम् (१३) मंत्रालय (१४) राजमंड्री (१५) विजयवाडा (१६) विजयनगरम् (१७) हिंदूपूरु (१८) हैदराबाद ।

द्राविडप्रदेशे –

(१) अंबत्तूरु (मद्रास्) (२) क्रोंपेट (मद्रास् - ४४) (३) कोयंबत्तूरु - ए (४) कोयंबत्तूरु - बी (५) तंजावूरु (६) तिरुचिरापल्लि (७) तिरुवेण्गाडु (८) तिरुनेल्वेलि (९) त्यागरायनगर (१०) मदुरै - ए (११) मदुरै - बी (१२) मन्नार्गुडि (१३) मेट्टूरुडाम् (१४) श्रीरंगम् (तिरुच्चि) (१५) सेलम् ।

कर्णाटकप्रदेशे –

(१) बेंगलूरु (२) शाहपूर ।

उत्तरप्रदेशे –

न्यूडेल्ही ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिलभारतीयसंघटनाकार्यदर्शिनः माननीयस्य

एम्. पि. दिग्वेकरस्य आगमनम्

पेद्दापुरीग्रामे विश्वहिन्दूपरिषद्शाखा १९६७ वत्सरे स्वर्गीय-श्री जटावल्लभुल पुरुषोत्तममहोदयस्य शुभाशीर्भिस्संस्थापिता। तच्छाखाधिपैः एत्र सम्यक् समालोच्य परीधाविनामसंवत्सरे मार्गशीर्षेकादश्यां निश्शुल्कसंस्कृतपाठशाला, धर्मवैद्यशाला, अन्नवितदानकेन्द्रं च पुरजनसहकारेण समारब्धानि ।

प्रतिदिनं सायंकाले पञ्चघण्टात आरभ्य घण्टाद्वयपर्यन्तं संस्कृताचार्येण श्री दर्भा चलमय्यशास्त्रिणा पाठशालाकार्यक्रमः प्रचाल्यते । तस्मिन्नेव समये डाक्टर श्री बच्चु सूर्यनारायणमूर्तिमहोदयेन, डाक्टर श्री चिलकमर्रि तिरुवेंगळाचार्यमहोदयेन च निश्शुल्कवैद्यशालाकार्यक्रमः स्वस्वकाम्पौण्डरसहायेन निर्वाह्यते। प्रतिभानुवासरं प्रातः पञ्चाशत् दीनेभ्यः जनेभ्यः श्री तम्मन सुब्बारावमहाशयस्य अचंचलदीक्षया अन्नवितरणकार्यक्रमः निरूह्यते। एतद्विश्वहिन्दूपरिषद् कार्यक्रमस्य पर्यवेक्षणाय अखिलभारतीयसंघटना कार्यदर्शी माननीय एम्. पाण्डुरङ्ग दिग्वेकर महोदयः आगतवान् । तदागमनशुभसमये तद्गौरवार्थं पेद्दापुरीग्रामस्थ श्री कन्यकापरमेश्वरी - आलये ११-१०-७३ भृगुवासरे प्रातःकाले अष्टघण्टारभ्य महती बहिरङ्गसभा प्रचालिता । बहवः पण्डिताः, जनाः, न्यायवादिनश्च आहूताः आगताश्च । पाठशालाविद्यार्थिभिः गीतापठनं, आदित्यहृदयपारायणं, सूर्याष्टकपठनं, विद्यार्थिनीनां संस्कृतसंभाषणं च अक्रियत दिग्वेकर महोदयस्य समक्षं । दिग्वेकरमहोदयाय परिषदध्यक्षेण परिषदाशयानुद्दिश्य स्वागतपत्रं समर्पितं। तदनन्तरं दिग्वेकरमहोदयेन उपन्यस्तम् । उपन्यासानन्तरं संस्कृतभाषाप्रचारिण्यास्सभायाः परिचयकक्ष्यायां उत्तीर्णेभ्यः विद्यार्थिभ्यः भगवद्गीतापुस्तकानि दिग्वेकरमहोदयेन बहूकृतानि । संस्कृताचार्येण वंदनसमर्पणं च कृतं ।

***

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

मुकुन्दविलासः

श्री कुण्टिमद्दि शेषशर्माः, अनन्तपुरम्.

बालमुकुन्दविलासः

श्रीवत्सचिह्नमपि शङ्खरथाङ्गपाणिं
मौळिस्फुरन्मणिकिरीटविभासमानम् ।
मन्दस्मितञ्च जननीतपसः फलञ्च
गोपालबालकमुकुन्दमहं नमामि ॥

कारागृहं स्वतनुकोमलकान्तिपूरै-
रापूरयन्तमरविन्ददलायताक्षम् ।
आनन्दखेदजनकं सकृदेव मातुः
गोपालबालकमुकुन्दमहं नमामि ॥

उद्गच्छति स्म कुतुकेन कळिन्दकन्या
यत्पादकञ्जयुगळीपरिचुम्बनाय ।
प्रादर्शयच्च पदवीं गमनाय रात्रौ
गोपालबालकमुकुन्दमहं नमामि ।

आविर्बभूव वसुदेवकळत्रगर्भा-
दानन्दहेतुरपि यः किल नन्दपत्न्याः ।
एकाऽऽमनस्यमपरा मुदमाप येन
गोपालबालकमुकुन्दमहं नमामि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पीत्वा विषाक्तममरारिकुरङ्गनेत्रा-
स्तन्यं सजीवनमरुद्भिरमारय द्यः ।
भक्तैस्समं परमधाम निनाय तां, तं
गोपलबालकमुकुन्दमहं नमामि ।।

उद्धृत्य मञ्जुनिनदन्मणिकिङ्किणीक-
पादाङ्गदे, रहसि सिक्थितदुग्धमण्डम् ।
हर्तुं, न्यसन्तमवनौ चरनौ च मन्दं
गोपालबालकमुकुन्दमहं नमामि ।।

जग्ध्वा दधीनि प्रतिवेशगतानि, शेषं
तद्गोपिकावदनसीम्नि विलिप्य, तूर्णम् ।
यान्तं, विलोक्य जननीं प्रचलायितक्षं
गोपालबालकमुकुन्दमहं नमामि ।।

चूडामणीकृतमनोज्ञमयूरबर्हं
पादाङ्गदायितपुराणवचोविलासम् ।
वंशीनिनादहृतवल्लवयौवनं तं
गोपालबालकमुकुन्दमहं नमामि ।।

कादम्बिनीरुचिरमोहनदेहकान्ति
कादम्बपाण्डुमधुरस्मितभासमानम् ।
फुल्लत्कदम्बसुमहारविराजमानं
गोपालबालकमुकुन्दमहं नमामि ।।

कालाहिदन्तुरफणानटनाभिरामं
कायप्रभाद्विगुणयामुनपूरदीप्तिम् ।
कन्दर्पदर्पहरसुन्दरदिव्यमूर्तिं
गोपालबालकमुकुन्दमहं नमामि ।।

— (अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

सुभाषितानि

अनुवादकः श्री एन्. रामनाथार्यः.

[पूर्वानुबन्धः]

कृतांतपाशबद्धानां दैवोपहतचेतसां ।
बुद्धयः कुब्जगामिन्यः भवन्ति महतामपि ॥ ॥ ५१० ॥

Even great men deviate from rightful conduct, when they are afflieted by adverse fate and they are caught in the snares of death.

शनैश्शनैश्श्च भोक्तव्यं स्वयं वित्तमुपार्जितं ।
रसायनमिव प्राज्ञैः हेलया न कदाचन ॥ ॥ ५११ ॥

One should enjoy wealth earned by him, little by little, like a potent medicine, but not in a casual manner.

रविरपि न दहति तादृक् यादृक् वा दहति वालुकानिकरः ।
अन्यस्माल्लब्धपदो नीचः प्रायेण दुस्सहो भवति ॥ ॥ ५१२ ॥

The sun's rays do not scorch as severely as a burnt heap of sand; a low person, having obtained his position from another, generally becomes intolerable.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो दुर्जनसंसर्गात् मानहानिः पदे पदे ।
पावको लोहसङ्गेन मुद्गरैरभिहन्यते ॥ ॥ ५१३ ॥

By associating with the wicked, one loses his reputation at every stage; fire is constantly beaten, when it is in contact with iron.

अपि वेत्ति षडक्षराणि चे दुपदेष्टुं यतते स्वयं हरम् ।
वसनाशनमात्रमस्ति चेत् धनदादप्यतिरिच्यते खलः ॥ ५१४ ॥

A wicked person, even though he knows very little, feels himself competent to advise even Lord Hara! when possesed of only food and clothing, he feels greater than Lord Kubera!

(अनुवर्तते)

आन्ध्रभाषायां अद्वैतग्रन्थः

सुरेश्वराचार्यस्य अद्वैतमतावष्टम्भनं विवृण्वन् श्री डा. सी. मार्कंडेयशास्त्री (उपविद्यानिर्देशकः आंध्रप्रदेशस्य) कंचन ग्रन्थमरचयत् । स च २९-१०-७३ दिने विजयवटिकायां आन्ध्रप्रदेशोन्नत-न्यायस्थानन्यायाध्यक्षेण श्री जी. वेंकट-रामशास्त्रिणा आविष्कृत आसीत् । श्री बी. रजनीकान्ताराव (Director AIR) महोदयेन, आचार्य ई. वि. आर. श्रीकृष्णशर्मणा (वेंकटेश्वरविश्वविद्यालयः संस्कृत-शाखाध्यक्षेण) श्री पुल्लेल श्रीरामचंद्रुडुना, श्री ई. अनन्तरामय्येन च ग्रन्थस्थ विशेषांशान् प्रति सुष्ठु भाषितिमासीत् ।

प्राचीनसंस्कृतग्रन्थानामन्येषामपि तत्तद्भाषासु अनुवादाः विमर्शाः संग्रहाश्च उद्भवन्तु येन प्रजाः संस्कृतमाहात्म्यं विदित्वा मूल-ग्रन्थपठनोत्सुका भूत्वा भारतीयसंस्कृतिं दृढाध्यवसाया भवेयुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Samskritha Bhasha Pracharini Sabha,

CHITTOOR. (A. P.)

संस्कृतभाषाप्रचारिण्यास्सभायाः

प्रमादीच - दक्षिणायनपरीक्षाफलानि

चित्तूरु. (आं. प्र.)

RESULTS OF SEPTEMBER EXAMINATIONS 1973.

The following are the Register Numbers of successful Candidates who appeared for the Samskrita Examinations held on 8th, 9th and 10th September, 1973.

PARICHAYA

I Class:- 9 20 28 33 34 35 38
41 42 48 53 54 55 71 117 119 145
146 150 151 158 159 160 171 196 203 273
338 346 378 379 389 390 393 396 397 400
401 402 404 410 476 477 485 520 521 522
523 524 525 526 552 553 554 556 557 562
602 604 619 621 623 630 633 635 639 640
643 724 725 727 728 729 753 756 876 877
886 887 889 893 894 899 900 and 907.

6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

II Class:- 7 8 37 44 45 46 47
50 51 52 59 61 66 69 70 95 97
105 118 120 125 128 140 142 143 144 147
161 163 165 168 169 170 178 188 189 190
192 197 198 199 255 258 272 281 322 336
337 353 355 357 370 372 375 377 380 383
367 388 398 413 475 481 493 501 505 527
532 533 535 538 555 558 559 560 591 592
620 626 628 629 631 636 644 657 658 666
670 671 682 696 699 710 712 713 730 731
754 755 757 758 781 784 790 791 804 824
828 829 831 833 874 875 879 880 881 882
883 884 885 888 901 933 and 945.

III Class:- 2 3 4 5 6 18 49
60 65 67 96 104 109 111 127 130 131
138 141 148 149 162 164 167 172 174 175
176 191 193 195 200 201 202 254 259 260
261 266 273 274 275 283 310 311 312 313
315 316 318 321 324 325 335 339 340 343
345 356 373 376 382 384 385 386 391 392
394 399 423 424 425 480 482 483 486 487
489 491 495 498 499 500 502 504 511 512
528 529 530 534 536 537 563 588 593 594
601 603 618 622 624 625 637 669 673 681
683 686 697 698 711 715 726 734 737 738
751 759 782 783 785 786 806 807 825 826
835 837 839 840 841 845 873 905 906 908
910 and 937.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ABHIJNA

I Class:- 11 12 19 121 122 236 252 441 541 548 651 676 677 678 741 811 and 938.

II Class:- 14 80 106 123 135 181 183 186 208 229 230 232 233 237 251 328 330 359 361 362 367 368 395 405 406 407 427 433 435 438 440 442 444 445 446 448 452 539 540 543 544 545 549 550 572 596 598 606 646 647 648 649 650 652 701 702 703 704 705 706 709 716 718 720 760 761 762 763 766 776 779 810 812 857 929 939 940 941 942 and 952.

III Class:- 1 16 74 75 76 79 81 108 112 113 152 153 156 179 182 184 185 187 205 215 216 217 218 225 228 231 234 238 240 242 243 347 348 349 363 408 409 428 432 434 443 449 450 451 453 454 456 546 551 565 566 568 569 570 571 573 574 577 580 595 597 605 693 700 708 717 719 721 722 723 749 764 768 778 787 788 789 809 855 856 858 862 864 920 921 923 928 947 and 948.

VICHAKSHANA

I Class:- 770 771 772 and 813.

II Class:- 82 85 246 253 462 584 585 599 600 661 662 663 664 769 773 774 814 815 903 953 954 959 and 960.

III Class:- 17 21 83 84 86 245 247 332 333 470 519 581 582 595 679 956 957 and 958.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAMARTHA

I Class:- Nil.

II Class:- 116 and 479

III Class:- 87 114 115 478 611 665 924 925 and 926.

I Part only:- 90 286 287 288 289 290 291 292 293 294 297 299 300 301 and 680.

II Part only:- 32 612 and 775.

KOVIDA

I Class:- Nil.

II Class:- Nil.

III Class:- 91 and 92.

I, II & III Parts only:- 93 and 94.

I & III Parts only:- 473 613 614 615 and 616.

I, III, IV & V Parts only:- 40 only.

I, III & V Parts only:- 474 only.

II & III Parts only:- 302 303 304 306 307 and 308.

II & IV Parts only:- 818 and 823.

III Part only:- 305 & 931.

III & V Parts only:- 816 and 817.

IV Part only:- 617 819 821 and 822.

The following candidates stood First in I Class in the Examinations mentioned below. Prizes will be awarded te them in due course.

PARICHAYA:- No. 553, Y. Rani, Puduchartam.

ABHIJNA:- No. 236, K. S. Srimathi, Chromepet, Madras.

VICHAKSHANA:-No. 772, S. Vedavalli, Srirangam.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

प्रमादीच - दक्षिणायनपरीक्षासु उपयुक्तानि केन्द्राणि - ५३

(१) अनन्तपुरम् (२) अंबत्तूरु (३) अनकापल्ली (४) आर्यवटम् (५) इन्द्रप्रस्थम् (६) कडप (७) कपिलेश्वर-पुरम् (८) कलिंगपट्टणम् (९) काकिनाड (१०) कुंभकोणम् (११) कोंडमाचुपल्ली (१२) कोत्तपेट (१३) कोरसवाड (१४) कोयंबत्तूरु - ए (१५) कोयंबत्तूरु-बी (१६) क्रोम्पेट (१७) चित्तूरु (१८) तंजावूरु (१९) तांबरम् (२०) तांडूरु (२१) तिरुपति (२२) तिरुचिरापल्ली (२३) तिरुनगर (२४) तिरुनल्वेलि (२५) त्यागरायनगर (२६) दोम्मरनंद्याल (२७) निवगाम् (२८) नेल्लूरु (२९) पांडिचेरी (३०) पिठा-पुरम् (३१) पुदुच्चत्रं (३२) पेद्दापुरम् (३३) भीमवरम् (३४) मंत्रालयः (३५) मदनपल्ली (३६) मदुरा -ए (३७) मदुरा - बी (३८) मछलीपट्टणं (३९) मन्नार्गुडि (४०) मुक्कामल (४१) राजमहेन्द्रवरम् (४२) लेपाक्षी (४३) वड्वूरु (४४) विल्लुपुरम् (४५) विशाखपट्टणं (४६) वृद्धा-चलं (४७) श्रीकाकुलम् (४८) श्रीरंगम् (४९) श्रीरामापुरम् (५०) सत्यवेडु (५१) सेलम् (५२) हिन्दुपुरम् (५३) हैदरा-बाद् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षाफलसारिणी

प्रमादीच - दक्षिणायनपरीक्षासु उत्तीर्णाः – ६४०.

SEPTEMBER EXAMINATIONS 1973.

परीक्षाः	अभ्यर्थिनः	उत्तीर्णा			
		प्र. श्रे.	द्वि.श्रे.	तृ.श्रे.	खंडशः
परिचयः	513	85	126	141	–
अभिज्ञः	316	17	80	89	–
विचक्षणः	64	4	24	18	–
समर्थः	40	–	2	9	18
कोविदः	27	–	–	2	25
आहत्य	960	106	232	259	43

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तज्जीवनं भारतभूमिगौरवम्

ले. श्री वैद्य रामस्वरूपशास्त्री, संपादकः, बालसंस्कृतम्, बम्बई-८६

तज्जीवनं यद्धनदानसुन्दरं तज्जीवनं यत्र न लोभपाशः ।
तज्जीवनं यत्र न रागरोगः तज्जीवनं यत्परितोषपूर्णम् ॥
तज्जीवनं यत्र च सत्यमस्ति तज्जीवनं यत्र च शौचमस्ति ।
तज्जीवनं यत्र मनोविनिग्रहः तज्जीवनं यत्र दया परेषु ॥
तज्जीवनं कर्मपरायणं यत् तज्जीवनं धर्मपरायणं यत् ।
तज्जीवनं यत्र च यत्नपूजा तज्जीवनं यत्र परोपकारः ॥
तज्जीवनं यत्र धनागमः स्यात् तज्जीवनं यत्र च देशपूजा ।
तज्जीवनं यत्र गृहे सुखानि तज्जीवनं यत्र सतां समागमः ॥
तज्जीवनं यत्र च शौर्यमस्ति तज्जीवनं यत्र च धैर्यमस्ति ।
तज्जीवनं यत्र सुदक्षता स्यात् तज्जीवनं यत्र प्रसन्नता स्यात् ॥
तज्जीवनं यत्र नवीनता स्यात् तज्जीवनं यत्र न हीनता स्यात् ।
तज्जीवनं यत्र विशेषता स्यात् तज्जीवनं यत्र नवोन्नतिः स्यात् ॥
तज्जीवनं यत्र च देशनीतिः तज्जीवनं यत्र मिथः प्रतीतिः ।
तज्जीवनं यत्र जनानुरागः तज्जीवनं यत्र चमत्कृतिः स्यात् ॥
तज्जीवनं यत्र मिथो नमस्या तज्जीवनं यत्र च सन्मतिः स्यात् ।
तज्जीवनं यत्र सुसंस्कृतिः स्यात् तज्जीवनं यत्र च संस्कृतं स्यात् ॥
तज्जीवनं यत्क्षमया समेतं तज्जीवनं यद्विपदा विमुक्तम् ।
तज्जीवनं यत्समतापरीतं तज्जीवनं यत्र गुणानुरागः ॥
तज्जीवनं येन पिता प्रतुष्यति तज्जीवनं यत्र च हृष्यति प्रसूः ।
तज्जीवनं यत्र गुरोः प्रसन्नता तज्जीवनं यत्र हरिः प्रपद्यते ॥
तज्जीवनं यद्विनयेन भाति तज्जीवनं यत्र विभाति विद्या !
तज्जीवनं यद्विनयेन रोचते तज्जीवनं विज्ञतयातिसुन्दरम् ॥
तज्जीवनं यत्र हरेरुपासनं तज्जीवनं यत्र गुरोश्च पूजनम् ।
तज्जीवनं यत्र गवां समर्हणं तज्जीवनं यद्यजनेन शोभते ॥
पठन्ति गीतां सकलाश्च लोकाः रामायणं भारतमेव भारते ।
स्वसंस्कृतेश्चापि चरन्ति चर्या तज्जीवनं भारतभूमिगौरवम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयतु गैर्वाणी

लेखकः श्री आर्. गोपालन्, चित्तूरु.

वाचामगोचरां वाणीं गैर्वाणीं निगमाम्बुधिम् ।
ध्यायेऽहं स्तौमि वन्दे च मनोवाक्कायशुद्धये ॥
स्वर्गापवर्गदां देवीं गैर्वाणीं सुमनोरमाम् ।
भजन्ति सुधियो लोके त्रिवर्गफलकाङ्क्षिणः ॥
सुधामयीं तु गैर्वाणीं अवाप्यापि दिवौकसः ।
पयोधिमथनं कृत्वा सुधायै क्लेशमाप्नुवन् ॥
ज्ञानं ददाति विज्ञानं प्रज्ञानं च तथा भुवि ।
ददाति वाञ्छितार्थं च नृभ्यो वाक् सुरसंस्कृता ॥
लोकैकमधुरां वाचं गैर्वाणीं वेदसंश्रिताम् ।
आनन्दमयकोशस्य निलयं प्रणमाम्यहम् ॥
चित्पुरीनिलयां दिक्षु प्रसरन्तीं यशस्विनीम् ।
गैर्वाणीं शङ्करीं यूयं सदा भजत भूतये ॥
गैर्वाणीपादसेवायां निरता ये महाशयाः ।
धन्या भवन्ति ते सर्वे कृतकृत्याः यशस्विनः ॥
वेदोपनिषदैः पूता या वाणी संस्कृता शुभा ।
सा नः पुनातु पापेभ्यो मोचयित्वा निरन्तरम् ॥
अष्टादशपुराणाढ्या इतिहाससमन्विता ।
स्मृतिभिस्सेविता दैवी वागस्तु भवतारिणी ॥
रसरीतिगुणोपेतैस्सर्वालङ्कारभूषितैः ।
काव्यैर्विराजते चैषा गैर्वाणी जगतीतले ॥
सर्वासु लोकभाषासु व्याप्तेयं सुरभारती ।
नालिप्ता लोकभाषाभ्यः तस्मादेषा विशिष्यते ॥
संश्लिष्टार्था ध्वनियुता गंभीरस्वरसंयुता ।
मन्त्रशास्त्रैकनिलया दैवी वाक् पातु नस्सदा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAMSKRITA BHASHA PRACHARINI SABHA, CHITTOOR.

Income and Expenditure Account for the Year ended 31-3-1972

EXPENDITURE

To Opening Stock of Books			18,872	70
„ Cost of Paper & Ptg. Exps. for publication of books			4,955	54
„ Cost of Out-side Purchase of books			928	65
„ Cost of Job Printing and question papers			1,089	57
„ Cost of Subscriptions for News paper & Periodicals			152	52
„ Cost of M. O. & Bank Charges			38	35
„ Cost of Audit Fees			50	00
„ Cost of Conveyance Charges			188	42
„ Cost of Building Maintenance			129	60
„ Cost of Stationery and General Charges			620	91
„ Cost of Paper and Ptg. Exps. for Silver Jubilee Sowneer.			2,000	00
GAIRWANI MAGAZINE :				
To Salary for Editor	1800	00		
„ Salary for Sub. Editor	1440	00		
„ Salary for Clerk & Peon	720	00		
„ Cost of Blocks	90	60		
„ Cost of Paper Purchased	2499	86		
„ Cost of Ptg Exps.	2307	00		
„ Postage	194	45		
			9,051	91
„ Remn. of Pracharaks			3,600	00
„ Remn. of Teachers			7,200	00
„ Remn. of Clerk, Attender, and Sweeper			1,020	00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

,, Presentations for Students	800	00
,, Postage Expenses	1,370	54
,, Remn. Paid to Examiners	590	30
,, Remn. Paid to Supdts.	621	20
,, EXCESS OF INCOME OVER EXPENDITURE	10,778	20
Rs.	64,058	41

INCOME

By Sale of Books			5,871	60
,, Subscription from Members			14	00
,, Subscription from Gairwani			505	00
,, Examination Fees			5,088	01
,, Interest Recd.			2,059	43
,, Donations			17,350	60
GOVERNMENT GRANTS :				
For Pracharaks Etc.	4050	00		
,, Library thro' Central Library	425	00		
,, Gairwani Magazine	3000	00		
,, Silver Jubilee Celebrations	300	00		
			7,775	00
,, Closing Stock of Books			25,345	55
,, Suspence Account			3	22
,, Donations for Silver Jubilee			46	00
Rs.			64,058	41

For Associated Auditors,
K. Harikrishnan,
Partner.

Sai. 12—10—73

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAMSKRITHA BASHA PRACHARINI SABHA, CHITTOOR.

Balance Sheet as on 31st March, 1972.

LIABILITIES

SUNDRY CREDITORS			1,828	33
Capital Account :				
B/F Rs.	94,055	97		
Add : Excess of Income over Expenditure	10,778	20		
			1,04,834	17
Difference in Books			61	46
Rs.			1,06,723	96

ASSETS

Cash on hand				1,435	57
Cash At Banks :					
The Co-op Town Bank :					
S. D.	3079	2,232	23		
S. D.	3386	101	29		
C. D.	2941	303	21		
C. D.	1938	834	41		
				3,471	14
Fixed Deposits :					
The Co-op Town Bank		28,837	00		
The Andhra Bank Ltd.		1,000	00		
				29,837	00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Cost of Furniture :				
As per last B/Sheet	1,875	07		
Add : During the year	505	25		
			2,380	32
Cost of Building :				
As per last B/Sheet	30,693	83		
Add : During the year	234	40		
			30,928	23
Cost of Library Books :				
As per last B/Sheet	10,620	09		
Add : During the year	1,066	79		
			11,686	88
Closing Stock of Books			25,345	55
SUNDRY DEBTORS			1,639	27
		Rs.	1,06,723	96

AUDIT REPORT

We Certify that the above Statements of the Samskritha Basha Pracharini Sabha, Chittoor have been prepared in accordance with the books maintained by them and they are found to be correct to the best of our knowledge.

For Associated Auditors,
K. Harikrishnan,
Partner.

Sai. 12—10—73

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAMSKRITA BHASHA PRACHAIRNI SABHA, CHITTOOR.

INCOME AND EXPENDITURE STATEMENT FOR THE YEAR ENDED 31 st MARCH 1973

EXPENDITURE

			Rs.	Ps.
To Opening stock of books			25,345	55
,, Cost of paper and printing charges for publication of books			6,298	42
,, Cost of outside purchase of books			721	05
,, Cost of Job Printing and Question papers			1,016	48
,, Cost of subscription for News Paper and Periodicals			96	00
,, Cost of M. O. and Bank Charges			73	57
,, Cost of Audit fees			75	00
,, Cost of Telegraph ie., Address Regn.			50	00
,, Cost of Conveyance Charges			681	67
,, Cost of Building maintenance			91	30
,, Cost of stationary and general charges			458	81
Gairwani Magazine :				
To Salary for Editor	1,800	00		
,, Salary for Sub-Editor	1,440	00		
,, Salary for clerk and peon	720	00		
,, Cost of blocks	34	00		
,, Cost of paper purchased	2,011	33		
,, Cost of printing charges	2,218	00		
,, Cost of postage	174	48		
,, Cost of S. D. for Prepayment	20	00		
			8,417	81
To Remuneration of Pracharaks			3,600	00
,, Remuneration of Teachers			7,200	00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

To Remuneration of Clerk, Attender and Sweeper	1,220	75
,, Cost of presentations for students	1,150	00
,, Cost of Postage paid	1,537	06
,, Remuneration paid for Examiners	580	55
,, Remuneration paid to Superintendents	752	90
,, Excess of Income over Expenditure	12,166	70
TOTAL	71,533	62

INCOME

			Rs.	Ps.
By Sale of books			7,120	72
,, Subscription from members			68	25
,, Subscription from Gairwani			576	60
,, Examination fees			4,979	25
,, Interest Receipts			4,223	13
,, Donations			14,206	25
By Government Grants :				
For Pracharaks, Teachers	4,050	00		
,, Gairwani Magazine	3,000	00		
,, Silver Jubilee Celebration	1,000	00		
			8,050	00
By Closing Stock of books			32,240	80
,, Suspence Account			68	62
			71,533	62

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAMSKRITHA BASHA PRACHARINI SABHA, CHITTOOR.

Balance Sheet as on 31st March, 1973.

LIABILITIES

			Rs.	Ps.
SUNDRY CREDITORS			2,338	28
Capital Account :—				
B/F Rs.	1,04,834	17		
Add : Excess of Income over Expenditure	12,166	70		
			1,17,000	87
		Rs.	1,19,339	15

ASSETS

				Rs.	Ps.
By Cash on hand				664	83
Cash At Banks :					
The Co-op Town Bank Ltd.					
S. D.	3079	2,252	12		
S. D.	3386	105	83		
C. D.	2941	303	50		
C. D.	1938	838	63		
				3,500	13
Fixed Deposits :					
The Co-op Town Bank		34,362	00		
The Andhra Bank Ltd.		1,000	00		
				35,362	00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Cost of Building :—				
As per last Balance Sheet			30,928	23
Cost of Furniture :—				
As per last B/S	2,380	32		
Add : During the year	904	56	3,284	98
Cost of Library Books				
As per last B/S	11,686	88		
Add : During the year	1,038	05		
			12,724	93
Closing Stock of Books			32,240	80
Sundry Debtors			484	14
Difference in books			149	11
Rs.			1,19,339	15

AUDIT REPORT

We Cercify that the above Statements of the Samskritha Basha Pracharini Sabha, Chittoor have been prepared in accordance with the books maintained by them and they are found to be correct to the best of our knowledge.

(TRUE COPY)

For Associated Auditors,
K. Harikrishnan,
Partner.

Sai. 12—10—73

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

List of Subscribers for Gairvani

1. Sri T. Bhaskra Rao, M. A. Guntur	25-00
2. Sri Vishnubhatla Koneswara Sarma, Guntur-2	25-00
3. Sri B V. L. Narayana Sastry, M. A., Vijayawada-4	4-00
4. Sri G. Sathyanarayana, M. A., Vijayawada-4	4-00
5. Sri Lakshminarayana, M. A., Guntur-4	4-00
6. Sri D. R. K. Sarma, B. Sc., B. Ed , Guntur	4-00
7. Sri P. Sathyanarayana, M. A., Vijayawada-5	4-00
8. Sri A. Narasimhamurthy, M. A., Vijayawada-4	4-00
9. Sri P. V. Acharya, M. A., Vijayawada-2	4-00
10. Sri M. N. Guptha, M. A., Vijayawada-4	4-00
11. Sri M. Gopalakrishnamurthy Sastry, Vijayawad -4	4-00
12. Sti R. Muralidhara Rao, Vijayawada-4	4-00
13. Sri K. Narasimha Rao, M. A., Vijayawada-4	4-00
14. Sri P. S. Prasad, M. A., Guntur-2	4-00
15. Sri K. G. C. Harivithal, M. Sc., Vijayawada-4	4-00
16. Kumari P. Kalyani, M. A., Vijayawada-4	4-00
17. Sri K. Suryanarayana, M. A., Vijayawada-4	4-00
18. Sri V. V. R. Somayaji, M. A., Vijayawada-4	4-00
19. Sri Pulicherla Sambasiva Rao, M. A., Guntur-4	4-00
20. Sri Ch. Anjaneya Sastry, Vijayawada-4	4-00
21. Sri M. S. Nageswara Rao, M. A., Guntur-2	4-00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

R. N. 1845/60. *Postal R. H. No. 493.*
आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.
Licensed to Post without Prepayment. LICENCE No. 57.

भारतसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ४-००

प्रहेलिका

शीर्षे यस्य विराजते श्रुतिपदं गर्भेन्तशब्दं तथा
पादो यस्य यतीन्द्रनामलसितः घण्टावतारस्स्वयम् ।
पंक्त्यास्यारिसगर्भ्यमार्गपथिकः दुर्वादिसिंहः कविः
कोऽयं रङ्गकृपासुधांशुकलितो विज्ञोऽश्ववक्त्रार्चकः ॥

(वेदान्तदेशिकः)

विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्.

Published by Sri N. Ramanatha Aiyer B. A; B. L., Advocate
& Secretary S, B, P, Sabha, Chittoor (A. P.)
Printed by Sri T. K. Thiruvengadacharya
at Vijaya Press, Chittoor (A. P.) C 1500

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

दूरध्वनिसंकेतः – "संस्कृतम्"

वाणीं भजत गैर्वाणीम् !

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आ. प्र.) भारतम्.

संपुटः ११ | 15 SEPTEMBER 1973 | क्रमांकः ९

प्रमादीच-
भाद्रपदांकः

शकाब्दाः १८९५

मूल्यम्
०–४० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूचिका

१. अन्नं बहु कुर्वीत १
२. संपादकीयम् (प्रजाः के ?) २
३. सुभाषितानि ५
४. संस्कृतं सकलजनसमुपास्यम् ७
५. चित्तूरुनगरे संस्कृतविद्यायाः शुभोदयः ७
६. आकाशवाण्यां संस्कृते वार्ताप्रसारावकाशः परिशील्यते ७
७. तिरुपति केंद्रीयसंस्कृतविद्यापीठस्य नवीनः प्रांशुपालः ८
८. प्रतिवादिभयंकरं अण्णस्य ६२२ तमः जन्मदिनोत्सवः ८
९. डा. मंडनमिश्रैः अस्मत्सभासंदर्शनम् ८
१०. श्रीमण्डली ९
११. गणेशदण्डकः १३
१२. ग्रन्थपरिचयः १४
१३. सं. भा. प्र. सभायाः रजतोत्सवसमारोहः १५
१४. सर्वः स्वार्थं समीहते १६
१५. श्रीराधाकृष्णमहोदयानां जन्मदिनोत्सवः २१
१६. संस्कृतदिनोत्सवः २२
१७. वन्दे मातरम् २३
१८. गांधीकथा २५
१९. श्रीवेंकटेश्वर - अखंडज्योतिस्संचारक्रमः २६
२०. धनमूलमिदं जगत् २८
२१. श्रीशंकराचार्यः
२२. श्रीपेरुंबूदूरे श्रीरामानुजक्रतुः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्नं बहु कुर्वीत

अस्थिगताः प्राणाः कदाचित्
मांसगताश्च ते कदाचित्
चर्मगताः ते कदाचित्
अन्नगता अधुना तेऽनुभूयन्ते ।।

अन्नेन विना किं विद्यया?
अन्नेन विना किं धनेन?
अन्नादृते किं वेषेण?
अन्नादृते किं भूषाभिः? ।।

अन्नं दुर्लभं भारतेऽद्य
अन्नं अदृश्यं क्षेत्रेऽद्य
अन्नदा अन्नातुरा अद्य
अन्यमुखप्रेक्षकाश्चेत्थम् ।।

बह्वस्त्यन्नं भारते
बह्वस्ति तच्छन्नं भारते
राजनीतिर्हि हिनस्ति प्रजाः
को हि त्राता भवेत्प्रजानाम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

प्रजाः के ?

भारते के वा प्रजा इति प्रश्ने झटित्येव उत्तरितुं नैव शक्यं, किंचिदालोच्यैव समाधातव्यम् । मूढास्तु वदेयुः भारते विद्यमानाः सर्वेपि मानवाः तत्प्रजा इति । किन्तु तन्न सत्यम् । प्रजाप्रभुत्वनाम्नि अस्मिन् पालने येषां येषां सौविध्यं आचर्यते त एव मनुजाः प्रजा भवितुमर्हन्ति, नाऽन्ये । कार्मिकाः, कर्षकाः, हरिजनाः, गिरिजनाः, निर्दिष्टाः पश्चाद्भूता इति बहुभि र्नामभिः विभक्ताः जना एव अत्र प्रजा भवेयुः । इतरे अपि यथाकथंचित् निर्वाचिताः विधानराज्यसभासदस्याः प्रथमगण्याः प्रजा भवन्ति । तत्तोषणमेव सकलप्रजातोषणमिति भावयति सर्वकारः । अतः सामान्यप्रजानां हाहाकारेषु बधिरयत्स्वपि दिशः बधिरीभूय भूयः स्वपन्थानमेवानुयाति ।

वस्तूत्पत्ति मभिवर्धयितुं वांछन्नपि कार्मिकवर्गबन्धादिकान् उपष्टंभयति । लाभाभावेपि, प्रत्युत नष्टेपि अनुभूयमाने कार्मिकेभ्यः नियतं नभोन्यासमादिशति । अशक्ततया कर्मागारे पिहिते तन्नेतॄन् दण्डयति । कार्मिकाणां कर्मणि नियमो नास्ति, कार्मागारिकाणां च कठिननियमा इति ध्रुवं एतद्राज्यं कार्मिकाणामेवेति । आत्मवितते जाले सर्वकारेणात्मैव पातितः "अन्तर्गुडगुडायते बहिर्वक्तुं न शक्यते" इत्यन्यदेतत् ।

तथैव कर्षकविषयिणी नीतिरपि तत्प्रभुत्वमेव प्रकाशयति । कर्षकेभ्यः विद्युत् अल्पप्रतिफलेन समर्प्यते, बीजानि वितीर्यन्ते, दोहदवस्तु सस्यौषधानि सम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्यन्ते । प्रभूतं ऋणं दीयते कूपयन्त्रवृषभट्राक्टरादिसंपादनाय । ऋणे च अल्पवृद्धिः आदिश्यते, खंडश प्रत्यादीयते । अदानेपि सह्यते । उत्पादितस्य वस्तुनः मूल्यह्रासे संभाविते स्वयमेव निर्णीतमूल्यदानपूर्वकं आदत्ते । कृषिपंडितानां वाणिज्यविदुषां च साहाय्यसंपत्ति तेभ्योऽर्पयति । लाभकरसस्यारोपयाण सर्वं बलं ददाति, तद्विक्रयाय विपणिं च निर्दिशति । स्वसूचितपथा तेषु कर्षकेषु आहारधान्योत्पादने स्वस्य अलाभं, वाणिज्यसस्योत्पादने आत्मलाभं च निश्चित्य, शालिगोधूमादिकक्षेत्राणि इक्षुमूलफलीधूमपत्रादि - योग्यत्वेन परिणमय्य तत्तत्सस्यान्येवोत्पाद्य अन्नकणार्थं अक्षेत्रवद्भिः सह परिमितदापणप्रांगणेषु पंक्तिषु पुरस्सरत्सु, सर्वकारः पुरस्करोति तान् विदेशीयद्रव्यसंपादकत्वं तेष्वाकलय्य । अतः एवं उभयलाभवन्तः कर्षका एव खलु प्रजाः ।

उद्योगनियुक्ताश्च सुप्रजाःयतस्ते वेतनस्याभिवृद्धिं दिने दिने अभिवांछन्तः उत्कोचसंपादनस्पर्धाळवः स्वपुरतः उपस्थिताः समस्याः जटिलयन्ति अपाकुर्वंति विलंबयन्ति अन्यथयन्ति वा यथेच्छम् । स्वेच्छया सर्वकारं स्तम्भयन्ति चालयन्ति पातयन्ति उन्नमयन्ति वा स्वबलात् ।

हरिजनाश्च गिरिजनाश्च सर्वकारपरिवारेषु मुख्यांगीभूताः प्रमथाधिपस्य प्रमथगणा इव परिपाल्या विभाव्यन्ते । तदर्थं परिपालनविभागः कश्चन संस्थापयिष्यते इव । रक्षकभटस्यापि आधिकारिकवेष - सद्भावसमये एव अधिकारः, एतेषां तु जातित एवाधिकारः संक्रमितः । स च चौर्यं करोतु, हत्यां विदधातु वा तत्स्पर्शने ताडने दंडने वा आघोष्यते "हरिजनेषु अत्याचारा असवर्णानां" इति । प्रायशो ग्रामेषु नगरेषु वा दुर्बल एव न्यायालयं गच्छति, सबलस्तु स्वबलेनैव न्यायं साधयति अन्यायं वा । एवं स्थिते हरिजनैः कृतानामपराधानां प्रतीकारे सबलैः कृते तत्र केवलमाक्रोशः व्यर्थ एव । यदा सर्वकारः न्यायान्यायविवेचने अलसो भवेत्तदा प्रजा एव स्वीयं न्यायं येनकेनाप्युपायेन साध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येयुः । हरिजनेषु अत्याचाराणां वारणाय समुत्सुकेन सर्वकारेण तेषां सदाचारसमुद्बोधनं प्रथमतो विधेयम् । अन्यथा हरिजनाः सर्वकारसहायगर्विता दुष्कृत्यानि इतोप्यधिकतया कुर्युः । तेन असवर्णाश्च तद्दण्डनाय स्वयमेव यतेरन् । इदमाश्चर्यं जनयति पूर्वं प्रकाशिता काचन वार्ता-हरिजनेषु हरिजनानामत्याचार इति । किमियमपि वार्ता औत्सुक्यदायिनी ? किं मनुजेषु वर्णभेदपुरस्कारेणैव कलहा भवेयु ? पूर्वं युद्धानि क्षत्रियेषु परस्परं नाभवन् ? ब्राह्मणेषु वादभेदा नाऽभूवन् ? वैश्येषु वाणिज्यकोलाहलो नासीत् ? शूद्रेषु वा क्षेत्रसीमा - जलकुल्यादि विवादा नाभूवन् ? तत्र सर्वत्र अनुत्पन्नस्य आश्चर्यस्य हरिजनानां परस्परकलहे समुद्भवस्य को हेतुः ? न ज्ञायते ।

अथवा स्वदुरभिमान एव तत्र कारणम् ।

अभिमानश्च स्वार्थचिंतारहितो यदि भवेत् सह्य एव । नात्र तथा, ग्रामेषु परस्परं भेदमेव समुत्पाद्य बहुलसम्मति संपादनमेव संकल्पितमिति तस्य नीचता । न केवलं इदं दूषणम् ऊहाकल्पितं हरिजनहास्टलानां अनाथहास्टलानां प्रवर्तनरीतिं संपश्यन् सर्वकार एव तदाधिपत्यं स्वायत्तीकर्तुमुत्सुक इति एतदेव एतादृशानां मनोभावानां निरूपकम् ।

तद्यथा तथा वास्तु । हरिजनादीनां परिपालने सर्वकारः बद्धकटिरिति हेतो तदभिप्राये ते एव प्रजा नाऽन्ये ।

एवं प्रजाप्रभुत्वनाम्ना सकलप्रजासौकर्यमविगणय्य, वर्गभेदान्, वर्णविभेदान्, सिद्धांतभेदान् प्रकल्प्य परिपोष्य च भारतं दूरतः परिपीडयत इति खेदावहोयं विषयः ।

सेटास्सर्वेपि कोटीशा इति, विप्रास्सर्वेपि संप्राप्तधनधान्या इति, क्षत्रियास्सर्वेपि प्राप्तराज्या इति संघश भावनया संक्षेमसमुपेक्षणं च तेषां अप्रजात्वव्यंजक सत् देशराज्यांगानां कतिपयानां दुर्बलताया आपादकं प्रथते । संकुचितदृष्टया अनया मेधाविनां परिपालनरंगाद्दूरमवस्थापनाच्च राज्यशासनमेव शोचनीयं संपद्यते ।

सर्वेत्र सुखिनस्सन्तु सर्वे सन्तु-निरामयाः ।

***

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितानि

अनुवादकः श्री एन्. रामनाथार्यः.

(पूर्वानुबन्धः)

परपरिवादः परिषदि न कथंचित्पंडितेन वक्तव्यम् ।
सत्यमपि तन्न वाच्यं यदुक्तमसुखावहं भवति ॥ ॥ ५०० ॥

One should not indulge in taking low of another in an assembly, under any circumstance; he should not even utter that which thogh true, would hurt the feelings of others.

सुहृद्भिराप्तैरसकृद्विचारितं स्वयं च बुद्ध्या प्रविचारिताश्रयं ।
करोति कार्यं खलु यत्स बुद्धिमान् स एव लक्ष्म्या यशसां च भाजनं ॥

He is really an intelligent man who accomplishes a thing, after considering the pros and cons with his intimate friends and also himself considering carefully with his own intellect the desirability of it; such a person will be prosperous and great.

अभिनवसेवकविनयैः प्राघुणिकोक्तैः विलासिनीरुदितैः ।
धूर्तजनवचननिकरैः इह कश्चिदवंचितो नास्ति ॥ ॥ ५०२ ॥

There is no one in this world, who is not deceived by the obedience shown by newly employed servants, by the words of guests, by

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

the weeping of amonous ladies, and the deceitful talks of cunning persons.

बहवो न विरोद्धव्या दुर्जया हि महाजनाः ।

स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः ॥ ॥ ५०३ ॥

One should not make enemies of many persons. It is difficult to overcome the combination of many persons. Even a great serpent, hissing in anger is devoured by the strength of many ants.

अपूज्या यत्र पूज्यन्ते पूज्यानां तु विमानना ।

त्रीणि तत्र प्रवर्तन्ते दुर्भिक्षं मरणं भयम् ॥ ॥ ५०४ ॥

Wherever undeserving persons are honoured and deserving persons are shown disrespect, the following three results ensue viz famine, fear and death

महत्वमेतन्महतां नयालंकारधारिणाम् ।

न मुंचन्ति यदारब्धं कृच्छ्रेऽपि व्यसनोदये ॥ ॥ ५०५ ॥

The real greatness of greatmen, possessed of practical wisdom, cosists in their not giving up their undertakings, even in times of insurmountable difficulties.

सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः ।

अर्धेन कुरुते कार्यं सर्वनाशो हि दुस्सहः ॥ ॥ ५०६ ॥

A wise man gives up half when the entire thing is about to be lost; he sustains himself with the other half, since losing of everything is unbearable.

— (अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतं सकलजनसमुपास्यं

देहल्यां संस्कृतदिनोत्सवे भाषमाणः केन्द्रमन्त्री एवं प्राह–बह्वीनां भाषाणां संस्कृतं मातृका भवति । संस्कृताध्ययनेन द्वारेण भारतीयमहोन्नतसंप्रदायानां उज्वलता अवगम्येत । देशस्य एकत्वभावना संस्कृतद्वारेणैव दृढा भवेत्, मनुजस्य नैतिकौन्नत्यं च संस्कृताभ्यासेनैव वर्धेत । अतः संस्कृतं सरळमार्गेण सर्वप्रजासुलभं करणीयमिति ।

चित्तूरुनगरे संस्कृतविद्यायाः शुभोदयः

चित्तूरतपोवने ८–८–७३ दिने श्रीगौतमीजीवकारुण्यसंघसंस्कृतप्राथमिकपाठशाला, श्रीमळयालस्वामि संस्कृतोन्नतपाठशाला च समारब्धौ । एतन्निर्वाहार्थं च तपोवनपार्श्वप्रतिष्ठापितचलचित्रप्रदर्शनभवनीय आयः पंचशतं मासिकं समर्प्यते इति वाचा प्रतिज्ञातवन्तः राजमहेन्द्रपुरस्थाः गौतमीजीवकारुण्यसंघनिर्वाहकाः एतत्संघटयिता श्रीरामचन्द्रन्, एम्. ए. महोदय (प्रांशुपालः प्रोद्दूर संस्कृतकलाशालायाः) श्च अभिनन्दनार्हाः ।

आकाशवाण्यां संस्कृते वार्ताप्रसारावकाशः परिशील्यते

यात्रापौरविमानयानविभागामात्यायाः सरोजिनीमहिष्याः आध्यक्ष्ये ३–९–७३ दिने देहल्यां संस्कृतकार्यक्रमसंसूचनासंघस्समाविष्टः । तत्र समावेशे समाचारप्रसारविभागमन्त्री डा. के. गुज्राल् भाषमाणः "संस्कृतं सुसंपन्नभाषेति विषये संदेहलेशोपि नास्ति । तस्मात् तस्य आधुनिककार्यानुगुणं आकाशवाणीकार्यक्रमेष्वपि उपयोगः अत्यंतावश्यक" इति च अवोचत् । ए. ऐ. आर्. संप्रति संस्कृतपाठान् प्रसारयतीति च निवेदितम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिरुपति केन्द्रीयसंस्कृतविद्यापीठस्य नवीनः प्रांशुपालः

डा. मंडनमिश्राणां अलहाबादविद्यापीठप्रांशुपालत्वेन गमनात् तिरुपतिस्थस्य केन्द्रीयसंस्कृतविद्यापीठस्य, तिरुवनंतपुरीय-सर्वकारीय - संस्कृतकलाशालायाः प्राक्पट्टभद्रप्रवाचकः श्री करुणाकरः प्रांशुपालत्वेन नियुक्त इति परमानन्दस्थानम् ।

प्रतिवादिभयंकरं अण्णस्य ६१२ तमः जन्मदिनोत्सवः

सुप्रसिद्धस्य श्रीवेङ्कटेश्वरसुप्रभातस्य रचयिता महापण्डितः प्रतिवादिभयंकरं अण्णा इत्ययं महात्मा सौम्यजामातृयोगीद्रसमकालिकः तिरुमले श्री श्रीनिवासस्य तीर्थकैंकर्यकर्ता आसीत् । तद्रचितमेव सुप्रभातं असेतुशीतनगं गीयतेऽद्य । तस्य महानुभावस्य जन्मदिनोत्सवः श्रीमन्नारायणरामानुजजीयरस्वामिभिः आयोजितः महावैभवेन तिरुमले समपद्यत ।

डा. मंडनमिश्रैः अस्मत्सभासंदर्शनम्

तिरुपति केन्द्रीसंस्कृतविद्यापीठस्य प्रांशुपालाः डा. मंडनमिश्रमहोदयाः श्री डि. सत्यनारायणमहोदयै, श्रीधरवासिष्ठ महोदयैश्च साकं २८-८-७३ दिने संस्कृतसभासंदर्शनार्थं आयन् । तत्संदर्भे सभाकार्यदर्शिना श्रीरामनाथार्येण प्रधानमन्त्रिणा तिरुवेङ्कटाचार्येण कार्यनिर्वाहकसभ्यैः श्रीमुनिरेड्डि प्रभृतिभिः पंडितैः न्यायवादिभिरन्यैश्च तेभ्यः स्वागतमावेदितं । मिश्रमहोदयाः सभायाः ग्रन्थालयं, परीक्षाविभागं, प्रकाशनविभागं, पत्रिकाविभागं च संदृश्य प्रमुदिता अपि अपूर्णं भवनं आलोक्य अखिद्यन् । सभापरीक्षाणां केन्द्रप्रभुत्वमान्यताविषये तेषां अभिनिवेशः तेषां भाषणेषु प्रस्फुटोऽभवत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमण्डली

(नाटिका)

विद्यावाचस्पति, महोपाध्याय, साहित्याचार्य, कविसार्वभौम, कवीन्द्र,
श्री शिवशङ्करशास्त्री, साहितीसमितिः, ओंगोलु.

(पूर्वानुबन्धः)

स्वामी – हन्त! यथा ग्रीष्मे भूमिस्सन्तप्ता शीतलवर्षशीकरार्थं प्रतीक्षते, तथा मम शिष्या उत्कण्ठिता भवन्ति। मठेऽस्मिन् सर्वतापा हरिष्यन्ति ....। अष्टमघण्टिकायां अत्रागच्छतेति ता वदत यूयम्।

अनाथाः – सर्वास्ता मठमानेतुं बाध्यता अस्माकमेव (इति प्रेंखोलनादुत्थाय स्वामिनो नमस्कृत्य निष्क्रान्ताः।)

इति प्रथमरङ्गः

अथ द्वितीयो रङ्गः

(ततः प्रविशति ऊर्मिला; विंशतिवर्षीया, गौरवर्णा, तनुदेहा, कोपना च। नागिनीसदृशवेणी वक्षोजयोर्लम्बते। नेत्रे अरुणे वामे च।)

ऊर्मिला – (एधन्ती) मम आनन्द, मम सर्वस्व! (प्रेंखोलकफलकोपरिभागे उपविशति। स्वामी तस्या मूर्धानं हस्तेन परामृशन्, तामुपलालयति।) हन्त! स्वामिनः, कियत्कालमेष तापस्सोढव्यः? कियत्कालमेतां गोपिकां परीक्षन्ते? हृदयभारस्तु नितरामेधते। (अतीव रोदनं करोति सहिक्कम्।)

स्वामी – परिपक्वां स्थितिमाप्नुहि।

ऊर्मिला – स्थितिर्मम परां काष्ठां प्राप्ता। युष्मान् क्षणकालमपि त्यक्तुं न शक्नोमि। (स्वामिनो हस्ते गृहीत्वा निपीड्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च, निजवक्षसि गाढं योजयति) यद्यहं भवतस्त्यक्त्वा गच्छामि, तदा क्षणोऽपि युगो भवति ।

स्वामी – त्वं भर्तारं कथं वञ्चयित्वा आगतासि ?

ऊर्मिला – महानसकवाटं दुर्बलमुद्धृत्य पश्चान्मार्गेण आगताऽस्मि । इन्द्रियाणि मां पुरत आकृष्य नयन्ति । लज्जा द्रवीभूतप्राया । बत! मम हृदयधन! (स्वामिनः अंकतलोपरि शिरो निक्षिप्य दीर्घं निश्वस्य पार्श्वतः परावृत्य शेते) (स्वामी तु तस्या वेणिकाया अन्त्यभागे (RIBBON) विमृशति)

स्वामी– सुष्ठु कृतम् । अचिरात्ते मोक्षो भविष्यति । सर्वाणि पापानि च हरिष्यन्ते ।

ऊर्मिला – अलं गृहेण, पत्या, श्वशुराभ्यां च । भवत्पद-सन्निधाने मम सर्वस्वमर्पयामि ।

स्वामी – सर्वस्वसमर्पणेन मुक्तिस्ते ।

ऊर्मिला – गृहं गन्तुं न शक्नोमि । युष्मान् न त्यजामि च । एष मठो मम शरणम् ।

आनन्दो मम हृदये
ब्रह्मानन्दो मानसे मम ।
सान्निध्यं हि मम गुरोः
ब्रह्मानन्दः प्राप्तवत्याः ॥

(द्वारसमीपे पदध्वनिश्श्रूयते । ऊर्मिला सहसा किंचिद् दूरमपसृत्य बाष्पबिन्दून मुञ्चन्ती निषीदति । इन्दिरा, सरला, रोहिणी च दक्षिणपार्श्वतः प्रविश्य स्वामिनं नमस्कृत्य तस्यैव पार्श्वे प्रेंखोलफलकोपरि निषीदन्ति)

(सर्वाः)

दास्योऽहं दास्योऽहं
गुरुकारणलब्धभक्तानाम् ।
पिपीलिका दाब्रह्म
शुश्रूषतां पूर्णगुरुम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरला – पद्मगन्धासक्तो भृङ्गः अन्येषु पुष्पेषु कथं लगति मम स्वामिनः ! (कटाक्षविक्षेपः)

स्वामी -- न गच्छति । इदानीमपि भवतीनां भर्तुर्व्यामोहो वर्तते । तस्य हरणेनैव तापाः शाम्यन्ति ।

सरला– पापानि यदा शाम्यन्ति, तदा तापा अपि शाम्यन्ति ।

स्वामी – समस्तं लयं याति । कुतस्ते सन्देहः ?

रोहिणी – सर्वान् धर्मान् परित्यक्ष्यामः ।

सरला – धर्मेभ्यो हस्तोदकं दातुं साम्प्रतम् ।

इन्दिरा – बाढम् ।

ऊर्मिला – बत ! इदानीमपि धर्मानवलम्ब्य मा तिष्ठत । समस्ततापहारिणः स्वामिनः प्राप्तिः उत्तमो धर्मः ।

स्वामी – रोहिणि, गतयामिन्यां त्वं पूजायै कुतो नायाता ?

रोहिणी – तापस्य भारं सोढुमक्षमा भवन्तमेव ध्यायन्ती यामिन्याम् ···· ।

स्वामी – अपि भर्ता ते त्वां लालयति स्म ?

रोहिणी – तस्य हस्तस्पर्शेन मम गात्रे उत्कटस्ताप उदेति ।

स्वामी – सुष्ठु कृतम् । भर्तारमपि साधनपथे प्रवेशयसीव ज्ञायसे ।

रोहिणी – तस्य प्रस्तावेन स्वामिनः कुत मां बाधन्ते ?

स्वामी – कथं तं वञ्चयित्वा आगतासि ?

रोहिणी – बृन्दावनगोपिकाया स्सरणि मनुसृत्य कवाटं तिर्यक् विधाय तस्मिन् स्वपिति सति अहमुत्थाय अत्रागतास्मि । भवत्पादौ मुक्तिप्रदौ ।

ऊर्मिला – भवत्पादौ मुक्तिकान्तामनोमोहनौ ।

रोहिणी – भवतां बाहू मुक्तिकान्तास्वयंग्राहकौ ।

अन्याः – भवानेव अस्मद्धनं, नः प्राणाः, सर्वस्वं च ।

(स्वामी तासां शिरांसि जिघ्रति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वाः – अस्माकं हृदयपत्राणि त्रोटयित्वा भवद्भ्यस्समर्पणं कुर्मः ।

युवतीजनानां ध्रुवा गीतिः
(युवतयः प्रेंखोलयन्ति)
(अजातशिशूनां बृन्दगीतिः)
(अदृश्यगीतिः)
(सर्वाः)

ॐ नमस्सच्चिदानन्द-
रूपाय गुरवे नमः ।
ॐ नमः चित्स्वरूपाय
श्रीमत्सद्गुरवे नमः ।
श्रीमदानन्दरूपाय
श्रीमत्सद्गुरवे नमः ।
ॐ नमस्सच्चिदानन्द-
रूपाय गुरवे नमः ।।

स्वामी – ॐकारो धनुः । यूयं सर्वा जीवाः । जीवा एव बाणाः । अहं तु ब्रह्म । ब्रह्मैव तल्लक्ष्यम् । अहमेव वः प्राप्यवस्तु । एतदेव भवद्भिः ज्ञातव्यम् !

सर्वाः – यदि वयं तरिष्यामः, मठ एव तरिष्यामः । एष एव सत्याग्रहः ।

स्वामी – युष्माकं किमपि नष्टं न भवति, अहमस्मि किल सर्वस्मै ।

(सर्वा निष्क्रान्ताः)

इति द्वितीयरङ्गः

– **(अनुवर्तते)**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

गणेशदण्डकः

ले. श्री बालगणपतिभट्टः, श्रीरंगपत्तनम्.

एकदन्तः सभां पातु हरिन्मणिसुपीठगः ।
मुक्तालड्डुकरोद्भासी हेमघण्टाविभूषितः ॥

शैलशृङ्गाग्रनिलयं शीतपिष्टप्रियं विभुम् ।
शश्वन्नमामि विघ्नेशं शिशुरूपं विनायकम् ॥

जय शृंगाद्रिसंवास जय रक्तोत्पलद्युते ।
जय विघ्नाद्रिदम्भोले जय मौनीन्द्रवन्दित ॥

जय जय गणनाथ गौरीमुखाम्बुरुहानन्ददानाब्जबन्धो, सुरेन्द्रादिवृन्दारकैः पूजितांभोरुहाङ्घ्रे, नुतानन्तविघ्नाद्रिदम्भोलिरूप, जयगिरिसुताङ्गपङ्केन संसृष्टगात्र, स्वगेहावनायातममात्राकृतादेश, तत्रागतेशानसंरोधशीलाथ कृत्तोत्तमाङ्ग क्षणात् । गहनविपिनदेशनिद्रादृतैकद्विपेन्द्रास्य धारणेनेभवक्त्रेति दत्ताभिधान प्रभो, दन्तहस्ताङ्कुशाद्यायुधैर्दानवार्तिप्रद, जय गणपदशोभितेशाच्युताजादिवन्द्याङ्घ्रिपङ्केरुहारूढमूषैकदन्तोज्ज्वलादित्यकोटिप्रतीकाश, विघ्नेश मां पाहि मां पाहि मां पाहि ।

जय जय भगवन्मनस्कृन्मयूरेश, मान्यातिमान्यामरामोद, हे सिंहुवाहेन्दुचूडावतंस, द्विपारे, कृपालो, पुरा भार्गवार्तिप्रद, पशुपतिसुत, पन्नगाभूषणापूर्वतेज प्रभोल्लास, हे रत्नसिंहासनारूढ, रात्रिञ्चरार्तिङ्कराऽनन्तमूर्ते हरे, विश्ववन्द्य प्रभो, कपिल, विकट, भक्तचिन्तामणे, पत्रदूर्वाङ्कुराभ्यर्चनाप्रीत, रक्तसूनप्रियानन्तसौभाग्यदाने वदान्य, त्रयीमन्त्रवृन्दस्तुत, जय जय यदुनन्दनानन्दबन्धो, महाम्भोधिपीतर्षिवन्द्य, प्रमोदाख्य, हे सिद्धिदातस्स्वयंबुद्धिनाथाद्य, हेरम्ब, मां पाहि मां पाहि माम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जय जय जगदादिहेतो, जगत्राणहेतो, जगन्नाशहेतो, जितानङ्गजाताज, दारिद्र्यनाशाखिलाज्ञानदूरैकबन्धो, सुराध्यक्ष हे, जय जय गिरिजागिरिशोरुखेलासक्तचित्त, हस्तैश्चतुर्भिर्युतामेय, शुभ्रांशुतीक्ष्णांशुवैश्वानराक्षित्रयोपेत, तारारिपूर्वोद्भव, जय कलिकलुषान्तकानन्तसौख्यप्रदानन्तवैभवप्रपूर्ण, हेरम्ब, लम्बोदर, ब्रह्मरूपिन्नग्रगण्य हे सामजोद्दाम, मोदप्रिय ।

जय जय यतिलेखनोद्भूत, तुङ्गातटोद्भासिशृङ्गाद्रिमध्याद्रिशृङ्गोपलस्तम्भमध्यस्थ, भक्तेप्सितादानदीक्षाद्य, मां पाहि मां पाहि माम् ।

बालपूर्वगणेशेन रचितं दण्डकं शुभम् ।
ये पठन्ति नरा भक्त्य तेषां सन्मङ्गलं भवेत् ।।

ग्रन्थपरिचयः

श्रीजयन्ती

संग्रहीता श्री आ. वरदराजः,
शिरोमणिः
मूल्यम् रू. ०–७५.

अत्र संग्रहे श्रीकृष्णावतारघट्टः, गोपिकागीतं, रुक्मिणीकल्याणं इति भागवतोद्धाराः संकलिताः सौकर्याय अल्पमूल्य ग्रन्थप्रकाशनविधया ज्योतिस्संश्लेषविद्यापीठेन (नडवलूरुग्रामस्थेन, तिरुपतिसमीपस्थेन) अयं संग्रहः प्रकाशितः । आन्ध्रलिप्यां मुद्रणात् सर्वेऽप्यान्ध्रभाषाभिज्ञाः संस्कृतप्रेमिणः एतत्सौकर्यं अंगीकृत्य प्रकाशकानां प्रोत्साहं दद्युरिति सूच्यते ।

क्षीरसागरसंभवा

संग्रहीता श्री आ. वरदराजः,
शिरोमणिः.
मूल्यम् रू. ०–७५.

अयमपि संग्रह एव । अस्मिन् संग्रहे श्रीमहालक्ष्म्याः प्रादुर्भावः, (भागवतोद्धारः) श्रीलक्ष्मीनारायणवैभवं, (विष्णुपुराणो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्धारः) श्रीलक्ष्म्यष्टोत्तरशतनामस्तोत्रम्, श्रीस्तुतिश्च (विष्णुपुराणोद्धारः) संकलिताः आन्ध्रभाषायां आन्ध्रलिप्यां च छायाव्याख्यया साकं संयोजिताः । स्वल्पमूल्यपुस्तकप्रकाशने प्रवृत्तस्य ज्यो. सं. विद्यापीठस्य प्रकाशनानि विशेषतः आन्ध्रप्रदेशे आन्ध्रभाषाभिज्ञैः संस्कृतप्रेमिभिः प्रोत्साहनीयानि ।

सार्वभौमाय रू. ०–५०, अस्मद्भारतम् रू. ०–५०,
सुभाषितसंग्रहः रू. ०–५०, स्तोत्रसंग्रहः रू. ०–५०.

संग्रहीता – श्री आ. वरदराजः, शिरोमणिः, । एते संग्रहाः सर्वेऽपि निम्नलिखितसंकेतात् प्राप्तुं शक्यन्ते ।

श्री आ. वरदराजः, (अध्यक्षः, ज्यो. सं. विद्यापीठम्)
17-5-11, सुबेदारवीथी, चित्तूरु.

संस्कृतभाषाप्रचारिण्यास्सभायाः रजतोत्सवसमारोहः

विघ्नपरंपरया बहुविलंबितः एतत्सभायाः रजतोत्सवः अक्टोबरमासीय १२, १३, १४ तिथिषु निर्वर्तयिष्यते । आगन्तुकानां पण्डितानां संस्कृताभिमानिनां च कृते आतिथ्यसन्नाह आह्वानसंघेन क्रियेत ।

महात्मनां भाषणानि, संस्कृतग्रन्थप्रदर्शनम्, संस्कृतरूपकप्रदर्शनम्, संस्कृतग्रन्थाविष्करणम्, संस्कृतगेयाभिनयः, अवधानं इत्याद्यंशाः निर्वर्त्येरन् ।

सर्वेषां संस्कृतप्रियाणामुपस्थित्यै, अथवा शुभसंदेशप्रापणाय च सप्रश्रयं अर्थ्यते ।

ति. कं. तिरुवेङ्कटाचार्यः,
प्रधानमन्त्री.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वः स्वार्थं समीहते

लेखकः श्री ना. व. निगमान्तः, प्रोद्दुटूरु.

अतिविशालोयं लोकः। अत्र निवसन्तो जना असङ्ख्येयाः। तदीया आशया अप्यपरिमिताः नानाविधाश्च भान्ति। ते हि केचन देवालयीयगोपुराग्राणीव अत्युन्नतप्रवृत्तयः, केचन निम्नतलं धावन्तो जलप्रवाहा इव अतिनीचप्रवृत्तयश्च विराजन्ते। स्वरूपतो नामतश्च भिन्ना अपि एते समानलक्ष्यकाः समेधन्ते। तत्तादृशं समानं लक्ष्यं तु किं तत्? स्वार्थसिद्धिरेव, न त्वन्यत्। न सर्वेषामपि ईदृशमेव लक्ष्यमित्युच्यते। सूर्यस्तपति, वायुर्वाति, मेघो वर्षति,/पृथिवी उप्तादपि धान्यादधिकं उत्पादयति, जलं पीतं तृषितानां पिपासां शमयति, वृक्षः स्वच्छायया आतपखेदितानां श्रममपनुदति। एषां प्रतिफलप्रतीक्षा नास्ति। परसुखोत्पादनं एतल्लक्ष्यम्। एवंविधविशालहृदया नरा अतिविरलाः। अतः प्रायोवाद एवाऽयम्। एवं च मनुष्यः स्वार्थसिध्यै समाजे प्रवर्तते, वदति-समार्जयति, अनुभवति च। इदं सर्वविदितमेव न त्वपूर्वं, नाप्यविदितपूर्वं। एवन्न मया केवलमुच्यते। लोकोद्धरणाय, निष्कण्टकप्रजाजीवनाय, समाजसंस्करणाय च सततं प्रवर्तमानः स्वजीवितकाले लोकनियत्यनुसारं दुःखं-बह्वनुभूय अन्ते सकलनिराकृतः घोरदारिद्र्यसंक्षोदितः प्रतिक्षणं कृतान्तागमनं प्रतीक्षमाणः एषोपि वदति श्रूयताम्।

विजनः विशङ्कटश्च कश्चन नागरिकोपेक्षितो भूभागः। तत्र आतपात् वर्षात् वायोर्वा त्रातुमसमर्थः कश्चन अवकेशी पादपः। तस्याधस्तात् स्वहस्तमुपधानी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृत्य मलिनाम्बरधरः रूढश्मश्रुः कृशाङ्गः इतस्ततश्चलितुमप्यशक्तः कश्चिज्जीवविशेषः पाषाणादिदूषिते स्थले शेते किल ! कोऽसौ ? ग्रामान्तरादागतो यः कश्चन भिक्षुको वा ? न न । सर्वजनविदितः एतन्नगरकृतजन्मा स्वातन्त्र्यसमरयोद्धा "त्यागी"ति बिरुदभाक् सदानन्दः अयमेव । मृतो वा ? न, सम्यक् श्वसिति । परं तादृशः त्यागिवरः किमर्थं पिशाचादिवासयोग्यायां अत्र भूमौ एकाकी शयानो दृश्यते ? तत्कृतस्य अत्युत्तमस्य त्यागस्य कृते अस्मादृशैर्जनैर्दत्तं अप्रतिमं अनर्घं त्यागफलं तेनेदानीमनुभूयते । हन्त ! भवतु नाम । सोयं यत्किञ्चिद्विवक्षुरिव नेत्रे ईषदुन्मील्य आत्मानं परितो वीक्षते । तत्समीपं गत्वा किं वक्ष्यतीति शृणुमः । महता प्रयत्नेन शनैः शनैरुपविशन् पिपासाशुष्कं स्वाधरं जिह्वयाऽऽर्द्रीकुर्वन् मन्दं मन्दं वदति सः "अहं कश्चन स्वातन्त्र्यसमरयोद्धा । सदानन्दत्यागीति मां जना आह्वयन्ति । आनन्दस्तु मन्नाम्नि परं विद्यते । मज्जीविते सर्वथा तदभाव एवाभूत् ।

मातापितृविहीनोहं बाल्ये नानाविधानि दुःखान्यनुभूय, अट्टशूलादिषु (Hotel) सायंप्रातः सेवकवृत्तिमाचरन् कथञ्चित्पञ्चमकक्ष्यां (V Class) परिसमापितवान् । तदुपर्यध्येतुं नाहमशक्नुवम् । तदा काले देशस्वातन्त्र्योद्यमः प्रवृद्धो व्यराजत । सर्वत्र स्वातन्त्र्योद्योगिनः अनेके महान्तः प्रत्यहं तत्र तत्र सभाः परिकल्प्य स्वकीयैः निपुणवचोभिः प्रजामनस्सु स्वातन्त्र्याग्निं समुद्दीपयामासुः । अत एव सकला अपि प्रजाः अस्मद्देशस्वातन्त्र्यं लब्धुं, भारतात्पाश्चात्यान् बहिष्कर्तुं च अत्युत्सुकाः समपद्यन्त । गान्धिमहाशयादीनां स्वातन्त्र्यसमरयोधानां वचनानि जनान् परवशानकार्षुः । तदा तन्नियमोल्लङ्घनं न कोपि कर्तुमियेष । एतादृशस्सन्निवेशः मामपि देशस्वातन्त्र्यसमरोद्युक्तं चकार ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदाप्रभृति भृत्यजीविकां परित्यज्य यत्र यत्र स्वातन्त्र्योद्युक्तानां सभा प्रचलति तत्र तत्र गत्वा महात्मनां मुखारविन्दान्निस्सृतानि अतिमधुराणि वचोमृतान्यापीय द्विगुणितोत्साहः संवृत्तोऽहम्। भाग्यवशात्क्रमेण गान्धीनेहरूप्रभृतीनां परिचयोऽपि लब्धः। तदादेशानुसारं सर्वत्र गत्वाऽहं शान्तिप्रधानासु सभास्वनेकासु अस्मद्देशस्वातन्त्र्यावश्यकतां सयुक्तिकं उद्बोधयन् कालान्तरे प्रसिद्धः कश्चन प्रमुखश्च (Leader) संवृत्तः। पाश्चात्यप्रेरिता राजभटाः अस्मादृशान् शतवारं वासानर्हेषु कारागृहेषु निचिक्षिपुः। विविधाः पीडा उत्पादयामासुः। परन्तु अस्मच्चित्तं दृढतरं समजनि। तदा सभासु जनसङ्घे सर्वत्र मम महद् गौरवं, स्फीतो जनादरः, अत्यधिकः प्रजाविश्वासश्च समजनिषत। तदानीमेव गान्धिमहोदयाशानुसारं निम्नकुलोद्भवां काञ्चन कन्यकां उदूह्य तया सह कालं अत्यवाहयम्। अत्रान्तरे अस्मत्प्रधानलक्ष्यभूतं भारतस्वातन्त्र्यं शुभे दिने देशक्षेमबद्धकङ्कणानां सतां सन्तोषदायकं अस्माभिर्लब्धम्। प्रजाः कृत्स्ना अपि अदभ्रां मुदमलभन्त। ममापि त्यागीति कश्चन बिरुदः संलग्नः समभूत्। एवंविधः सन्तोषश्चिरजीवी नासीत्। अचिरेणैव कालेन केनचिद्द्रोहिणा गान्धिमहाशया मारिताः। देशः दुःखसागरे न्यमज्जत्। भारतस्वातन्त्र्यप्रदातारः महात्मानः स्वसन्देशान्परं अस्मभ्यं दत्वा स्वयं स्वर्गं अलञ्चक्रुः। अथ स्वतन्त्रभारते नेहरूमहाशयः प्रथमोऽभवन्। एवं कालो महान् व्यतीतः। देशे प्रजासु च प्रभूतः परिणामोऽजायत। स्वातन्त्र्यव्यतिरेकशक्तयः कक्ष्यारूपेण बह्व्यश्च उदभूवन्।

प्रजामनस्सु त्यागशीलता नितरामनश्यत्। अद्य सर्वेऽपि धनार्जनमेकमेव प्रधानकर्तव्यं मन्यन्ते। वर्षाभावात् कर्मागारेषु क्रियायाःकरणाच्च आवश्यकानां वस्तुनामुत्पत्तिः न्यूना जाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तूनां आवश्यकता तु अत्यधिका भवति । अत एव अत्यावश्यकपदार्थानां मूल्यं वाचामगोचरं पामरखेदकरं च दृश्यते । ईदृशं वस्तुमूल्यं न मया श्रुतपूर्वं, नापि दृष्टचरम् । मन्मित्राणि च प्रायशो मृताः । अथवा द्वित्रा जीवेयुः । मन्दभाग्येषु तेष्वन्यतमोऽहम् । "सम्पत्सम्पदं विपद्विपदं च अनुगच्छति" इति यदाभाणकं जगति जागर्ति तन्मज्जीविते सत्यमजनिष्ट । प्रथमं मद्भार्या मृता । अपत्यहीनोहं प्रियायाः मरणात् लोके एकाकी परित्यक्तः । स्वातन्त्र्योद्योगिनां गौरवं च कालक्रमेण क्षीणमभवत् । स्वातन्त्र्यावाप्तेः पूर्वं सहस्रशो जनाः मां द्रष्टुं भाषितुं च समायान्ति स्म । अद्य तु एकोपि मत्सविधं नागच्छति, न मां पश्यति । वीक्षणानर्हं वस्त्विव मां दृष्ट्वापि मुखं व्यावर्तयन्ति । सर्वः स्वार्थं समीहते । विद्यायाः भागधेयस्य च अभावात् न कुत्रापि विद्यालयेषु कर्मागारादिषु वा प्रवेशो लब्धः । उदरपोषणाय धनिकगृहादिषु नीचां सेवकवृत्तिं कर्तुं सत्यामप्याशायां मदीयं वार्धक्यं मां प्रतिरुणद्धि । न कस्यापि मयि दयोदेति । एवंविधायां परिस्थितौ स्वैरं तावद्वस्तु मदीयमिति एकं कुटीरमपि नास्ति । अस्मत्सर्वकारः त्यागिनां कृते उपकारकं वेतनं कल्पयामि इत्युद्घोषयति, स्वातन्त्र्यदिने ताम्रपट्टादिकमपि दीयते इति श्रूयते । पत्रिकास्वपि स्थूलाक्षरैः प्रकटीक्रियते । परं न किञ्चिन्मया लब्धम् । किं कर्तुं शक्यते ? अत एवेतिकर्तव्यतामूढः क्षुत्पिपासाकुलः क्षीणायुरहं इदानीं सर्वजननिन्दितेऽस्मिन् स्थले शयानोऽन्तकागमनं प्रतीक्षे । किं बहुना ? जनाः सकला अपि गुणवन्त एव । न कोप्यपराधस्तेषु । अस्या दु स्थितेः कारणं मदीयं पापमेव । ईदृशी दुर्दशा लोके मद्भिन्नस्य मच्छत्रोरपि मा भवत्विति सर्वेश्वरं प्रार्थये । स्वातन्त्र्यलब्धं सुखं स्वैरमनुभवन्तो जनाः स्वार्थं किंचित् विस्मृत्य, तत्प्राप्तिकारकान् देशत्यागिनः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वानपि यदि साहाय्यकरणेन पोषयेयुः तर्हि स्वर्गमलङ्कुर्वतां सहस्रसंख्याकानां स्वातन्त्र्यसमरयोधानां चित्तानि प्रीतिजृष्टानि भवेयुः। इयमेव मत्प्रार्थना। इदमेव ममाभिलषितम्। लोकाः समस्ताः सुखिनो भवन्तु। हा! किमेतत्? सदानन्दत्यागिनः शिरो नतं भवति? वागपि न श्रूयते? नेत्रे सङ्कुचतः। श्वासोपि क्रमेण विरतः। हन्त! महानुभावोयं जीवितयात्रामैहिकीं परिसमाप्य आमुष्मिकं सुखमनुभवितुं स्वर्गं प्रस्थितः। सज्जनस्यास्यात्मा शान्तिमृच्छतु। अहो! निर्घृणोयं लोकः। अभीष्टसिद्धेः प्राक् जनः तत्सहायकं पुरुषमाश्रयते, कुशलं पृच्छति, सेवते, श्लाघते, मानयति, अभीष्टप्राप्त्यनन्तरं च तं न वीक्षते, न पूजयति न स्मरति, प्रत्युत धिक्करोति, निन्दति च। लोकोपकारायावतरतां निखिलानामपि सतां गतिरेवंप्रायैव। उन्नतस्थलारोहणाय अपेक्ष्यमाणा निश्रेणिस्तत्प्राप्त्यनन्तरं दूरीक्रियते किल? इयमेव लोकनियतिः। अयमेव सकलानुष्ठितः परमाचारः। लोकानुभवशालिना दीर्घदर्शिना महाकविना सत्यमुक्तं "सर्वः स्वार्थं समीहते" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

भूतपूर्व भारतराष्ट्रपतीनां

नितान्तवेदान्ततत्त्वनिष्णातानां

श्रीमतां सर्वेपल्लि राधाकृष्णमहोदयानां

पञ्चाशीतितमजन्मदिनोत्सवसन्दर्भे

तदाध्यक्ष्यसम्मानिता एषा संस्कृतभाषाप्रचारिणी सभा तेभ्यः चिरायुरारोग्यभाग्यसंप्रदानाय भगवन्तं श्रीनिवासं प्रार्थयते ।

प्रधानमन्त्री
संस्कृतभाषाप्रचारिणी सभा
चित्तूरु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्तूरे संस्कृतदिनोत्सवः



(अत्र भाषमाणः श्री सोमयाजी, उपविष्टः अध्यक्षश्च अवगन्तव्यौ ।)

14—8—73 दिने संस्कृतभाषाप्रचारिण्या सभया **श्रीरामविलाससभामन्दिरे संस्कृतदिनमहोत्सवः** आयोजितः । **श्री पि. वि. रङ्गारेड्डिः** मण्डलन्यायाधीशः सभाया आध्यक्ष्यं अवहत् । तिरुपति केन्द्रीयविद्यापीठप्रवाचकः **श्री डा० डि. अर्कसोमयाजी** संस्कृतस्य प्राशस्त्यमुद्दिश्य उपन्यास्थत् । बहवः पंडिताः पुरप्रमुखाः बालाः बालिकाः च तत्र सममिलन् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्दे मातरम्

लेखकः श्री आर्. गोपालन्, चित्तूरु.

गैर्वाण्यां मुद्रिता "विद्यया किं प्रयोजनं ?" इति मकुटयुक्ता कथा युवतिजनविषये कामजलधिनिमग्नानां पुंसां अतिनीचप्रवृत्तिं वर्णयति ।

वर्तन्त एव बहवः पुरुषाः कामाग्निदग्धाः पशुप्रायाः क्रूर-कर्माणश्च । दूषितास्ते सज्जनैः । न ते लोके प्रतिष्ठां लभन्ते । अपि तु यथा वर्तन्ते कामेन जिताः मानवाः तथैव वर्तन्ते खलु कामजेतारश्च । यथा वर्तन्ते विटाः तथैव वर्तन्ते खलु कुलटाश्च । स्त्रीषु पुनः अद्यापि वर्तन्ते वाराङ्गनाः । वर्तन्ते पुरुषेषु अपि एवं विधाः । यथा केचन पुरुषाः स्त्रीणां विषये अविनीताः प्रवर्तन्ते तथैव काश्चन स्त्रियोऽपि पुरुषाणां विषये मर्यादां अतिक्रम्य प्रवर्तन्ते । यथा युवानः युवतीभ्य प्रेमलेखाः प्रेषयन्ति तथैव युवतयोपि युवभ्यः प्रेमलेखा लिखन्ति । यदैको युवा विमुखां युवतिं अनुनेतुं यतते तदा सा तस्य चेष्टां लोकविदितां कृत्वा तं लोकगर्हितं करोति । यः कश्चित् युवा आत्मनि प्रेमयुक्तां तिरस्कारोति तदा स एव अविनीत इति तया आरोपितनिन्दः लोकापवादपात्रं भवति । स्त्रियः स्वानुरागपात्रान् पुंसः यया कयाचन रीत्या प्राप्यैव स्वोद्यमात् विरमन्ते । यो वा युवा आत्मनि अनुरक्तां स्त्रियं उपेक्षते तस्य विनाशः विनिश्चत एव । नवयुगवनिताः अर्ध-नग्नदेहाः लज्जां विहाय सर्वेषां पुरतः बहिर्देशे संचरन्त्येव खलु । कति युवानः वृद्धाश्चापि ताः दृष्ट्वा कामपीडिताः संजायन्ते !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च काश्चन कुटुम्बिन्यः पार्श्वे स्वपन्तं भर्तृन् विहाय संकेतस्थानेषु जारपुरुषैः कामकेलीविलासं अनुभवितुं गच्छन्ति । आधुनिकनिशागोष्ठीषु (Night Clubs) पुरुषानपि स्त्रियः अतिवर्तन्ते ।

कामकलायां स्त्रीणां अशिक्षितपटुत्वं वर्तत इत्येतत् सर्वजनविदितमेव । अन्यस्थलेभ्यः आगच्छतां कृते निर्मितेषु अनेकेषु वसतिगृहेषु (Lodgings) असंख्येयाः स्त्रियः उपस्थाय देहविक्रयं कुर्वन्ति खलु । यथा लोकक्षेमकर्मः वर्तन्ते बह्व्यः स्त्रियः, तथैव लोकक्षयकारिण्यश्च ता वर्तन्ते । यथा सज्जनमानिताः स्त्रियः वर्तन्ते, तथैव तैः दूषिताः अपि ता वर्तन्ते । पुरुषेषु यथा केचन विटाः वर्तन्ते तथैव ऊर्ध्वरेतसः जितकामाः ब्रह्मणि विनिवेशितचेतसः लोकपूज्याः सर्वजनोद्धारकाः महात्मानश्च वर्तन्त एव ।

अत्र नाहं विस्मृतवान् महतीः पतिव्रताङ्गनाः क्षमया भूमिं सौन्दर्येण रतिं च जितवतीश्च । ताः सर्वेषां अस्माकं मातृतुल्या एव । भवन्तु तासां पादेषु अस्माकं साष्टाङ्गप्रणिपाताः । एतत्सर्वं अस्याः कथायाः रचयित्रे प्रणिपातपुरस्सरं निवेदयामि । सोऽपि न न वेत्ति । किन्तु मातृभाषापत्रिकासु प्राचार्यमाणाः आधुनिकयुवजनहृदयोत्साहदायिनीः अल्पसंतोषकारिणीः काश्चन कथाः पठित्वा स महाशयः एवं अलिखदिति मन्ये ।

मातृवत्परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत्सर्वभूतेषु यः पश्यति स पश्यति ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गांधीकथा

ले. श्री बालगणपतिभट्टः, श्रीरंगपत्तनम्.

रससिद्धाः कवीश्वराः स्वसूक्तिपीयूषप्रवाहमुखेन लोकानां ब्रह्मास्वादसोदरमानन्दं जनयन्तीति समे जानन्ति । एवमेव, नायकाः देशभक्ताः स्वमातृभूम्युद्धारधुरन्धराः अपि तात्कालिकीं देशदशां वीक्ष्यात्मनोऽनुभवपूर्णवचसा लोकान् सचेतयन्ति ।

राष्ट्रस्यास्य महान्नायकतिलकः नाम्नापि तिलकः बालगंगाधरः सर्वप्रथमं "स्वराज्यादानं आत्मनः आजन्माधिकारः" इति श्वेतवर्णीयानां आंग्लानां शासकानां सम्मुखे उद्घोष्य भारतीयान् जागृताँश्चकार । राष्ट्रीयस्वतन्त्रसेनानिर्मापकः शूराग्रणीः सुबासचन्द्रबोसोपि "जय हिन्द" शब्दघोषणेन द्वीपांतरवासिषु भारतीयेषु देशभक्ति - मुद्बोधयामास । स्वतन्त्रराष्ट्रस्य भारतस्य प्रथमः प्रधानामात्यः नेहरूमहाशयोपि "आराम हराम है" (आलस्यं हि महानीचम्) इति जनताजागृतिञ्चकार ।

एतेभ्यः सर्वेभ्योपि महती एका उद्बोधनोक्तिः महात्मगांधीमहोदयेन स्वमुखादुपदेशरूपेण निस्ससार "पहले करो, पीछे कहो" इति । परोपदेशवेलायां सर्वेऽपि पण्डिताः । स्वीयानुष्ठानसमये मुनयोऽपि न तादृशाः । गांधीमहोदयस्य उपदेशवाक्यस्यर्थस्तु "पूर्वं कुरु, पश्चात्कथय" इति । यः न करोति स्वयं तस्य कथने सर्वथाऽनधिकारः । निजकरणेन योऽनुभव उदेति स तु कथने सामर्थ्यमुत्पादयति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुनिसदृशः गांधी स्वकथनविषये स्वयं पण्डित आसीत्। एकदा मगनबाडी आश्रमे एकं नवीनं नियमं प्रचालयामास सः। "सर्वैरपि भोक्तृभिः उपयुक्तानि भोजनपात्राणि नियमितैः द्वित्रैः उच्चाटच प्रक्षालनीयानि" इति। "अनया नूतनया प्रक्रियया लोकेषु भेदबुद्धिः दूरीभवति। सर्वसमताभावोऽवश्यं उदेति" इति महात्मनः आशय आसीत्। अयं नियमः बलवंतसिंहेन श्रुतः। प्रत्यग्रस्य नियमस्य सः विरोधं आत्मनः कुर्वन् अवदत् "महात्मन्! अनेन कार्येण उच्छिष्टक्षालनेन आश्रमवासिषु महती अव्यवस्था जायते" इति। गांधी प्रत्यब्रवीत् "अव्यवस्थायां व्यवस्थाऽऽदानमेव अस्मत्कर्तव्यम्" इति।

एवमुक्त्वा तद्दिनस्य क्षालनकार्यम् महात्मा स्वयमकरोत् पत्न्या 'बा'या साकम्। एतेन तत्रत्येषु स्वयं प्रभावोऽभूत्। दिनात् तस्मादारभ्य यथानियमं सर्वेपि स्वस्वकार्ये तूष्णीं प्रवृत्ता अभवन्।

श्री वेंकटेश्वर-अखंडज्योतिस्संचारक्रमः

तिरुमलस्थापितेन हिन्दूधर्मप्रतिष्ठानेन ज्योतिस्संचारकार्यक्रम आयोजितः। तन्निर्वहणार्थं तत्प्रतिष्ठानाध्यक्षेण उ. वे. श्री श्रीमन्नारायणजीयर् स्वामिना श्री एस. नारायणरावस्य सहकाराय न्यूनाधिकं चत्वारिंशद्भक्तयुतो बृन्दः संयोजितः। तद्यात्रार्थं च स्वीयः रामदूतशकटोपि संप्रेषितः।

श्रीवेंकटेश्वर (बालाजी) स्वामिगर्भगृहस्थात् अखंडज्योतिषः श्रीजीयरस्वामिभिरेव ज्योतिः प्रज्वाल्य भक्तबृन्दहस्ते प्रदत्तम्। तस्य अवधानेन संरक्षणाय तत्र तत्र ग्रामेषु नगरेषु च भजनमंदिरेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदुत्पन्नज्योतिषः स्थापनाय, अखंडत्वेन सदा संरक्षणाय च आदेश, कृतः । प्रतिभजनमन्दिरं पद्मावतीवेंकटेश्वरचित्रपटः, ज्योतिःपात्रं, ताळयुग्मं वितीर्येत सद्यः । भजनमन्दिरप्रार्थनानुसारं च तदनन्तरं मर्दलादिकानि, मैकपरिकराः श्रीवेंकटसुप्रभातध्वनिफलकेन च साकं प्रदीयेरन् । प्रतिस्थलं च भजनसंघेनानेन नगरवीथीपर्यटनं हरिकथाकालक्षेपः, तुंबीकथा (जंगमकथा), नाटकप्रदर्शनं, उपन्यासाः इत्येवमादिकाः कार्यक्रमाः यथासौकर्यं निर्वर्तनीयाः ।

अपि च प्राथमिकमाध्यमिकोन्नतपाठशालासु विद्यार्थिनां कृते भक्तिनीतिवर्धकाः कतिपयश्लोकाः सम्मुद्रिता वितीर्यन्ते । तेषु परीक्षा च प्रचाल्येत । परीक्षार्थमुपस्थितेभ्यः विद्यार्थिभ्यः प्रत्येकमेकैकं रूप्यकं, तदुपाध्येयेभ्यः तत्सन्नाहितविद्यार्थिसंख्यानुगुणं प्रतिविद्यार्थि रूप्यकद्वयं च पारितोषिकं दीयेत ।

शिथिलमन्दिराणां पुनरुद्धरणाय आर्थिकसहायः प्रदीयते । हरिजनवाटीषु तु पूर्णं व्ययं अंगीकृत्य मन्दिराणि निर्माय तदर्थं दीयेरन् । एतादृशः तत्कार्यक्रमः ।

१२–९–७३ दिने श्रीवेंकटेश्वरसंचारज्योतिः चित्तूरमागच्छत् । पुरस्थैः सादरं स्वागतेन सम्मानितं तत् श्रीरामविलाससभाभवने समस्थाप्यत । ततः तत् भजनगोष्ठ्या साकं पुरवीथीषु संचरत् कलक्टरभवनप्रान्तं यदाऽगच्छत् तदा श्री वल्लियप्पन् कलेक्टरमहोदयः तत् सममानयत् । मण्डलाधिपसहिता सा भजनगोष्ठी ज्योतिषा सह चित्रगृहीता आसीत् । रात्रौ च "हरे राम" मन्त्रमात्रोच्चारणयुतं रामलीलानाटकं प्रदर्शितं, नगरजनान् मन्त्रमुग्धानकरोत् ।

बहवः भजनसंघाः हिंदूधर्मप्रतिष्ठानानुबन्धत्वमाप्नुवन् ।

भजनगोष्ठी च संस्कृतसभाभवनमानीता संस्कृतसभाभजनमन्दिरे गोष्ठीं प्रवर्त्य समभ्यनन्दत् ।

धर्मो रक्षति रक्षितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धनमूलमिदं जगत्

लेखकः श्री ना. ब. निगमान्तः, प्रोद्दुटूरु.

सर्वत्रापि जगत्यसत्यभरिते प्रामुख्यमत्यादरं
सर्वंकारि धनं समावहति, नास्त्यन्यत्क्रियासाधकम् ।
सर्वे द्रव्यसमार्जनैकधिषणाः स्वार्थप्रधाना नराः
रैदासा, भुवनं चकासति ततश्शङ्केऽर्थमूलन्त्विति ।।
कर्तुं कर्म सुखावहं कृशमपि प्रत्नं नवीनं नृणा-
मत्यन्तं श्रमदायि वा बहु धनं लोके तदावश्यकम् ।
देशक्षेमकरी कृषिः किल धनं कार्येति निश्चीयते
क्षेत्राकर्षणबीजदोहदजलक्षेपाय तत्कांक्ष्यते ।।
कर्मागारमदभ्रवस्तुनिचयप्रोत्पादकं किंचन
प्रारब्धुं प्रथमं विचेयममितं द्रव्यं हि तन्मूलकं ।
सद्वृत्तिः खलु दुर्लभा विधिवशात्प्राप्ता यदि स्यात्तदा
पूर्वं देयमदो धनं कृशधनैः उत्कोचमेवं रहः ।।
स्वीकुर्वन्ति धनं समार्जनकरव्याजेन राज्याधिपाः
केदारस्य कृते कृते च निखिलागारस्य दुर्जीविनः ।
मर्त्यस्यास्य करान्तराणि विहितान्यसमत्प्रभुत्वेन च
नानाकष्टसमार्जितस्य वसुनो नाशः किलैवंविधः ।।
लोकेऽस्मिन् सकलासु बालककलाशालासु शालासु वा
देयं तत्र धनं प्रवेशफलकं सद्वैद्यशालासु च ।
नो चेन्नास्ति समस्तलोकसुहृदोपीशस्य तत्र स्थलं
सर्वत्रापि धनं करोति मनुजस्याक्लेशमन्यत्तु न ।।
देवः सेव्य इहालयेद्य सुदिने चिन्तेति जाता यदि
सङ्गीतादिसभास्तथा हरिकथागोष्ठीश्च गन्तुं यदि ।
स्यादिच्छा प्रविविक्षुभिर्बहु धनं देयं टिकट्टूपभाक्
स्वैरं कर्तुमहोपि भैक्ष्यचरणं शक्ता न रुद्धाः किल ।।

अतः –

धनं भवति मूलं हि लोके सर्वस्य कर्मणः ।
अत एव बुधैः प्रोक्तं धनमूलमिदं जगत् ।।

***

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मिन् ब्राह्ममुहूर्ते शंखारावमिव श्रुयमाणं तं श्लोकं आकर्ण्य तत्सन्देशोपदेशा ववगत्य ससंभ्रमं बहिरागतः व्याकरण-विद्यार्थी – "को भवान् ! 'मूढमते!' इति संबोधनं कमुद्दिश्य ? मामेव किं ? व्याकरणशास्त्राभ्यासः किं मौढचाय ? शास्त्राभ्यास-मन्तरा कथं ज्ञानलाभः ?" इति पप्रच्छ ।

शंकरः– वत्स ! ज्ञानप्राप्त्यै अवश्यं विद्याभ्यासः साधनमेव । सत्यमेवैतत्, यत् तर्कव्याकरणादिशास्त्रपाण्डित्यं सत्यान्वेषणाय उपकरोतीति । परन्तु, शास्त्रसाधनेऽसमर्थैः तदभ्यासाय कालो वृथा न यापनीयः । आयुषि अन्तं गते, आसन्नमृत्युं व्याकरणसूत्रं वा शास्त्रं वा न रक्षति ।"

व्याकरणविद्यार्थी – तर्हि, शास्त्रेष्वकुशलानां अस्मादृशानां कस्तरणोपायः ? स्वामिन् !

शंकरः – ऋषिभिर्दृष्टस्सत्यमार्ग एव विश्वासपूर्वकं स्वीक-र्तव्यः सामान्यैस्तरणाय ।

व्या. वि. – किं तत्सत्यं ? उपदिश्यताम् । अवहितोऽस्मि अवश्यं स्वीकर्तुम् ।

तदा शंकरः द्वादशभिः श्लोकैः इत्थं ज्ञानोपदेशमकार्षीन्–

"यल्लभसे निजकर्मोपात्तं वित्तं, तेन विनोदय चित्तं, जहीहि धनागमतृष्णां, अर्थमनर्थं भावय नित्यं, अर्थः किमर्थः ? भार्यापुत्रा-द्यर्थश्चेत् – यावत्पवनः निवसति देहे तावत्कुशलं पृच्छति गेहे, गतवति वायौ देहापाये भार्याबिभ्यति तस्मिन् काये ।

सती सुन्दरी प्रेमभावे निबद्धेति भ्रान्ति विमुञ्च । निदाघे सरोवरो निर्जलो यथा भवति, तथा वार्धके यौवनमन्तं गच्छति । बहिःप्राणतुल्या भार्याऽपि वार्धके विरज्यते, देहावसाने विशिष्य बिभ्यति च । "केऽयं भार्येति; कोऽयं पुत्र इति; कोऽहं ? कुत आयातः ? संबन्धो ममैतेषां च ?" – इत्यालोच्य सत्यमवगच्छ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवितं पद्मपत्रगतजलबिन्दुसदृशं, चंचलं, "इदं मदीयं शरीर" मित्यभिमानेन संरक्षणेऽपि रोगग्रस्तं सत् तद्बाधाकरमेव भविष्यति । कुतः सुखं? न धनेन, न वा यौवनेन; नाऽपि परिवारेण । एतेन दुःखमेव, न सुखम् ।

कालो गच्छति; यावदायुरन्तं गच्छति तावज्जागृहि । मृत्योः पूर्वमेव जागृहि । बाल्ये तावत् क्रीडासक्तिः; तारुण्ये किल तरुणीचिन्ता; वार्धके मुनिवृत्तिर्दुर्घटा स्यादेव – एवं रीत्या काले यापिते, गोविन्दपदारविन्दध्यानाय कः कालः समुचितस्समुपलभ्येत । अतः त्वरितमेव ब्रह्मविचारे प्रवर्तस्व । सत्सांगत्यं काङ्क्षस्व । अतोऽनित्यात् संसारात् निर्ममो भूत्वा शुद्धं ज्ञानं शाश्वतीं च शान्तिं लब्ध्वा गोविन्दं भज; भज गोविन्दम् ।"

अथ स वैयाकरणतरुणः अविलम्बेन तरणोपायं दर्शयतां शंकरभगवत्पादानां सन्निधौ साष्टाङ्गदण्डप्रणामं विधाय गृहाभ्यन्तरमगच्छत् ।

भगवतो ब्रह्मणो मुखात् निस्सृतवेदराशिरिव जगद्गुरोः शङ्करस्य वदनारबिन्दा दाशुधारया विनिर्गता "भजगोविन्द" श्लोकराजिः सकलोपनिषत्सारसम्पन्ना तदानीन्तनवैयाकरणस्यैव न, किन्तु जगति विद्यमानानां समेषामपि मानवानां मार्गदर्शिकाऽभूत् ।

१०. भट्टपादः

शङ्करभगवत्पादाः शिष्यबृन्देन साकं काशीं हित्वा प्रयागक्षेत्रं प्राप्ताः । तस्मिन् तीर्थराजे निवसति शंकराचार्ये कदाचिद् ब्रह्मचारी कश्चिदागत्य "आर्याः! अस्मद्गुरुचरणाः भट्टपादमहोदयाः चितां गताः प्राणत्यागं कर्तुमुद्युक्तास्सन्ति । बहुधा निवर्तयितुं प्रयत्ने कृतेऽपि, निष्प्रयोजनमासीत् । अतः यूयमागत्य रक्षत" इति प्रार्थयामास ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शंकरः चितामुपेत्य शिष्यगणैस्सह, तत्रत्यं भट्टपादं प्रति — आर्य! किमर्थं भवान् इत्थं देहं त्यक्तुमुद्युङ्क्ते? चतुर्वेदानामूलचूडं पठित्वा अधिगतसकलविद्यो भवानिति अश्रौषम्। मद्रचितं ब्रह्मसूत्रभाष्यं तत्रभवते श्रावयितुमुत्सुकोऽस्मि"– इत्याह।

"को भवान्? किं बालयतिः सूत्रभाष्यप्रणेता शंकरोऽसि? अवसानसमये वा भवदीयसंदर्शनभाग्यं प्राप्तम्। अथातः सूत्रभाष्यं श्राव्यताम्; शृणोमि तावत्" इति भट्टपादः साभिलाषं प्राह।

शांकरभाष्यं श्रुत्वा भट्टपाद प्रशशंस। "प्राणान् त्यक्तुकामः सदीक्षं चितां गतोऽस्मि; नो चेत्, भवदीयभाष्यस्य टीकां प्रणीय कृतार्थमात्मानं भावयेयम्।" इति स चिन्तयामास। शंकरः दारुणामिमां दीक्षां कुतो गतो भवान्? भट्टपादः गुरुद्रोहं, दैवद्रोहं चाकरवम्। एतद्दोषद्वयं कथं सम्भूतमिति चेत् जिज्ञासा तर्हि- श्रूयताम्।

यदाऽहं वेदोक्तेन विधिना यज्ञयागादिकं विधाय देवताप्रीतिस्सम्पादनीयेति प्रबोधयन्नासं तदा बौद्धाः– "नैव देवता देवा वा, नैव वेदा सत्या; असत्यमशेषं तत्साहित्यं निश्शेषं दग्धुं योग्यं" – इति प्रचारे बद्धकंकणा बभूवुः। बौद्धसिद्धान्तं खण्डयित्वा वैदिकधर्ममार्गमुद्धर्तुं गाढाकाङ्क्षा मे सञ्जाता। परन्तु बौद्धशास्त्राणि समग्रमनधीत्य बौद्धैः सह वादोपक्रमं कर्तुं वा तन्मतं खण्डयित्वा स्वमत स्थापयितुं वा न शक्यमिति कश्चिदुपायो मयाऽलोचितः। बौद्धसिद्धान्तरहस्यानि ज्ञातुं भिक्षुर्भूत्वा बौद्धपण्डितं कंचिदाश्रित्य "आर्य! विद्यार्थी सन् भवत्सन्निधिमागतोऽस्मि" इति तं पर्यपृच्छम्। सोऽपि निश्शङ्कं मां शिष्यत्वेन परिगृह्य बौद्धमतरहस्यानि बोधयामास।

एकदा बौद्धपण्डितः कश्चित् अस्मद्गुरुकुलमागत्य वेदान् यथेच्छं निन्दितुमारेभे। कर्णकठोराणि तस्य दूषणभाषणानि श्रावं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रावं मदीयं मनः खिन्नमभूत्, नेत्राभ्यां अश्रुधारा निर्गता। मद्दुःखं अवगतवन्तः सतीर्थ्याः सशङ्कं मां प्रति रहसि गुरवे निवेदयामासुः – "आर्य! नाऽयं नूनं बौद्धः; अपितु, बौद्धधर्मरहस्यं ज्ञातुमागतो वैदिक इव दृश्यते; नो चेत् वेददूषणे कुतोऽयं वेदनामनुभवति; दुःखितश्च भवति?" इति।

गुरुर्यथार्थं ज्ञात्वा "बाढं, वञ्चितोऽस्मि। यथोचितमयं दण्डनीयः" इत्यादिदेश। भाविनीं विपदमविदित्वाऽहं सौधोपरितले यदा सुखसुप्तोऽभूवम् तदा ते मां अधश्चिक्षिपुः। वृक्षशाखाहतनेत्रान्तः प्रबुद्धः स्वापात् प्राणापायं अवगच्छन् वेदपुरुषं सभक्तिश्रद्धमस्मार्ष मित्थम् – "यदि वेदाः प्रमाणं, तेनैव सत्येन माऽभूवं विपन्नोऽधोगतोऽह"मिति।

वेदविश्वासो मां ररक्ष। तत् स्थलं त्यक्त्वा तत्प्रदेशशासकं सुधन्वनामानं आश्रयितुं अगच्छम् यावदहं राज्ञः सभां प्राप्नुवम् तावदेव बौद्धपण्डितैस्सा सभा पूर्णाऽऽसीत्। तेषां उपदेशान् राजा सभक्तिश्रद्धं शृण्वन्नास्त। तत्समये समीपतरवर्तिनि वृक्षे शाखाग्रभागमधिरुह्य कश्चित्पिकः कूजन्नास्त। सन्दर्भशुद्धिं द्योतयन्नहं "पिक! काकैस्सह वससि; नो चे दवश्यं प्रशंसाभाजनं भवितुं अर्हसि।" इत्यर्थयुक्तं कंचन श्लोकमन्यापदेशं विधयाऽवोचम्।

तच्छ्लोकश्रवणसमनन्तरमेव बौद्धाः प्रबुद्धाः सर्वे सम्भूय "अरे! रे!! वैदिक! कियत् साहसम्! किं वयं काकास्स्म? यद्यस्ति वाचोयुक्तिः, तर्हि वादाय सन्नद्धो भव; अलं परदूषणेन" इत्याहुः। बौद्धमतरहस्यज्ञोऽहं वादे तान् लीलया पराजित्य तन्मतं खण्डयित्वा स्वमतं - वैदिकमतं स्थापयित्वा तत्र रुच्युत्पादनार्थं तत्प्राशस्त्यं उपन्यास्थं सुबहु सुधन्वने राज्ञे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीपेरुंबूदूरे श्रीरामानुजक्रतुः

सेप्टंबरमास १५ तिथेः १९ तिथिपर्यन्तं श्रीमन्नारायणरामानुजजीयरस्वामिनां संकल्पेन अतिशान्तिनामा श्रीरामानुजमहाक्रतुः महता वैभवेन निर्वर्तितः। तत्संदर्भे श्रीरामानुजमूलामूर्तेः, आदिकेशवमूलमूर्तेश्च जटीबन्धादिक्रियाश्च निर्वर्तिताः। तत्संदर्भे त्रिचतुश्शतं पण्डिताः तत्र सममिलन्, भक्ताश्च असंख्येयाः। अवतारमण्डपे हनुमद्देवालये मठेषु च विदुषां उपन्यासाः प्रावर्तन्त। प्रतिदिनं श्रीभाष्यभगवद्विषयपूर्वाचार्यसंप्रदायादिविषयेषु विविधेषु संस्कृतान्ध्रांग्लद्रमिडभाषासु प्रसंगा निरवाह्यन्त।

सकलदिव्यदेशानां विशेषप्रदर्शनार्थं प्रदर्शनशाला काचिदुद्घाटिता, यत्र तत्तद्रूपचित्रैस्साकं श्रीवैष्णवसांप्रयग्रन्थाः मुद्रिता अमुद्रिताः अधुना दुर्लभाश्च प्रदर्शिताः।

तत्र समावेशे विशिष्टाद्वैतसिद्धान्तस्य प्रकाशः सविशेषोऽन्वभूयत।

सूचना

परिचयाभिज्ञविचक्षणसमर्थपरीक्षापाठ्यपुस्तकानि सभायां लभ्येरन्।

प्रधानमन्त्री.
संस्कृतभाषाप्रचारिणी सभा,
चित्तूरु. (आं. प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 1845/60. *Postal R. H. No. 493.*
Licensed to Post without Prepayment. LICENCE No. 57.
आन्ध्रप्रदेशसर्वकारेणानुमो. देता R. C. No. 27-A 3/65 Dated 14-7-65.

भारतसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ४-००

प्रहेलिका

कुध्रजासृष्टद्वारक्षं
अदूरमगजाननम् ।
नायकञ्च विनोपेतम्
दशनैकमहं भजे ॥

कुध्रः = पर्वतः हिमवान्, तस्मात् जाता = गिरिजा, तथा सृष्टः द्वार्रक्षः, यः, तं; अकारदूरं अगजाननम् = गजाननम्, विनोपेतं नायकं = विनायकं, दशनैकं = एकदन्तं, अहं भजे ।

– श्री बालगणपतिभट्टः, श्रीरंगपत्तनम्.

Published by Sri N. Ramanatha Iyer B. A; B. L., Advocate & Secretary S. B. P. Sabha, Chittoor (A. P.)
Printed by Sri T K Thiruvengadacharya at Vijaya Press, Chittoor (A. P.) O 1500

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार
Digitized by Arya Samaj Foundation Chennai and eGangotri

दूरध्वनिसंकेतः – "संस्कृतम्"

वाणीं भजत गैर्वाणीम्

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आ. प्र.) भारतम्.

संपुटः ११ | 15 AUGUST 1973 | क्रमांकः ८

प्रमादीच-श्रावणांकः

शकाब्दाः १८९५

मूल्यम् ०–४० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूचिका

१. एक एव मन्त्र उच्चार्यताम् १

२. सम्पादकीयम् – स्वगृहीतस्य शशस्य पादत्रयमेव २

३. वरलक्ष्मि नमोस्तु ते ४

४. रक्ष रक्ष दयानिधे ५

५. भगवद्रामानुजमहाक्रतुः, अखिलभारतीयश्रीवैष्णवमहासम्मेलनञ्च ६

६. गांधीकथा ७

७. गैर्वाणीसप्तकम् ८

८. महाराष्ट्रपतञ्जलिः ९

९. गैर्वाणी सा जयतु सुचिरं भारते राष्ट्रभाषा १३

१०. नमामि तां सदा गोदाम् १४

११. सुभाषितानि १५

१२. श्रीमण्डली १७

१३. मुक्कूर श्रीमदळहियशिंगरविंशतिमाला २१

१४. जातिविध्वंसकानि सप्तमहापातकानि २३

१५. काचतंतयः कथं उत्पाद्यन्ते ? २४

१६. विद्यया किं प्रयोजनम् ? २५

१७. परीधावि - उत्तरायणपरीक्षासु सर्वप्रथमतया उत्तीर्णाः २८

१८. श्रीशंकराचार्यः

१९. प्रमादीच - दक्षिणायनपरीक्षाणां समयसूची

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एक एव मन्त्र उच्चार्यताम्

अशनेराशीविषस्य चैक एव मन्त्र उच्यतां
मताभिमानः कुलाभिमानो मूढविश्वासः इति ।
नास्त्यस्य देशकालाधिकरनियमो लेशतोपि
न संदर्भो वा बिचेतव्यो यतस्सदैव तेजस्वी अयं ॥

अन्नलोपस्य पानीयलोपस्य वा
आतपतापस्य वर्षपातस्य वा
स एव मन्त्र उच्चर्यतां, तदेव तन्त्रमनुष्ठीयताम् ॥

निम्नोद्धरणमुद्धुष्यतां पश्चात्तनाः पुरस्क्रियन्ताम्
हरिजननाम सभासूच्यतां हरहरमहादेव शंभो !
ऋणानि प्रख्याप्यन्तां तृणान्यपि न दीयन्तां
गृहा निर्मीयन्तां स्पृहयालुभ्यो दीयन्तां ॥

व्ययमात्रं प्रस्तूयतां अभिबृद्धिस्तु नाम्नाप्यास्ताम्
व्ययासमर्था दण्डयन्तां भयात्ते निश्शेषयन्तु निधीन् ।
प्रतिसमावेशं मन्त्र उच्चार्यतां प्रतिवेलं तन्त्रमनुष्ठीयताम्
सिद्धिस्तु करे ते वृद्धिरपि भवेत् ओघानाम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

स्वगृहीतस्य शशस्य पादत्रयमेव

(తాఁబట్టిన కుందేటికి మూడే కాళ్ళు)

आंग्लप्रभुताकाले विरला अपि बृहत्पारिश्रामिकाः आंग्लेयानुकूलाः आसन्, तथैव संस्थानाधिपा अपि बहवः आंग्लप्रभुतानुकूला अचेष्टन्त, अन्यथा स्वसत्तायाः नाशभिया । स्वातंत्र्योद्यमनायकाश्च बहुजनसमवायसंपादनार्थं भेदोपायेन कार्मिकान् कर्षकांश्च वशीकृत्य बह्वी आशाः प्रकल्प्य तेभ्यः तान् व्यघटयन् । तथैव पाठशालाभ्यः छात्रात् परावर्तयन् ।

दैवगत्या कालगत्या वा स्वातंत्र्यं लब्धम् । तेन सहैव नीतिरपि स्वानुकूलफलानि दातुमारेभे । पारिश्रामिकाणां संघाः सावष्टंभाः, तदर्थं सर्वकारेण काचन शाखा विभक्ता । तत्फलतया अल्पानि व्रणानि पुनःपुनरालोडचयन्ते स्म महाव्रणीक्रियन्ते स्म च । किन्तु व्रणानां मध्ये एकमपि न विरोप्यते स्म । सर्वाण्यपि कर्कटीप्रणत्वेन व्यपरिणमन् । तदर्थं बह्व्यः योजनाः क्रियन्ते, महान् धनक्षयश्च क्रियते । किन्तु परिश्रमविघात एव वर्धते प्रतिक्षणम् । उत्पादनवर्धनमाकांक्ष्यते, किन्तु तद्वर्धन (छेदन) मेव क्रियते ।

संस्थानाधिपा निष्कासिताः, आग्रहारिका अधः पातिताः, श्रोत्रियाः निराधाराः कृताः, मान्यक्षेत्राणि विमार्गितानि, देवालयादिषु कैंकर्यार्थं स्थापितानि च क्षेत्राणि विना विवेचनं प्रतिहतानि । फलतया बहवो जीविकाविरहिताः आसन्, तदाश्रिताश्च लक्षशः कोटिश्च । धार्मिकसंस्थासु कैंकर्यस्य महान् व्याघात आपतितश्च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं च विचित्रं फलं समुद्भूतं, संस्थानाधिपानां शतशः नाशे एकतस्समुत्पन्ने, अपरतः सहस्रशः लक्षशश्च ततोप्यधिकवैभवाः कोटीश्वराः समुदतिष्ठन् । कतिपयसंस्थानाधिपतीनां नाशेन रक्तबीजन्यायेन लक्षशस्ते समुदभवन् । दरिद्राणां तु परिस्थितिश्च यथापूर्वा ; कुत्रचित् ततोपि हीना च वर्तते, यतः दरिद्रान् व्याजीकृत्य भूक्षेत्रधनादिकमपाहरन् राजकीयप्रबलाः । अद्यत्वे पंजाबराष्ट्रे विधानसभाध्यक्षस्य व्यवहार एक एवालं उदाहरणलेशाय । अप्रकटिताः अंतरंतश्शमिताः व्यापारास्तु कति वा भवेयुरिति न संख्यातुं शक्यते ।

कार्मिकप्रश्नाश्च "प्रहर्तुरेवोरगराजरज्जवो जवेन कण्ठं प्रपेदिर" इतिवत् सर्वकारं विह्वलीकुर्वन्ति । क्षणे क्षणे कर्मागाराः स्थगिता भवन्ति, वस्तूत्पादनं च शून्यप्रायमेव भवति । निर्माणिकासु वायुयानिकायां कोशेषु पट्टिकाशकटसंस्थायां अन्ततः राज्यांगयन्त्रभागेषु सर्वेष्वपि च येन केनापि व्याजेन बहुलं बन्धाः प्रवर्तन्ते । फलतः प्रजानां असौविध्यं, नित्यकृत्यानां प्रतिष्टंभः, सर्वकारस्य च हस्तपादबन्धः इति महतीयं शोचनीया दशा ।

इयं वेदना न पर्याप्तेति किल कर्षकभृतकानां कृते अपि पृथक् काचन शाखा संस्थापयितुं अभिलष्यते सर्वकारेण, येन अन्नकणा अपि अद्यतोपि दुर्लभा भविष्यन्ति ।

आत्मकृतेनैव दोषेण जायमानां विपत्तिं जानन्नपि सर्वकारः तस्यास्तथात्वमनंगीकृत्य होमियोपथिकचिकित्सामनुसृत्य कारणौषधिसत्त्वमेव कार्यनिवारणायोपयुंक्ते इति महद्दौर्भाग्यम् ।

विवेकशीलस्य विशेषगौरवम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरलक्ष्मि नमोस्तु ते

लेखकः संगीतभूषणम् श्री ति. गो. अनन्तसुब्रह्मण्यः, तिरुपति.

रागः – सरस्वती * आ. स रि म प ध सं

तालः – आदि अ. सं नि ध प म रि स

पल्लवी

वरलक्ष्मि नमोऽस्तु ते
वरदे वसुप्रदे श्री – ।। वरलक्ष्मि ।।

अनुपल्लवी

वासुदेवप्रियकान्ते
वासवाद्यमरविनुते ।। वरलक्ष्मि ।।

चरणम्

नरहरिहृदयनिवासिनि
नारायणि नतपालनि
नारदगानविनोदिनि
नारायणमनोमोदिनि ।। वरलक्ष्मि ।।

---

* सरस्वतीरागः वाचस्पतिमेलरागजन्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्ष रक्ष दयानिधे

लेखकः श्री आर्. गोपालन्, चित्तूरु.

वैकुण्ठवासी कमलानायकः यदा यदा भूतले धर्मस्य ग्लानिः, अधर्मस्य अभ्युत्थानं च संभवति तदा तदा अत्राविर्भूय अधर्ममुन्मथ्य धर्मसंस्थापनं करोति ।

यदा भारतदेशः पाश्चात्यैः निपीडितोऽभवत् तदा गांधी महात्मा अस्मिन् देशे आविर्भूय भारतदेशस्य स्वातन्त्र्यसंस्थापनार्थं महान्तमुद्यमं अक्रोत् । अतिविनीतस्वभावः दयार्द्रहृदयः परसौख्यपरायणः अहिंसासत्यविभूषणः अयं महात्मा देशक्षेमार्थं लोकक्षेमार्थं च वाचामगोचरं दुस्सहं क्लेशमनुभूतवान् । अयं स्वस्य आयुषः अर्धभागं कारागेहे एव क्षपितवान् । निराडम्बरः ऋजुमार्गानुगः अयं महात्मा यदा देशः स्वातन्त्र्यं अलभत तदा एकामपि अधिकारपदवीं न स्वीकृतवान् ।

देशस्वातन्त्र्यानन्तरं नीतिमार्गे प्रजापरिपालनविधानमुद्दिश्य अस्य मनसि चिन्ता अपरिमिताऽभूत् । एवंविधो महात्मा केनचित् दुरात्मना हटात् मारितः । एष एव अस्य महात्मनः अस्माभिः कृतः सत्कारः । विचित्रोऽयं लोकः ।

स्वातन्त्र्यरजतोत्सवसंभ्रमोऽपि सर्वकारैः अतीव कुतूहलपुरस्सरं आचरितः । अद्य पञ्चविंशतिसंवत्सरानन्तरं का वा भारतदेशस्य परिस्थितिरिति आलोचने कृते भग्नहृदयाः एव वयं भवामः । सार्वजनीनसौभाग्यसभाजनं राज्यशासनमात्रपरिमितं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तते । पूर्वतनराजानः देशक्षयकारकाः इति मत्वा ते राज्यभ्रष्टाः कृताः । तेषां स्थाने मन्त्रिणः तदनुगाश्च प्रजारुधिरसिक्तानां सुखसंततीनामास्वादने निरताः संप्रवृत्ताः । गांधीमहात्मा तु रामराज्यं संस्थापयितुं प्रयत्नमकरोत् । अपितु तद्विपरीतराज्यसंस्थापनमेव अस्मदृष्टिगोचरीभवति । प्रजाः निराशास्संजाताः । नीतिपरिपालनस्थाने आयुधपरिपालनमेव संदृश्यते ।

लब्धाधिकाराः देशनायकाः स्वार्थसंपादननिरताः वर्तन्ते । अत्यावश्यकवस्तूनां मूल्यानि दुर्भराणि वर्तन्ते । सर्वकारस्य करनिपातविधानं प्रजाहृदयविदारकं सञ्जातम् । प्रजाः प्राणेष्वपि निराशाः संभूताः । एवं देशबन्धवः देशविरोधिनः संप्रवृत्ताः ।

अविनीतिपिशाचस्य घोरताण्डवरंगो देशस्संभूतः । का वा अस्य देशस्य गतिः ! को वा अस्य संत्राता! कुत्र गतः कमलानाथः! अप्ययमपि स्वधर्मं विस्मृतवान् । यथा तथा वा भवतु । हे मधुसूदन त्वमेव शरणं अस्माकम् । भवतः अवतारं प्रतीक्षाणा भवामः। रक्ष रक्ष दयानिधे ! ! !

भगवद्रामानुजमहाक्रतुः अखिलभारतीयश्रीवैष्णवमहासम्मेलनञ्च

श्रीमदुभयवेदान्ताचार्यपीठस्य आध्वर्येण भूतपुर्यां (श्रीपेरुंबुदूरु, तमिलनाडु) १५-८-७३ प्रभृति १९-८-७३ पर्यन्तं पंच दिनानि प्रचलिष्यतः । तत्संदर्भे आदिकेशवमूर्तेः भाष्यकारमूर्तेश्च अष्टबन्धनं महासंप्रोक्षणं च महावैभवेन आचर्येयाताम् ।

रामक्रतु-अष्टोत्तरसहस्रकुंडक्रत्वादिनिर्वाहकाणां श्री श्रीमन्नारायणरामानुजजीयरमहाराजानां संकल्पेन आचर्यमाणा एते सर्वे कार्यक्रमाः महावैभवेन संम्रियेरन् ।

आस्तिकास्सर्वेपि संभूय भूयः भगवद्भागवताचार्यकृपाविषयाः कृतार्थतां भजन्त्विति प्रार्थना ।

प्रधानमन्त्री.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गांधीकथा

रचयिता विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्.

महात्मनः प्रभावोऽवश्यं महानासीत् । तस्य दर्शनम्, तेन वार्तालापः, तस्यानुयानं इत्यादीनि समानपि तं प्रति मुग्धान् कुर्वंति स्म । न केवलं बाला युवतो वृद्धाः, स्त्रियोपि भिन्नभिन्न-दशामापन्नाः तस्य महात्मनः गांधीमहोदयस्य दर्शनादिभाग्यं बहुधा वांछन्ति स्म । तेषां लालसा महती आसीत् ।

महात्मनस्तस्याश्रमवासिनस्तु सदा आत्मनः आश्रमनायकस्य वासूनपि परित्युक्तं सिद्धा आसन् । केचित्तु कायेन मनसा वाचा तद्भक्ता आसन् । एतादशेष्वन्यतमः श्रीमगनलाल्भाई महाशयः । गांधीमहोदयस्य मनसि यत्कार्यं सर्वप्रथमं भासते स्म तस्य रचनात्मकानुष्ठाने प्रथमं मगन्भाई एव स्वशक्ति सुतरां विनियुंक्ते स्म ।

१९२८ क्रिस्तहायने महात्मनः निजकार्यदर्शिस्थानालंकृतः मगनः ऐहिक्याः यात्रायाः अन्तिमवन्दनं कृत्वा दिवं जगाम ।

आत्मप्रधानतमानुचरस्य मृत्युना नितरां दुःखितः गांधीमहा-शयः शोकसभायां स्वेनैव रचितं भजनं "मङ्गल मन्दिर बोलो" गायन् भगवतः पुरतः उपाविशत् । अवसाने शोकस्यांतिमां दशां आपन्नस्य तस्य मुखात् स्वयं निस्ससार "अद्यायं गांधी मगनविहीनः विधवाऽभूत्" इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गैर्वाणीसप्तकम्

कविः – काव्यतीर्थ ज. व्यं. पल्लेवार उपाख्यः जयेशः, पुसद.

संस्कृतोत्तमवाग्रम्यां प्रजाकामप्रकाशिनीम् ।
नित्यं पठन्तु गैर्वाणीं गीर्वाणप्रीतिदायिनीम् ।।

साहित्यशास्त्रसंपन्नां नानाविषयाभूषिताम् ।
नित्यं पठन्तु गैर्वाणीं साहित्यानंददायिनीम् ।।

नानारससमाकीर्णां विनोदपरिवाहिनीम् ।
नित्यं पठन्तु गैर्वाणीं वाग्सुधारसवर्षिणीम् ।।

ललितकारसंपन्नां शब्दसौरभशालिनीम् ।
नित्यं पठन्तु गैर्वाणीं ब्रह्मानन्दसधर्मिणीम् ।।

नानाविचारसंपूर्णामार्यसंस्कृतिभूषिताम् ।
नित्यं पठन्तु गैर्वाणीं सरस्वत्यनुरागिणीम् ।।

गैर्वाणीं प्रकृतार्थाढ्यां बहुधर्मप्रकाशिकाम् ।
नित्यं पठन्तु गैर्वाणीं गुणगौरववर्धिनीम् ।।

मासि मासि सुसंपूर्णां विधोर्बिंबवदादृताम् ।
नित्यं पठन्तु गैर्वाणीं सकलां लोकचेतनीं ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्मरणीयाः महापुरुषाः – २.

महाराष्ट्रपतञ्जलिः

ले. श्री डि. वि. श्रीनिवासदीक्षितः, गुण्टूरु.

वेदाङ्गेषु प्रधानतमं व्याकरणशास्त्रम् । अत एव भगवान् पतञ्जलिः प्राह –

"षट्स्वङ्गेषु प्रधानं व्याकरणं, प्रधाने च कृतो यत्नः फलवान् भवति" इति ।

शिक्षादिषट्स्वङ्गेषु व्याकरणं वेदस्य मुखमित्युच्यते । यथा मानवस्य सर्वाङ्गेषु मुखं प्रधानं भवति तथैव वेदस्य व्याकरणं मुखमित्युक्तत्वात् तस्य प्राधान्यं सम्पद्यते । अत एव –

मुखं व्याकरणं तस्य ज्यौतिषं नेत्रमुच्यते ।
निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे ॥
शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान् प्रचक्षते ।

इत्युक्ति समुचिता भवति । व्याक्रियन्ते व्युत्पद्यन्ते शब्दाः अनेनेति शब्दज्ञानजनकं व्याकरणमिति निर्वचनम् । व्याकरणशास्त्रं शब्दानुशासनमित्यपि कथ्यते । अनुशिष्यन्ते अपशब्देभ्यो विविच्य कथ्यन्ते साधुशब्दा अनेनेत्यनुशासनं शब्दानुशासनमिति । सूत्रवार्तिकभाष्यव्याख्यानादिरूपं शास्त्रमित्यर्थः । शिक्षानन्तरं व्याकरणं द्वितीयवेदाङ्गतामावहति ।

गोपथब्राह्मणमुण्डकोपनिषद्रामायणमहाभारतादिग्रंथाः शब्दशास्त्ररूपेऽर्थे व्याकरणशब्दं चिरात् प्रयुञ्जते । भाषानियमप्रदर्शनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हि व्याकरणशास्त्रस्य मुख्यं कार्यम् । अपि च व्याकरणशास्त्रं न्यायमीमांसादिसर्वशास्त्रोपकारकम् । अत एवोक्तम् –

"काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति ।

पाणिनीयं व्याकरणम् –

अखिलभाषाविर्भावभूमि - सुरभारतीज्ञाननिदानस्य पाणिनिमहर्षेः तपःफलं व्याकरणं अष्टाध्यायिनाम्ना प्रसिद्धम् । अस्यां अष्टौ अध्यायाः, प्रत्यध्यायं चत्वारः पादाश्च सन्ति । अष्टाध्याय्यां आहत्य ३९९६ सूत्राणि सन्ति । इन्द्रवायुभरद्वाजभागुरिपौष्करसादिचारायणकाशकृत्स्नादिपरमप्राचीनाः त्रयोदश वैयाकरणाः पाणिन्युक्ताः । किन्तु पाणिनेरष्टाध्यायी भूमण्डले सर्वाणि व्याकरणान्यधरीकृत्य विराजते । पाणिनिव्याकरणस्य वार्तिकपाठः कात्यायनकृतः । कात्यायन एव वररुचिनाम्नापि व्यपदिश्यते । सर्वेष्वपि व्याकरणेषु लौकिकवैदिकोभयशब्दसाधकतया पाणिनीयव्याकरणस्यैव प्राधानं विद्यते ।

महाभाष्यरचना –

महाभाष्यं भगवत्पतञ्जलिविरचितम् । व्याकरणशास्त्रार्णवस्य अपूर्वं, अनुपमं, असाधारणं ग्रन्थरत्नं महाभाष्यम् । अतीव सरलेन सरसेन प्रकारेण व्याकरणविषयोऽस्मिन् प्रतिपादितः पतञ्जलिमहर्षिणा । पतञ्जलेः महाभाष्यं न केवलं व्याकरणशास्त्रस्य प्रामाणिकं, अपि तु संस्कृतवाङ्मयस्यैव प्रमाणभूतम् । अत एवोक्तं भर्तृहरिणा वाक्यपदीये –

"कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने" ।। इति ।

महाभाष्ये प्रतिपादितो विषयः अपारः । तस्याध्ययनमेव असाधारणविषयः । तस्य मननं अशेषशेमुषीवतामेव सुलभो विषयः । महाभाष्यभाषान्तरीकरणं पतञ्जलेरंशरूपिणः एव साध्यं नान्यस्य ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

तौ गुरुशिष्यौ धन्यौ –

प्रातः स्मरणीयः, अनेकशास्त्रपाण्डित्यपरमावधिः, शास्त्रग्रंथरचयिता, महाभाष्यस्य महाराष्ट्रभाषान्तरीकरणकर्ता च महामहोपाध्यायः श्रीवासुदेवशास्त्री महोदयः ।

श्रीवासुदेवशास्त्रिणः जन्म शालिवाहनशके १७८५ संवत्सरे अधिकश्रावणकृष्णषष्ठ्यां "सातारा" नगरे अभवत् । तस्य जनकः महादेवशास्त्री महाशयः । वासुदेवशास्त्रिणः शैशव एव (द्वितीयवत्सरे एव) जनकः स्वर्गं गतः । पितामहोऽपि कालहतकेन अपहृतः । श्रीवासुदेवशास्त्रिणः पितामहः व्याकरणशास्त्रप्रवक्ता, शब्देन्दुशेखरस्य व्याख्याता, विद्वन्मकुटरत्नबिरुदाञ्चितश्च भास्करशास्त्री अभ्यंकरः । पितृपितामहवियोगात् वासुदेवः अद्वितीयोऽभवत् । तदा भास्करशास्त्रि - अभ्यंकरस्यान्तेवासी रामशास्त्री गोडबोले वासुदेवशास्त्रिणं पोषयितुं बद्धकंकणोऽभूत् । आचार्यस्य पौत्र इति अत्यन्तादरेण तं वीक्षते, पोषयति स्म च । श्रीरामशास्त्रीमहोदयः स्वशास्त्रवैदुष्यं सर्वमपि वासुदेवाय दत्वा महारष्ट्रपतञ्जलिमकरोत् । तौ गुरुशिष्यौ धन्यौ ।

आचार्याणां आचार्यः –

१८९१ संवत्सरे रामशास्त्री स्वशिष्यं वासुदेवशास्त्रिणं "पूना"नगरं प्रति प्राहिणोत् । तत्र वासुदेवशास्त्री अभ्यंकरः संस्कृतविद्यालये पंडितस्थानं लब्धवान् । न्यायमूर्तिना महादेवगोविन्दरनडेमहोदयेन सिस्नेह । तदा एव मुम्बापुरीस्थकलाशालासु उत्कृष्टतमायाः सुप्रसिद्धायाः फेर्गुसन् - कलाशालायाः प्रधानसंस्कृताचार्यस्य श्रीवामनशिवराम आप्टेमहोदयस्य अकालमरणेन तत्स्थानं श्रीरनडेमहाशयस्य गुणवर्णनपत्रदानेन (with Recomandation) वासुदेवशास्त्रिणे दत्तम् । अस्यां पदव्यां ३६ संवत्सरान् स्थित्वा अमरवाणीं विद्यार्थिहृदयकुवलयेषु निक्षिपन्, अशेषशेमुषीवतः कुर्वन् १९२८ वत्सरे श्रीशास्त्री महोदयः विश्रान्तः । तत्कलाशालास्थानां शास्त्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोविदानां सकलसन्देहान् सुलभतया निराकुर्वन् विश्रान्तोऽपि चिराय स्थितः। सर्वशास्त्रवैदुषीभूषितः, सकलगुणसम्पन्नः, सहृदय-समाश्रयणीयः, सर्वदाऽभिगम्यः, सरसः, श्रीवासुदेवशास्त्री महोदयः "आचार्याणामाचार्य एव"। तदेव सर्वथा सर्वदा सत्यम्।

महाराष्ट्रपतञ्जलिः –

एते हि शास्त्रिचरणाः बहून् छात्रान् व्याकरणादिशास्त्राणि अध्यापयन्। विदुषामेतेषां वंशे व्याकरणशास्त्रास्याध्ययनं परंपरया एव अखंडितं प्रचलितमासीत्। किन्तु श्रीवासुदेवशास्त्रिभिः विशिष्य व्याकरणशास्त्रे अनितरसाधारणं प्रभुत्वं संपादितम्। अत एवायं पतञ्जलिप्रणीतं महाभाष्यं महाराष्ट्रभाषायामनूद्य "महाराष्ट्रपतञ्जलिरभूत्। जगतीतलेऽस्मिन् पतञ्जलेर्महाभाष्यस्य भाषान्तरीकरणकर्ता एतावत्पर्यन्तं श्रीवासुदेवशास्त्री महोदयः एक एव। अनेन संस्कृतभाषायाः व्याप्त्यर्थं कृतां अनितरसाधारणां कृषिं ब्रिटीष् - प्रभुत्वं ज्ञात्वा श्रीशास्त्रिणं "महामहोपाध्याय" बिरुदाङ्कितमकरोत्। सङ्केश्वरपीठाधीश्वरः "विद्वद्रत्नं" इति व्याहरत्। अस्य पुत्रः महामहोपाध्याय श्रीकाशीनाथवासुदेव अभ्यकरपण्डितः। श्रीशास्त्रीमहोदयेन –

१. काव्यप्रकाश, २. यतीन्द्रमतदीपिका, ३. पतञ्जलि-योगसूत्राणि ४. न्यायकोशमित्यादीनि परिष्कृतानि।

१. ब्रह्मसूत्राणि, २. शङ्करभाष्यम्, ३. महाभाष्यम् इत्यादीनि भाषान्तरीकृतानि। (महाराष्ट्रभाषायां)

१. भगवद्गीताव्याख्या, २. परिभाषेन्दुशेखरव्याख्या, ३. मीमांसान्यायप्रकाशव्याख्या, ४. लघुशब्देन्दुशेखरव्याख्या इत्याद्यनेकाः कृतयः विरचिताः।

१९३९ संवत्सरे श्रीशास्त्रिचरणाः परलोकं गता अपि स्वीयैः सुचरितैः सुरचितैः महाभाष्यादिभिः ग्रंथैः कीर्तिरूपं प्राप्ताः अत्रैव निवसन्तीति मे हार्दं वचनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गैर्वाणी सा जयतु सुचिरं भारते राष्ट्रभाषा

लेखक: विद्यानिधि: वे. मोरेश्वर ग. उपाध्याय: ज्योतिषी अरगे.
(कारवार)

प्राचीना या जगति सकले देवभाषा समेषाम्
सर्वा भाषा: सकलविधिभि: संश्रयन्ते सदा यां ।
रक्ष्या पूता भरतसुमहासंस्कृति: सा ययैव
गैर्वाणी सा जयतु सुचिरं भारते राष्ट्रभाषा ॥

यस्यै दत्ता सकलसमये चादितो वाक् समासे
यस्या: उक्तौ ललितसरसा श्राव्यता सौष्ठवं च ।
विद्वांसस्तु प्रथितमतयस्सन्ति यस्या: प्रसादात्
गैर्वाणी सा जयतु सुचिरं भारते राष्ट्रभाषा ॥

यस्यां संति श्रुतिधनमहाभारताद्या: पुराणा:
दैवी वाणीत्यनिशमखिलै: स्तूयमाना पवित्रा ।
सांगा वेदा: समजनिषतानादयो यत्प्रसादात्
गैर्वाणी सा जयतु सुचिरं भारते राष्ट्रभाषा ॥

या वाणीशमुखाद्विनिर्गतवती वेदस्वरूपेण या
धर्माधर्मविवेचनेऽतिनिपुणा विज्ञानसंधायिनी ।
कर्माचारविधानबोधकुशला दक्षा बुधाराधिता
गैर्वाणी जयतात् महीशुभकरी सा राष्ट्रभाषा भवेत् ॥

सर्वलोकप्रियकरी विश्वशांतिप्रदायिनी ।
लोककल्याणसंधात्री जीयाद्गीर्वाणभारती ॥

4

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमामि तां सदा गोदाम्

लेखकः श्री ना. ब. निगमान्तः, प्रोद्दुटूरु.

गुणालयां सदा भजे विराजदाननाम्बुजां
नमत्कराङ्गुलीचलद्विवर्णकीरभासिनीम् ।
अनल्परागिरङ्गराजचित्तहारिणीं सतीं
भुवङ्गतामिव श्रियं च विष्णुचित्तनन्दिनीम् ॥

सुशीलविष्णुचित्तभाग्यसन्ततेस्सुमावृते
वने तुलस्यलङ्कृते शुभंयुतारके दिने ।
कुलीरमाससङ्गते जनिं कृतां नमामि तां
प्रसिद्धविल्लिपुत्तुराख्यपत्तने विभासिनीम् ॥

शिशुत्व एव कृष्णचेष्टितेषु बद्धमानसां
मनोज्ञपद्यसंस्तुतप्रियामनिन्द्यवैभवां ।
नमस्करोमि सच्चरित्रशालिनीं सुमालिनीं
विशुद्धभक्तिपूतसुन्दराङ्गलासिनीं शुभाम् ॥

अवाप भुक्तमाल्यदेति नाम या महाशयै-
र्वितीर्णमाशु निर्मलं फणीशभोगशायिने ।
समर्पणाद्धृतोज्झितस्रगुत्तमस्य सद्यशः
भजामि तां स्मिताननां समस्तशास्त्रपारगाम् ॥

यदुत्तमं वृता हृदा गुणाभिरामविग्रहं
तदीयशौर्यदीपिकां मुदा तु पद्यमालिकां ।
चकार मार्गशीर्षके व्रतं चरन्त्यसौ पुरा
नमामि तां वराङ्गनां विनीतमस्तको ह्यहम् ॥

स्वयं हि गोपिका सती पुरं तदेव गोकुलं
यदूद्वहं विचिन्त्य या भुजङ्गतल्पशायिनं ।
पुरस्थितास्स्त्रियश्च तां सुगोपयोषितः पुरीं
विशुद्धभक्तवन्दितां ततान सा गतिर्मम ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितानि

अनुवादकः श्री एन्. रामनाथार्यः.

(पूर्वानुबन्धः)

वरं प्राणपरित्यागः न विरोधो भवादृशैः ।
प्राणा जन्मांतरे भूयो भवन्ति न भवद्विधाः ॥ ॥ ४९३ ॥

It is better to give up life than to get separated from friends like you; In another birth life would come back but not persons like you.

एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य ।
तावत् द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति ॥ ४९४ ॥

Before I could reach the end of a sea of misfortunes, another misfortune has befallen me. Misfortunes multiply when one is in distress.

बलीयसा समाक्रान्तः वैतसीं वृत्तिमाश्रयेत् ।
वांछन् अभ्रंशिनीं लक्ष्मीं न भौजंगीं कदाचन ॥ ४९५ ॥

When one is overpowered by stronger men, one should behave like the cane plant (ie. he should be submissive). One who would like to be ever prosperous, should never assume the attitude of a serpent (which raises its hood in defiance and perishes).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नक्रः स्वस्थानमासाद्य गजेंद्रमपि कर्षति ।
स एव प्रच्युतः स्थानात् शुनापि परिभूयते ॥ ॥ ४९६ ॥

A crocodile from its place (in water) can attack even an elephant; dislodged from its place. it can be overpowered even by a dog.

असहायस्समर्थोपि तेजस्वी किं करिष्यति ।
निर्वाते ज्वलितो वह्निः स्वयमेव प्रशाम्यति ॥ ॥ ४९७ ॥

Though powerful what can a person accomplish without the help of others. Fire kindled in a place where there is no wind, gets extinguished of its own accord

संगतिः श्रेयसी पुंसां स्वपक्षे च विशेषतः ।
तुषैरपि परिभ्रष्टाः न प्ररोहन्ति तंडुलाः ॥ ॥ ४९८ ॥

Cooperation with others, especially with one's own party, is always good, to everyone. Even rice does not grow up shorn of the husk.

न तादृक् जायते सौख्यमपि स्वर्गे शरीरिणाम् ।
दारिद्रयेपि हि यादृक् स्यात् स्वदेशे स्वपुरे गृहे ॥ ॥ ४९९ ॥

Even heaven does not bestow as much happiness on a person, though in poverty, as happiness he derives from residing in his own country, in his own town and in his own house.

(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमण्डली

(नाटिका)

विद्यावाचस्पति, महोपाध्याय, साहित्याचार्य, कविसार्वभौम, कवीन्द्र,
श्री शिवशङ्करशास्त्री, साह्तीसमिति, ओंगोलु.

पात्राणि

स्वामी अनाथाः ऊर्मिला सरला रोहिणी इन्दिरा शर्मा शास्त्री।

प्रथमो रङ्गः

श्रीमण्डलीनाम्नि मठे विशाला कक्षा, तस्या उभयपार्श्वयोः द्वारे स्तः। शालाया मध्यभागे आन्दोलिकाफलकोपरि उपविष्टो मठाधिपतिः श्रीआनन्ददासस्वामी मन्दं मन्दं प्रेंखोलयते। स च ईषत् स्थूलकायः श्यामवर्णः; तस्य शिरः फालफल्येन चकास्ते। तत्कण्ठे विविधवर्णकुसुमदामानि विराजन्ते। स्वामी कौशेयकाषाम्बरधारी; शान्तं सरलं भाषते (मृदुभाषी)।

अत्रान्तरे बालवितन्तुत्रयं प्राक्पश्चिमद्वारमार्गाभ्यां हठात् प्रविशति। स्वामी निश्चलो भवति। वितन्तवः तस्य पादावुपस्पृश्य विचुंब्य स्वकरतलैरर्थनिमीलितनेत्राणि मार्जयन्ते। स्वामी तासां शिरांसि लालयति। ईषच्च्युताबगुण्ठनानि ताः कर्णबाह्यं संस्कुर्वन्ति। अनाथाबृन्दगीतिः –

दर्शनलाभेन गुरोः सर्वाश्चिन्ता अपसृता नः
इहपरचिन्ता अस्माकं अपसृताः किलापसृताः किल॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहह! गुरुदर्शनमभूत् गुरोस्सद्गुरोश्चास्माकम् ।
इहचिन्ताः परचिन्ताः न भवन्तीतःपरं नः ॥

स्वामी (सस्मितम्) नारायण! अत्रोपविशन्तु!

(अनाथा भूमावुपवेष्टुमुद्यताः) अधस्तात् मोपाविशत, स्त्रियः समानस्थानमर्हन्ति खलु!

अनाथाः – स्वामिनां भवतां सान्निद्ध्ये तिष्ठन्तीनामास्माकं न लोपः कोपि! भवद्दिव्यमूर्ति विना नास्माक - मन्यद्वाञ्छितव्यम् स्वामिपादाः!

स्वामी – स्त्रियः, तत्रापि शिष्या विशेषादरेण द्रष्टव्याः। अत्र मम सकाशे दारुफलके उपविशन्तु भवत्यः! (तास्तथा कुर्वन्ति) ग्रामे मठविषये तु किं वदन्ती व्याप्ता इति ऊर्मिला-देव्या इन्दिरया च निवेदितं ह्यः।

प्रथमा अनाथा – स्वामिनः, जनाभिप्रायस्तु मुग्धः खलु!

द्वितीया – यदा जनसंघो मूढः, तदा तदभिप्रायो मूर्ख एव।

स्वामी – जना नितरां मां निन्दन्तीति ज्ञायते। दूषण-भूषणे इमं देहिनं स्रष्टुं न समर्थे!

अनाथाः – ये भवतो निन्दन्ति ते कीटपातं मरिष्यन्ति!

स्वामी – ऊर्मिलाया भर्ता किं ब्रूते? (दरहसितम्)

तृतीया – स भार्यायामतीव कुपितः।

स्वामी – सायंसमये सप्तघण्टिकाः श्रुताः। तथापि सा मठं न प्राप! हन्त! कल्येऽपि सा नायाता!

द्वितीया – कथमागच्छति! यत्तस्या भर्ता द्वारमपि बबन्ध: जालकद्वाराण्यपि निबद्धानि।

स्वामी – जालकशलाकांतरप्रदेशद्वारा सा मदन्तिकमाप्नोतीति वा (मां सन्निधास्यतीति वा)।

अनाथाः – किमुच्यते! लोका मूढाः!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

स्वामी – पतिः कः ? भार्या का ? आचार्यपादैः किमादिष्टम् ? "का ते कान्ता ? कस्ते पुत्रः ? संसारोयमतीव विचित्रः?" स भर्ता उन्मत्तप्रायः ! नो चेत् पत्नीं कियत्कालं पञ्जरे बध्नाति !

प्रथमा – स्वामिभिस्सुष्ठूक्तम् ! अज्ञानपूर्णा वयं कियत्कालं गृहपञ्जरे तिष्ठेम ?

स्वामी – पञ्जरविहगस्य मुक्तिः का ?

अनाथाः – चित्तम् !

स्वामी – पञ्जरान्तरादुड्डयने मुक्तिः !

द्वितीया – बोधसमये भवद्भिर्यथाऽऽदिष्टं तथा गुणदेहेन सह यावज्जीवी वर्तते तावन्मोक्षो नास्त्येव !

तृतीया – भागवतपठने स्वामिनः परह्यः तदादिशन् मातृष्वसुः !

स्वामी – गृहेभ्यो बहिर्नागमिष्यन्ति यदि स्त्रीणां मुक्तिर्नास्ति !

प्रथमा – किं मठोपि गृहं न भवति ?

स्वामी – यथा गृहं निर्मितं तथैव मठोऽपि निर्मितः शिलाभिस्सुधया च । किन्त्वेष ज्ञानमयः, आनन्दमयश्च; गृहं पुनरज्ञानमयं, दुःखमयं च ।

अनाथाः – स्वामिनो यत्र यत्र वर्तन्ते तत्र तत्र ज्ञानानन्दौ विराजेते ।

स्वामी – मम दिव्यबोधे एकमेव महावाक्यरूपेण ब्रवीमिः "स्वस्मिन् यदस्ति, त (दद्वितीयं) दन्वेषय; गृहाद्बहिरागच्छ ।"

अनाथाः – अहह ! क आनन्दः ! का वाचः !

स्वामी – यथा गोपिकाः पतीन्, शिशून्, श्वशुरौ, गृहादीन् त्यक्त्वा श्रीकृष्णस्य सकाशं प्राप्ता इति पठितमस्माभिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमा – आनन्दस्वरूपा नानन्ददायकान्भवतोऽप्राप्य, यावत्कालं गृहमिति बन्धुरिति भावेन जनः स्थितः तावत् किं मोक्षसाम्राज्यं लभ्यते !

स्वामी – गोपिकाः सर्वस्वं तत्यजुः; आत्मनः सर्वस्वं त्यक्तुं समर्था यदि एते शिष्या अपि किं न मुक्ता भवेयुः ?

द्वितीया – अस्मादृशानां स्वेच्छा जीवद्भर्तृकाणां नास्ति ।

स्वामी – विनन्तवस्तावत् परिपूर्णा खलु !

तृतीया – ननु वितन्तुशब्दस्यार्थः कः ?

स्वामी – वि - इति, विगतः - तन्तुरिति प्रकृतिसम्बन्धः, अज्ञानबन्धः । तदा यूयं शुद्धज्ञानमूर्तयः । द्वयोः एकं लुप्तं भवति चेत् एकमेव शिष्यते; तत् पूर्णम् ।

अनाथाः – किं सर्वा वितन्तवो ज्ञानमूर्तय एव ?

स्वामी – अथकिं ! कस्सन्देहः ? यूयं ज्ञानमूर्तयः । युष्मत्सवरूपन्तु शुद्धस्फटिकसंकाशं, शुद्धसत्त्वमेव !

तृतीया – स्वामिनः, नो वस्त्राणि शुद्धानीति तथा ब्रुवन्ति ननु ! किं सा छलोक्तिः !

स्वामी – न हि, न हि ! सूक्तिरेव ।

प्रथमा – तदा रक्ताम्बराणां वितन्तूनां का कथा ?

स्वामी – तास्तु रजोगुणाधिकाः ।

अनाथा – ननु वयं पुनः ?

स्वामी – यूयं तु त्रिगुणातीताः ।

अनाथाः – इन्दिरा, ऊर्मिला, सरला देव्योऽपि त्रिगुणातीताः किम् ?

स्वामी – तास्तु सभर्तृकाः ।

प्रथमा – भवदन्तिकं प्राप्तुं समुत्सुकास्ताः । सरला पुनः सर्वदा भवत्स्वरूपध्याने तन्मयीभूता वर्तते ।

– (अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुक्कूर श्रीमदळहियशिंगर विंशतिमाला

कवयिता पैत्तांबाडि महाकवि श्री व. रामानुजाचार्यः.

श्रीनृसिंहपदांभोजध्यानार्चनकृतादरम् ।
श्रीमद्वेदान्तसूरीन्द्रयोगितल्लजमाश्रये ॥

त्र्यग्रविद्विराजच्छ्रीत्र्यग्राख्याद्यस्वनामकम् ।
श्रीरम्यनरसिंहश्रीवेदान्तार्यमुनिं भजे ॥

कालेऽस्मिन् कालिकल्मषेऽपि भगवान् लक्ष्मीनृसिंहस्स्वयं
ज्ञानानुष्ठितिधुर्यतात्रयमसौ यस्मिन् सुतीक्ष्णं बुधे ।
दृष्ट्वा नैजमठाधिपं त्वमकरोदेतत्रितीक्ष्णाभिधा
द्याख्य श्रीनिगमान्तदेशिकशठद्विड्योगिनं संश्रये ॥

पंचषपदाभिषिक्तश्रीयोगीन्द्रादिसाहचर्यवशात् ।
विदितात्ममठसुवेद्यं नृहरिश्चक्रे यमर्चकं नौमि ॥

श्रीनैमिशारण्यतले गते स्वं स्थिरं पदं वीररघुप्रवीरे ।
निजार्चके योगिवरे तदर्थं यमेव चक्रे नृहरिस्स नोऽव्यात् ॥

त्रितीक्ष्णाग्रहाराभिजातो बुधेन्द्रः स पूर्वाश्रमे राजगोपालनामा ।
इदानीं त्रयीशीर्षसूर्याख्ययोगी गुरुर्नश्रितानां शुभानि प्रदद्यात् ॥

श्रीवीररघ्वीशशठारियोगी श्रीराजगोपालसुधीन्द्रमेनम् ।
पूर्वाश्रमे यं स्वपदे नियुज्य स्थिरं पदं प्राप गुरुं तमीडे ॥

शठारिरामानुजवेदशीर्षसूरीन्द्रसूक्त्यर्थरहस्यवेत्ता ।
मन्वादिशास्त्रार्थनिगूढवेदी स सर्ववित्वं दिशतात् गुरुर्नः ॥

6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचिनोति हीति लक्षणोक्तिलक्ष्यतां भजन्
अयं त्रयीशिरोगुरुश्शठारियोगिपुंगवः ।
निजाङ्घ्रिपद्मसंश्रितान् स्वधर्मवर्त्मसंस्थितान्
दयानिधिस्स कारयन् चिरं जयत्वपि क्षितौ ।।

श्रीरंगनाथकमलानरसिंहरंगश्रीवीरराघवशठारियतिप्रवीरैः ।
काले भवत्वयमपि स्ववदित्यनूक्तो वेदान्तदेशिकमुनिस्स गुरुश्श्रियै नः ।।

यस्मिन् श्रीमदहोबिलेशभगवान् लक्ष्मीनृसिंहो बुधे
स्वेनैवोत्तरदेशतीर्थनमनं संकारयित्वाऽदिशत् ।
मध्येमार्गमुपेयुषि स्थिरपदं श्रीवीररघ्वीश्वरे
योगीन्द्रस्स्वमठं हि नैमिशवने वेदान्तसूर्याख्यके ।।

प्रस्थाय सोऽपि च ततः प्रतिनगरग्राममभिचरन्नेषः ।
शकटोष्ट्रवाजिगजमुखपरिजनपरिसेवितोऽवति ह्यस्मान् ।।

चतुश्चत्वारिंशे नृहरिमहिताहोबिलमठे -
ऽभिषिक्तो ह्यास्थाने निजचरणयुग्मांबुजजुषाम् ।
दिशन् सर्वाभीष्टानखिलमनुजानां यतिवर -
श्चिरं जीयाल्लोके निगममकुटो देशिकबुधः ।।

कठवल्लिमुखवेदपठनैकनिरतो
नरसिंहमठपीठविजयासनस्थः ।
श्रुतिमौळिगुरुनामयतिशेखरो मे
स्वनुतौ मतिं व्यदिशदिह देशिकोऽसौ ।।

अहोबिलमठस्य धूर्वहनतत्परेऽस्मिन् गुरौ
त्रयीशिखरदेशिकाभिधयतिप्रवीरेऽधुना ।
जडोऽपि विबुधायते बुधजनस्तु मुक्तायते
कलिः कृतयुगायते स्तुतिकृदेष दासोऽप्यभूत् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यं संभाषणरम्यसिंहमपरं श्रीनाथयोगीश्वरं
श्रीरामानुजयोगिवर्यमपि च त्र्य्यन्तसूरिं तथा ।
आद्यश्रीशठकोपसंयमिवरं प्राहुर्बुधास्तं त्वहं
मन्ये तत्सकलैक्यरूपममलं ध्यायामि योगीश्वरम् ॥

किंगृहहरेः प्रदत्तो निजपरिवारस्य वारणत्रितये ।
एको येन विना तं गुरुं वदान्यस्तु को वदाऽन्योऽस्ति ॥

तेषामुदारभावनां त्र्य्यन्तगुरुयोगिनाम् ।
चरणांभोरुहद्वन्द्वान्नाऽन्या नो गतिरस्ति हि ॥

दयासौशील्यवात्सल्यमुखा आत्मगुणा गुरौ ।
यस्मिन् खेलन्ति संयुक्ताः नौमि तं योगिशेखरम् ॥

मालोलविष्णोरिह नित्यवासात् वेदान्तसूरीन्द्रयतीन्द्रसूरेः ।
अहोबिलक्षेत्रमभूत्पुरं च मुक्कूरभिख्यस्तु बुधाभिवन्द्यः ॥

पैत्तांबाडिनिवासेन श्रीवराहार्यसूनुना ।
रामानुजकवीन्द्रेण बहुग्रन्थकृता कृता ॥

त्रितीक्ष्णाख्याग्रहारश्रीरम्यसिंहगुरोरियम् ।
समर्पिता पदांभोजयुग्मे विंशतिमालिका ॥

जातिविध्वंसकानि सप्तमहापातकानि

(१) सिद्धान्तरहितं राजकीयं, (२) श्रमं विना प्राप्ता सम्पत्, (३) अन्तश्शुद्धिविहीनो भोगः, (४) शीलशून्या पांडिती, (५) नीतिनियमदूरं वाणिज्यं, (६) मानवक्षेमनिर्लक्ष्यं विज्ञानं, त्यागशून्यं आराधनं च इति १९२१ वत्सरे गांधीमहात्मा अवोचदिति श्रीराष्ट्रपतिः लक्नोनगरे गांधीभवनविभागं समुद्घाटयन् अस्मारयत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काचतंतवः कथं उत्पाद्यन्ते ?

(गूढलेखिनी)

सामान्यकाचः तत्र नोपयुज्यते । तेषु यः प्रमुखः घटकः भवति शिलिकण (सिलिकॉन) वा काच इत्याख्यः स एव तदर्थे उपयुज्यते । तस्य गुणाः काचसदृशाः एव भवन्ति । १४१०° सेंटिग्रेड तापे द्रवीभवति, पारदर्शकश्चास्ति ।

एष सान सान स्टील - पात्रेषु द्रवीक्रियते । तेषां अधोभागे सुदृढाः पिहिताः स्टील - नलयः संयुक्ताः तिष्ठति, परं तासां अंतरभागास्तु सूचिकाग्रवत् भवंति । तासां अधः भवति एको दीर्घो रम्भः (सिलिंडर) । स च विद्युत् - गन्त्री - साहाय्येन महता रभसेन परिभ्राम्यते स्वीयाक्षे यत् तस्य पृष्ठभागः ४० - ४५ कि. मी./घंटा वेगेन धावति । तत काचित् दीर्घा छुरिका तेन संलग्ना तिष्ठति। तदनन्तरं भवन्ति चिमटाः (पिंचेस) ततः अन्ते गुंठलयः (स्पिंडल्स)।

सूक्ष्मनालिद्वारान्निर्गतः काचरसः रंभोपरि बहुविधसूक्ष्मतंतूनां रूपेण पतति झटिति, सः अग्रे नीयते । छूरिकया ते तंतवः पृथक् क्रियन्ते । ततः ते उत्थाप्य गुठलीनां उपरि नीयन्ते । ताः अपि यन्त्रचालिता तंतून् स्वोपरि आवृण्वन्ति समुचितक्रमेण ।

इत्थं कार्पासवत् काचतंतवः अपि प्रयत्नैः निर्मिता भवन्ति। एते कौशेयतंतुवत् मृदुलाः चमचमन्ति । तैः वस्त्राणि तथा विविधपदार्थाः निर्मीयन्ते ।

१९४० तमे क्रिस्ताब्दे अमेरिकास्थेन "ओवेन्स कॉर्निंग्स" नामककाचोत्पादकेन एषा पद्धतिः आविष्कृता । एवं तु सामान्यतः अपि काचदण्डिकां मध्ये बिगलय्य उभयतो दूरं आकृष्य ४ - ५ फूटमितः तंतुः निर्मीयते स्म । परं अनया पद्धत्या तु विपुलप्रमाणेन काचतंतवः सुदीर्घाश्च उपलब्धाः भवन्ति । अद्य किल विविधराष्ट्रेषु तथा भारते अपि कोईम्बतूर, दिल्ली, कलकत्ता, मुंबई इत्यादिस्थानेषु काचतन्तु - निर्माणिकाः विद्यन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यया किं प्रयोजनम् ?

लेखकः श्री के. टि. नरसिंहः,
(व्याकरण - साहित्य - शिरोमणिः शिक्षाशास्त्री.)

अर्कः आत्मनः प्रभावं प्रदर्शयति । मानुषकृत्येषु जुगुप्सितो भूत्वा स्वकिरणै सन्तापयति पृथिवीम् । अथाऽपि एते मानवराक्षसा न गणयन्ति तापं, न विरमन्ति कार्यात्, न बिभ्यति सूर्यात् । यथेष्टं मध्याह्नेऽपि व्रजन्ति । तस्मिन् जनसमूहे मालाऽपि काचन अबला ।

गच्छति, गच्छति, सा गच्छति, सुदूरं गच्छति । कुत्र गच्छति ? किमर्थं व्रजति ? न वयं जानीमः । साऽपि न जानाति । परं नरव्याघ्रेभ्यः आत्मानं रक्षितुं धावति सा । माला वीथ्यां अटति, तस्याः पादौ उष्णेन तप्तौ, जङ्घे गमनेन खिन्ने, उदरं जलेन पूरितं, मन निराशया शून्यं जातं, करौ स्वेदेन सिक्तौ, ग्रीवा एकया मणिमालया पूरिता, अधरं उच्छिष्टेनाऽऽद्रीकृतं, चक्षुः दौर्बल्येन विना यत्नं निमीलितं, कर्णौ दूष्यभाषणैः संपूरितौ, शिरः भास्करबाहुभिः प्रताडितम् । एषैव माला मध्याह्ने पथि लक्ष्यरहितयन्त्रमिव भ्रमति ।

सा का ? या जन्मकारकरहिता, दारिद्र्योपासिनी, शोकमूर्तिः, प्रकृतिसौन्दर्यशालिनी, शुद्धशीलवती, अष्टादशवर्षीया, अनाथा च जीवति सा माला । यया मुद्रालेखनयन्त्रशिक्षणं (Type - writting) अभ्यस्तं यया माध्यमिकपरीक्षा (SSLC) सफलीकृता यया संग्रहलेखनकला (Short - hand) आधीना सैव माला अज्ञेव, मूढेव, अन्धेव च गच्छति । तत्र को हेतुः ? आत्म-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्षणोपायाभाव एव। षण्मासाः गताः, बहूनि विज्ञापनपत्राणि (Applications) प्रेषितानि, बहुधा गोष्टीषु (Interview) उपस्थितम्। अथाऽपि तया स्त्रीत्वभङ्गरहिता काऽपि वृत्तिः न लब्धा। तत्र किं कारणम्?

अस्याः अशक्तिः न, नैपुण्याभावो न, असामर्थ्यं न, अज्ञानं न, अहङ्कारो न, अविनयो न, परं किं तर्हि? समाजस्य नीचता, सामाजिकानां कुटिलवृत्तिः, अधिकारिणां पशुत्वं, धनिनां कामवह्निः। सत्यं (गतानुभवान् भूयोऽपि एकवारं स्वमनसि स्मरति सा)।

स्मर्तुमेव अयोग्यं यत् तत्तु सर्वात्मना वक्तुमशक्यम्। अथाऽपि वक्ष्यामि। यतः लोकेनानेन मत्सङ्गमः इतः परं कतिपयनिमेषाण्येव भविष्यति। ततः पूर्वमेव मच्छोकवृत्तान्तं ब्रवीमि। यतः याः यौवनान्धत्वेन अज्ञानिन्यो भूत्वा लैङ्गिकसुखेषु आत्मानः पातिव्रत्यं कुलगौरवञ्च निमज्जयन्ति तासां कृते मद्वृत्तान्तः गुणपाठो भवतु नाम।

पूर्वं मया उद्योगाय प्रयत्नः कृतः। वयसा, रूपेण, ज्ञानेन च सहकृता सती वृत्तिरूपास्थानमण्टपे अभिषिक्ता चाहमभवम्। परं न मया उषितं तत्र। कुतः? यस्याः शीलसंरक्षणे वर्तते रुचिः सा न तत्र (उद्योगे) जीवति, जीवितुं वा न प्रभवति। किमर्थं? कार्यालये उत्पीठिकायाः (Table) पार्श्वे उपविश्य विषयं (Matter) वक्ति सः धूर्तः। अपरपार्श्वे उपविष्टायाः मत्पादाभ्यां साकं क्रीडतः तस्य पादौ। तस्य चक्षुः विषयं न पश्यति, किन्तु विषमं पश्यति। कार्यं नाऽपेक्ष्यते तेन, परं सेविकाकायमपेक्ष्यते। आदरं न वाञ्छति सः, अपितु अधरमेव केवलम्। भगिनीबुध्या न पश्यति मां, किन्तु भार्याबुध्या व्यवहरति। अतः कासां सह्या ईदृशी बाधा जीवनयात्रायाम्?

या युवतिः वर्तते, या स्वपादाभ्यां स्थातुमभिलषति, या स्वशीलं पातिव्रत्यं वा दर्पणस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसं इव, तटाकस्य जलमिव, शरीरस्य प्राणं इव, चमर्याः केशान् इव, शकटस्य चक्रमिव, राजकीयनायकस्य मन्त्रिस्थानमिव, सज्जनस्य बुद्धिमिव, लताया पुष्पमिव, नद्याः तटीमिव, चलचित्रनायिकायाः लावण्यद्रव्यमिव च मनुते सा स्ववृत्तिं, उपोढुं अशक्ता, अबला च भवति । अत्र दृष्टान्तभूता अहमेव । मन्दभाग्याया मद्वृत्तान्तमेव वक्ष्यामि –

एकस्मिन् प्रसिद्धपाश्चात्यकार्यालये मया वृत्तिर्लब्धा । मम वेतनन्तु पञ्चशतम् । अहमासं आनन्दसीम्नि । मद्भाग्यज्योति अतीव प्राकाशत । परं गच्छता कालेन पुरुषस्य लक्षणं, नीचस्य स्वरूपं, अधिकारिणः अन्तरात्मा, कुटिलस्य चेष्टा च ज्ञाता मया । मम अधिकारिण वयः पञ्चपञ्चाशत् । स तु वयसा स्थानेन च वृद्धोऽपि चेष्टया युवा, दृष्ट्या पशुः, कर्मणा नरमांसबुभुक्षुः । एकदा तेनाऽहं परिपीडिता । तदारभ्य त्यक्ता मया सा वृत्तिः । तत्र सत्यं निष्कासिता तेनेति । कारणं पृष्टं मया । तदा सः मूर्खः विललाप "कार्यकरणार्थं कार्यालये सन्ति बहवः । अतः त्वद्वृत्तिस्तु न केवलं कार्यनिर्वहणं, अपि तु मयि स्वानुरागप्रदर्शनमिति" । सद्यः तं कपोले प्रताड्य तस्मात् भवनात् अहमवातरम् । भूयोऽपि कार्यालयान्तरे समारूढा जाताऽहम् । तत्रस्थ कश्चन सहोद्योगी युवा मां ऐच्छत् । जाताऽहमपि तस्मिन् मदनाक्रान्ता । गतानि दिनानि । स्नेहः प्रावर्धत । अनिच्छन्तीमपि मां उपभुक्तवान् सः । परं न दत्तं मे तेन स्वगृहिणीस्थानम् । विचार्यमाणे स तु पूर्वमेव विवाहितः । तस्य पुत्रौ द्वौ एका पुत्री च वर्तन्ते । पश्यंतु अबलानां जीवनम्, परामृशन्तु यौवनस्य प्रमादं ।

अत एव गच्छामि । कुत्र ? उद्योगार्थं न, तेन साकं युद्धाय न, यत्र कुत्राऽपि जीवनाय न । कुत ? ममाशा मृगतृष्णिका जाता, यौवनं सागरजलं जातं, प्रयत्नः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुभूमौ पतिता वृष्टिः, लावण्यममावास्यारात्रिर्जाता । अतः नेच्छामि जीवितुं, नाऽभिलषामि कमपि द्रष्टुं, नास्ति मे किमपि लक्ष्यम् । अत एव गच्छामि, गच्छामि । यावत् शरीरे प्राणास्सन्ति तावदवधि गमिष्यामि । ततः जलाभावे सस्यं इव मरिष्यामि ।

प्रेमा विद्यैतद्द्वयोर्मध्ये
प्रेमैव हि भवेत् गुरुः ।
प्रेम्णैव लभ्यते विद्या
विद्यया किं प्रयोजनम् ॥

मालायाः मरणे मूलं
शीलमेवाऽत्र कारणम् ।
नरमांसबभुक्षुभ्यो
नार्यो नश्यन्ति सांप्रतम् ॥

परीधावि-उत्तरायणपरीक्षासु

सर्वप्रथमतया उत्तीर्णे:

विचक्षणा
बि. रमादेवी, सेलं.

अभिज्ञा
एस. शुभा, श्रीरंगम्.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६. परमशिवपरीक्षा

काशीं गतः शंकरः प्रत्यहं गंगास्नानं कृत्वा तपश्चाचरन्नास्त । कस्मिंश्चिद्दिने कश्चिद्ब्रह्मचारी तमुपेत्य प्रणनाम ।

ब्रह्मचारी प्रह – स्वामिन् ! अहं कावेरीतीरवासी सनन्दननामाऽस्मि । संसारनिस्पृहोऽहं सन्यासाश्रमस्वीकारार्थं भवदन्तिकमागतोऽस्मि । मां शिष्यत्वेन परिगृह्य अनुगृह्णातु तत्रभवान् इति ।

शंकरः सदयं तं शिष्यं पर्यग्रहीत् । कदाचित् शंकरः सनन्दनाय तत्त्वं प्रबोधयति स्म । तदा चण्डालः कश्चित्सुरापानमदमत्तः अवाच्यानि अश्लीलानि प्रलपन्, अनियन्त्रितगात्रगतिरितस्ततश्चलन्नध्वना तेनैवायातः तयोः उपरि पतन्निव आसीत् । कुपितः सनन्दनः "अरे ! दुष्ट, दूरं गच्छ" इत्याह । अथैवमुक्तः स प्रत्याह– "दूरं गच्छेति कं प्रति कथयसि ? देहमुद्दिश्य ? अथवा देहिनं ?" श्रुत्वेमं प्रतिप्रश्नं सनन्दनश्चकितोऽभूत् ।

'देहमुद्दिश्य चेद्ब्रूषे "गच्छे"ति तर्हि अन्नमयाद्भवदीयाद्देहात्तादृशस्यैव मदीयस्य को वा भेदः ? येन कस्यचिद्देहस्य देहान्तरं दूरतः कर्तव्यं भवेत् । न देहं, किन्तु देहिनमेव गच्छेत्युक्तवानस्मीति चेत् तर्हि गंगायामिव सुरायामपि प्रतिबिम्बभावं भजन् सूर्य इव आत्मा त्वदीये मदीयेऽपि शरीरे निर्विशेषं भासते' इति चण्डालो व्यवृणोत् ।

शंकरः सनन्दनमाह – "वत्स ! मया बोध्यमानं तत्त्वमेत्र अनेन महात्मना ते सम्यक्प्रबोधितम् ।"

इत्युक्त्वा अभ्यागतं नमस्कृत्य "स्वामिन् ! अस्मान् परीक्षितुं आगतः परमशिव एव भवान्" इत्याह शंकरः । चण्डालरूपेणागतः परमशिवः निजरूपं प्रदर्श्य "वत्स ! ब्रह्मसूत्रभाष्य - रचनायै

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोविन्दयतिस्त्वां प्रेषयामास किल! तमेव विषयं पुनः स्मारयितुमहमागतोऽस्मीत्युक्त्वाऽन्तर्दधे ।

शंकरः विश्वनाथं भगवन्तं स्तुत्वा तदनुग्रहेण सनन्दनेन साकं बदरीवनं प्रतस्थे । तत्र दीक्षाविधिना ब्रह्मसूत्राणां भाष्यं रचयामास । न केवलमेतत्, किन्तु उपनिषदां भगवद्गीतायाश्च भाष्यग्रन्थान् प्रणीतवान्, महाभारतीयसनत्सुजातीयस्य व्याख्यामकरोत् । नैतावदेव, अपितु बहून् उद्ग्रन्थान् विरच्य लोकोपकारमकरोत् ।

७. व्यासदत्तो वरः

कदाचित् सशिष्यस्य शंकरस्य समीपमागत्य कश्चिद्वृद्धो ब्राह्मणः प्राह – पञ्चदशवर्षदेशीयोऽसि! किमेतत्सत्यं यद्भवता किल वेदव्यासस्य ब्रह्मसूत्राणां भाष्यं विरचितमिति ।

शंकरः – बाढम् । वृद्धः – "तथा चेत् मम कतिचन सन्देहाः सन्ति । तत्तत्स्थलेषु भवदीयं भाष्यं कीदृशमस्तीति ज्ञातुमिच्छामि ।" इत्याह ।

वृद्धेन अनुयुक्तानां सूत्राणां सर्वेषामपि शंकरः स्वीयं भाष्यं श्रावयामास । स वृद्धः "भवदीयं भाष्यं न समीचीनं; अस्य सूत्रस्य अयमर्थः, अस्येदं तात्पर्यमिति" मार्गान्तरं नेतुं प्रावर्तत ।

"आर्य! भवदुक्तं तात्पर्यं अस्य सूत्रस्य न भवितुमर्हति । एवमेव बहवोऽपार्थं प्रतिपाद्य भगवतो व्यासस्य हृदयं न ज्ञातुं ज्ञापयितुं च पारयन्ति । अत एवाऽहं एतद्भाष्यं रचयितुं प्रवृत्तोऽस्मि" – इति शंकरः सविस्तरमवोचत् । अथ वृद्धः तुष्टस्सन् स्वीयं रूपं प्रदर्श्य "वत्स! अहमस्मि व्यासः; त्वां परीक्षितुमित आगतोऽस्मि । त्वं मदीयब्रह्मसूत्राणां समीचीनं भाष्यं रचितवानसि । सन्तुष्टोऽस्मि, कमपि वरं वृणीष्व" इत्याह । शंकरः –

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पारमार्थिकः अद्वैतसिद्धान्तः लोके सर्वत्र यथा विराजेत तथाऽनुगृह्णातु भवान् । व्यासः – अद्वैतसिद्धान्तं प्रवक्तुमेवावतीर्णोऽसि किल शंकर ! मत्सूत्राणामपार्थं कल्पयतः पण्डितान् वादे विजित्य तेभ्यः पारमार्थिकं तत्त्वमुपदिश्य अद्वैतवेदान्तसिद्धान्तं प्रतिष्ठापय । भवद्भिरचितानां भाष्याणां भवदीयैः शिष्यैः टीका व्याख्या विरचय्य आसेतुहिमाचलं प्रचारमानय । भवदीयमायु प्रमाणं एकवर्षशेषमेवाऽस्ति । अस्मिन्नत्यल्पे काले यावद्भारत - मज्ञानान्धकारमपनेतुमवकाशो न पर्याप्तः । अतः द्वात्रिंशद्वत्सरपर्यन्तं भवदायुषो वृद्धिर्विधीयते ।

इत्युक्त्वा भगवान् व्यासः दीर्घायुर्वरं दत्वा – दैवदत्तमायुः द्विगुणितं कृत्वाऽन्तर्दधे ।

८. सनन्दनस्य भक्तिविशेषः (पद्मपादः)

शंकरभगवत्पादानां ख्यातिस्समन्ताद्व्याप्ता । क्रमशः तदीया शिष्यसन्ततिः प्रवृद्धा । शंकरः स्वरचितभाष्यस्य गूढार्थान् विशेषतः प्रायशश्च सनन्दनायैव विवृण्वन्नास्त । "पश्यत ! अस्मदाचार्याणां सनन्दने कियान् पक्षपातः !" इत्यन्ये शिष्या अन्योन्यमुपांशु ब्रुवन्तः स्थिताः ।

आचार्यः तद्विज्ञाय सनन्दनस्य आचार्यनिष्ठं भक्तिविशेषं ज्ञापयितुकामस्समयं प्रतीक्षते स्म । एकदा सनन्दनः गङ्गाया अपरं तीरं यदा गतः तदा "सनन्दन ३, सत्वरमित एहि । कार्यमस्ती" त्युच्चैराचार्यः चुक्रोश ।

आचार्यस्य उच्चैराह्वानं श्रुतवानेव समनन्तरं सत्वरं सनन्दनः गंगाप्रवाहमलक्षयन् स्थलवत् जलप्रवाहेऽपि पदानि विन्यस्यन्नाजगाम । जाह्नवी तदीयां आचार्यनिष्ठां भक्तिं ज्ञात्वा पदविन्याससमये तत्पादयोरधस्तात्पद्मानि आधारयामास । सनन्द-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नस्य पादपद्मयोः आस्पदानि बृहत्पद्मानि छात्रा व्यलोकयन्, महतानन्देन सनन्दनस्य भक्तिविशेषं प्रशशंसुः। तदारभ्य सनन्दनस्य पद्मपाद इति विशिष्टं नामान्तरं प्रथितम्।

९. "भज गोविन्दम्"

शंकरः काश्यां यदाऽऽसीत्, प्रत्यहं उषःकाले शिष्यैस्साकं स्नातुं गङ्गानदीं गच्छन्नास्त। मध्येमार्गं कस्मिंश्चित्कुटीरे "डुकृञ करणे" इति व्याकरणविषयः वारं वरं श्रुतः। व्याकरणमभ्यसितुं काशीमागतः कश्चिद्विद्यार्थी तं विषयं साधयितुं पारायणं कुर्वन्नासीत्। प्रथमदिने श्रुतः स विषयः पुनर्द्वितीयदिनेऽपि श्रुतः, एवं तृतीये चतुर्थे च दिने। पद्मपादः "गुरुवर्य! कोऽप्ययं मन्दबुद्धिरिति भाति। बहुदिनैरेकमेव विषयं अभ्यस्यति। एवं सति सागरवदपारं व्याकरणशास्त्रं अयं कदा वा तर्तुं शक्नुयात्?" इत्याह।

"यावज्जीवं परिश्राम्यापि नाऽयं व्याकरणशास्त्रपारीणो भविष्यति। असमर्थोऽयं मौढ्येन वृथा कालं नयति। अत एतं तत्प्रयत्नात् निवर्तयितुमुचितम्।" – इति वदन् समनन्तरमेव शंकरः उच्चैस्स्वरेण –

> **भज गोविन्दं भज गोविन्दं**
> **गोविन्दं भज मूढमते!**
> **संप्राप्ते सन्निहिते काले**
> **न हि न हि रक्षति "डुकृञ् करणे"।**

इति श्लोकं पपाठ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमादीच – दक्षिणायनपरीक्षाणां समयसूची

परीक्षा	8—9—73 प्रातः	8—9—73 सायम्	9—9—73 प्रातः	9—9—73 सायम्	10—9—73 प्रातः	
परिचयः	–	–	परिचयः	–	–	घंटाद्वयमात्रं
अभिज्ञः	–	–	प्रथमपत्रं	द्वतीयपत्रं	–	घंटाद्वयमात्रं
विचक्षणः	–	प्रथमपत्रं	द्वितीयपत्रं	तृतीयपत्रं	–	घंटात्रयमात्रं
समर्थः	प्रथमखण्डे प्रथमपत्रं	प्रथमखण्डे द्वितीयपत्रं	द्वितीयखण्डे प्रथमपत्रं	द्वितीयखण्डे द्वितीयपत्रं	–	,,
कोविदः	प्रथमखण्डः	द्वितीयखंडः	तृतीयखण्डः	चतुर्थखण्डः	पंचमखण्डः	,,

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु.
10—8—73.

की. श्रीनिवासाचार्यः,
परीक्षामन्त्री.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

[stamp] ...विश्वविद्यालय हरिद्वार
Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 1845/60. *Postal R. H. No.* 493.
Licensed to Post without Prepayment. LICENCE No. 57.
आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.

भारतसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ४-००

प्रहेलिका

[1] विष्णुः किं कुरुते ? ऽथ गांडिवधरः [2] मन्त्रेण कस्योदभूत्?
कैलासः [3] कथमस्ति ! सागरतले [4] किं वर्तते ? [5] कुत्र मा ?
चोर [6] किं लभते ? [7] कदा न जलदः ? [8] दृश्यं तु के पश्यतः ?
मत्प्रश्नोत्तरमध्यमाक्षरपदे विघ्नेशसम्बोधने ॥

(१) अवति (२) शक्रस्य (३) उत्तुंगः (४) वडवा
(५) कमले (६) प्रहारम् (७) अकाले (८) नयने ।

— वक्रतुंड ! महाकाय !

— श्री बालगणपतिभट्टः, श्रीरंगपत्तनम्.

Published by Sri N. Ramanatha Iyer B. A; B. L., Advocate
& Secretary S, B, P, Sabha, Chittoor (A. P.)
Printed by Sri T K Thiruvengadacharya
at Vijaya Press, Chittoor (A. P.) C 1500

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूरध्वनिसंकेत: - "संस्कृतम्"

वाणीं भजत गैर्वाणीम्

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आ. प्र.) भारतम्.

संपुट: ११ | 15 AUGUST 1973 | क्रमांक: ८

प्रमादीच-
श्रावणांक:

शकाब्दा: १८९५

मूल्यम्
०-४० पैसा:

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूचिका

१. एक एव मन्त्र उच्चार्यताम् १
२. सम्पादकीयम् – स्वगृहीतस्य शशस्य पादत्रयमेव २
३. वरलक्ष्मि नमोस्तु ते ४
४. रक्ष रक्ष दयानिधे ५
५. भगवद्रामानुजमहाक्रतुः, अखिलभारतीयश्रीवैष्णवमहासम्मेलनञ्च ६
६. गांधीकथा ७
७. गैर्वाणीसप्तकम् ८
८. महाराष्ट्रपतञ्जलिः ९
९. गैर्वाणी सा जयतु सुचिरं भारते राष्ट्रभाषा १३
१०. नमामि तां सदा गोदाम् १४
११. सुभाषितानि १५
१२. श्रीमण्डली १७
१३. मुक्कूर श्रीमदळहियशिंगरविंशतिमाला २१
१४. जातिविध्वंसकानि सप्तमहापातकानि २३
१५. काचतंतयः कथं उत्पाद्यन्ते ? २४
१६. विद्यया किं प्रयोजनम् ? २५
१७. परीधावि - उत्तरायणपरीक्षासु सर्वप्रथमतया उत्तीर्णो २८
१८. श्रीशंकराचार्यः
१९. प्रमादीच - दक्षिणायनपरीक्षाणां समयसूची

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एक एव मन्त्र उच्चार्यताम्

अशनेराशीविषस्य चैक एव मन्त्र उच्यतां
मताभिमानः कुलाभिमानो मूढविश्वासः इति ।
नास्त्यस्य देशकालाधिकरनियमो लेशतोपि
न संदर्भो वा विचेतव्यो यतस्सदैव तेजस्वी अयं ।।

अन्नलोपस्य पानीयलोपस्य वा
आतपतापस्य वर्षपातस्य वा
स एव मन्त्र उच्चर्यतां, तदेव तन्त्रमनुष्ठीयताम् ।।

निम्नोद्धरणमुद्घुष्यतां पश्चात्तनाः पुरस्क्रियन्ताम्
हरिजननाम सभासूच्यतां हरहरमहादेव शंभो !
ऋणानि प्रख्याप्यन्तां तृणान्यपि न दीयन्तां
गृहा निर्मीयन्तां स्पृहयाळुभ्यो दीयन्तां ।।

व्ययमात्रं प्रस्तूयतां अभिवृद्धिस्तु नाम्नाप्यास्ताम्
व्ययासमर्था दण्ड्यन्तां भयात्ते निश्शेषयन्तु निधीन् ।
प्रतिसमावेशं मन्त्र उच्चार्यतां प्रतिवेलं तन्त्रमनुष्ठीयताम्
सिद्धिस्तु करे ते वृद्धिरपि भवेत् ओघानाम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

स्वगृहीतस्य शशस्य पादत्रयमेव
(తాఁబట్టిన కుందేటికి మూడే కాళ్ళు)

आंग्लप्रभुताकाले विरला अपि बृहत्पारिश्रामिकाः आंग्लेयानुकूलाः आसन्, तथैव संस्थानाधिपा अपि बहवः आंग्लप्रभुतानुकूला अचेष्टन्त, अन्यथा स्वसत्तायाः नाशभिया । स्वातंत्र्योद्यमनायकाश्च बहुजनसमवायसंपादनार्थं भेदोपायेन कार्मिकान् कर्षकांश्च वशीकृत्य बह्वी आशाः प्रकल्प्य तेभ्यः तान् व्यघटयन् । तथैव पाठशालाभ्यः छात्रात् परावर्तयन् ।

दैवगत्या कालगत्या वा स्वातंत्र्यं लब्धम् । तेन सहैव नीतिरपि स्वानुकूलफलानि दातुमारेभे । पारिश्रामिकाणां संघाः सावष्टंभाः, तदर्थं सर्वकारेण काचन शाखा विभक्ता । तत्फलतया अल्पानि व्रणानि पुनःपुनरालोड्यन्ते स्म महाव्रणीक्रियन्ते स्म च । किन्तु व्रणानां मध्ये एकमपि न विरोप्यते स्म । सर्वाण्यपि कर्कटीप्रणत्वेन व्यपरिणमन् । तदर्थं बह्व्यः योजना क्रियन्ते, महान् धनक्षयश्च क्रियते । किन्तु परिश्रमविघात एव वर्धते प्रतिक्षणम् । उत्पादनवर्धनमाकांक्ष्यते, किन्तु तद्वर्धन (छेदन) मेव क्रियते ।

संस्थानाधिपा निष्कासिताः, आग्रहारिका अधः पातिताः, श्रोत्रियाः निराधाराः कृता, मान्यक्षेत्राणि विभागितानि, देवालयादिषु कैंकर्यार्थं स्थापितानि च क्षेत्राणि विना विवेचनं प्रतिहतानि । फलतया बहवो जीविकाविरहिताः आसन्, तदाश्रिताश्च लक्षशः कोटिश्च । धार्मिकसंस्थासु कैंकर्यस्य महान् व्याघात आपतितश्च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं च विचित्रं फलं समुद्भूतं, संस्थानाधिपानां शतशः नाशे एकतस्समुत्पन्ने, अपरतः सहस्रशः लक्षशश्च ततोप्यधिकवैभवाः कोटीश्वराः समुदतिष्ठन् । कतिपयसंस्थानाधिपतीनां नाशेन रक्तबीजन्यायेन लक्षशस्ते समुदभवन् । दरिद्राणां तु परिस्थितिश्च यथापूर्वा; कुत्रचित् ततोपि हीना च वर्तते, यतः दरिद्रान् व्याजीकृत्य भूक्षेत्रधनादिकमपाहरन् राजकीयप्रबलाः । अद्यत्वे पंजाबराष्ट्रे विधानसभाध्यक्षस्य व्यवहार एक एवालं उदाहरणलेशाय । अप्रकटिताः अंतरंतश्शमिताः व्यापारास्तु कति वा भवेयुरिति न संख्यातुं शकयते ।

कार्मिकप्रश्नाश्च "प्रहर्तुरेवोरगराजरज्जवो जवेन कण्ठं प्रपेदिर" इतिवत् सर्वकारं विह्वलीकुर्वन्ति । क्षणे क्षणे कर्मागाराः स्थगिता भवन्ति, वस्तूत्पादनं च शून्यप्रायमेव भवति । निर्माणिकासु वायुयानिकायां कोशेषु पट्टिकाशकटसंस्थायां अन्ततः राज्यांगयन्त्रभागेषु सर्वेष्वपि च येन केनापि व्याजेन बहुलं बन्धाः प्रवर्तन्ते । फलतः प्रजानां असौविध्यं, नित्यकृत्यानां प्रतिष्टंभः, सर्वकारस्य च हस्तपादबन्धः इति महतीयं शोचनीया दशा ।

इयं वेदना न पर्याप्तेति किल कर्षकभृतकानां कृते अपि पृथक् काचन शाखा संस्थापयितुं अभिलष्यते सर्वकारेण, येन अन्नकणा अपि अद्यतोपि दुर्लभा भविष्यन्ति ।

आत्मकृतेनैव दोषेण जायमानां विपत्तिं जानन्नपि सर्वकारः तस्यास्तथात्वमनंगीकृत्य होमियोपथिकचिकित्सामनुसृत्य कारणौषधिसत्त्वमेव कार्यनिवारणायोपयुंक्ते इति महद्दौर्भाग्यम् ।

विवेकशीलस्य विशेषगौरवम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरलक्ष्मि नमोस्तु ते

लेखकः संगीतभूषणम् श्री ति. गो. अनन्तसुब्रह्मण्यः, तिरुपति.

रागः – सरस्वती * आ. स रि म प ध सं
तालः – आदि अ. सं नि ध प म रि स

पल्लवी

वरलक्ष्मि नमोऽस्तु ते
वरदे वसुप्रदे श्री – ॥ वरलक्ष्मि ॥

अनुपल्लवी

वासुदेवप्रियकान्ते
वासवाद्यमरविनुते ॥ वरलक्ष्मि ॥

चरणम्

नरहरिहृदयनिवासिनि
नारायणि नतपालनि
नारदगानविनोदिनि
नारायणमनोमोदिनि ॥ वरलक्ष्मि ॥

---

* सरस्वतीरागः वाचस्पतिमेलरागजन्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्ष रक्ष दयानिधे

लेखकः श्री आर्. गोपालन्, चित्तूरु.

वैकुण्ठवासी कमलानायकः यदा यदा भूतले धर्मस्य ग्लानिः, अधर्मस्य अभ्युत्थानं च संभवति तदा तदा अत्राविर्भूय अधर्म-मुन्मथ्य धर्मसंस्थापनं करोति ।

यदा भारतदेशः पाश्चात्यैः निपीडितोऽभवत् तदा गांधी महात्मा अस्मिन् देशे आविर्भूय भारतदेशस्य स्वातन्त्र्यसंस्थापनार्थं महान्तमुद्यमं अकरोत् । अतिविनीतस्वभावः दयार्द्रहृदयः परसौख्यपरायणः अहिंसासत्यविभूषणः अयं महात्मा देशक्षेमार्थं लोकक्षेमार्थं च वाचामगोचरं दुस्सहं क्लेशमनुभूतवान् । अयं स्वस्य आयुषः अर्धभागं कारागेहे एवं क्षपितवान् । निराडम्बरः ऋजु-मार्गानुगः अयं महत्मा यदा देशः स्वातन्त्र्यं अलभत तदा एकामपि अधिकारपदवीं न स्वीकृतवान् ।

देशस्वातन्त्र्यानन्तरं नीतिमार्गे प्रजापरिपालनविधान-मुद्दिश्य अस्य मनसि चिन्ता अपरिमिताऽभूत् । एवंविधो महात्मा केनचित् दुरात्मना हटात् मारितः । एष एव अस्य महात्मनः अस्माभिः कृतः सत्कारः । विचित्रोऽयं लोकः ।

स्वातन्त्र्यरजतोत्सवसंभ्रमोऽपि सर्वकारैः अतीव कुतूहल-पुरस्सरं आचरितः । अद्य पञ्चविंशतिसंवत्सरानन्तरं का वा भारतदेशस्य परिस्थितिरिति आलोचने कृते भग्नहृदयाः एव वयं भवामः । सार्वजनीनसौभाग्यसभाजनं राज्यशासनमात्रपरिमितं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तते । पूर्वतनराजानः देशक्षयकारकाः इति मत्वा ते राज्यभ्रष्टाः कृताः । तेषां स्थाने मन्त्रिणः तदनुगाश्च प्रजारुधिरसिक्तानां सुखसंततीनामास्वादने निरताः संप्रवृत्ताः । गांधीमहात्मा तु रामराज्यं संस्थापयितुं प्रयत्नमकरोत् । अपितु तद्विपरीतराज्यसंस्थापनमेव अस्मदृष्टिगोचरीभवति । प्रजाः निराशास्संजाताः । नीतिपरिपालनस्थाने आयुधपरिपालनमेव संदृश्यते ।

लब्धाधिकाराः देशनायकाः स्वार्थसंपादननिरताः वर्तन्ते । अत्यावश्यकवस्तूनां मूल्यानि दुर्भराणि वर्तन्ते । सर्वकारस्य करनिपातविधानं प्रजाहृदयविदारकं सञ्जातम् । प्रजाः प्राणेष्वपि निराशाः संभूताः । एवं देशबन्धवः देशविरोधिनः संप्रवृत्ताः ।

अविनीतिपिशाचस्य घोरताण्डवरंगो देशस्संभूतः । का वा अस्य देशस्य गतिः ! को वा अस्य संत्राता! कुत्र गतः कमलानाथः! अप्ययमपि स्वधर्मं विस्मृतवान् । यथा तथा वा भवतु । हे मधुसूदन त्वमेव शरणं अस्माकम् । भवतः अवतारं प्रतीक्षाणा भवामः। रक्ष रक्ष दयानिधे ! ! !

भगवद्रामानुजमहाक्रतुः
अखिलभारतीयश्रीवैष्णवमहासम्मेलनञ्च

श्रीमदुभयवेदान्ताचार्यपीठस्य आध्वर्येण भूतपुर्यां (श्रीपेरुंबुदूरु, तमिलनाडु) १५–८–७३ प्रभृति १९–८–७३ पर्यन्तं पंच दिनानि प्रचलिष्यतः । तत्संदर्भे आदिकेशवमूर्तेः भाष्यकारमूर्तेश्च अष्टबन्धनं महासंप्रोक्षणं च महावैभवेन आचर्येयाताम् ।

रामक्रतु-अष्टोत्तरसहस्रकुंडक्रत्वादिनिर्वाहकाणां श्री श्रीमन्नारायणरामानुजजीयरमहाराजानां संकल्पेन आचर्यमाणा एते सर्वे कार्यक्रमाः महावैभवेन संम्रियेरन् ।

आस्तिकास्सर्वेपि संभूय भूयः भगवद्भागवताचार्यकृपाविषयाः कृतार्थतां भजन्त्विति प्रार्थना ।

प्रधानमन्त्री.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गांधीकथा

रचयिता विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्.

महात्मनः प्रभावोऽवश्यं महानासीत् । तस्य दर्शनम्, तेन वार्तालापः, तस्यानुयानं इत्यादीनि समानपि तं प्रति मुग्धान् कुर्वंति स्म । न केवलं बाला युवतो वृद्धाः, स्त्रियोपि भिन्नभिन्न-दशामापन्नाः तस्य महात्मनः गांधीमहोदयस्य दर्शनादिभाग्यं बहुधा वांछन्ति स्म । तेषां लालसा महती आसीत् ।

महात्मनस्तस्याश्रमवासिनस्तु सदा आत्मनः आश्रमनायकस्य कृते स्वासूनपि परित्युक्तं सिद्धा आसन् । केचित्तु कायेन मनसा वाचा तद्भक्ता आसन् । एतादशेष्वन्यतमः श्रीमगनलाल्भाई महाशयः । गांधीमहोदयस्य मनसि यत्कार्यं सर्वप्रथमं भासते स्म तस्य रचनात्मकानुष्ठाने प्रथमं मगन्भाई एव स्वशक्ति सुतरां विनियुंक्ते स्म ।

१९२८ क्रिस्तहायने महात्मनः निजकार्यदर्शिस्थानालंकृतः मगनः ऐहिक्याः यात्रायाः अन्तिमवन्दनं कृत्वा दिवं जगाम ।

आत्मप्रधानतमानुचरस्य मृत्युना नितरां दुःखितः गांधीमहाशयः शोकसभायां स्वेनैव रचितं भजनं "मङ्गल मन्दिर बोलो" गायन् भगवतः पुरतः उपाविशत् । अवसाने शोकस्यांतिमां दशां आपन्नस्य तस्य मुखात् स्वयं निस्ससार "अद्यायं गांधी मगनविहीनः विधवाऽभूत्" इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गैर्वाणीसप्तकम्

कविः – काव्यतीर्थ ज. व्यं. पल्लेवार उपाख्यः जयेशः, पुसद.

संस्कृतोत्तमवाग्रम्यां प्रजाकामप्रकाशिनीम् ।
नित्यं पठन्तु गैर्वाणीं गीर्वाणप्रीतिदायिनीम् ॥

साहित्यशास्त्रसंपन्नां नानाविषयाभूषिताम् ।
नित्यं पठन्तु गैर्वाणीं साहित्यानंददायिनीम् ॥

नानारससमाकीर्णां विनोदपरिवाहिनीम् ।
नित्यं पठन्तु गैर्वाणीं वाग्सुधारसवर्षिणीम् ॥

ललितकारसंपन्नां शब्दसौरभशालिनीम् ।
नित्यं पठन्तु गैर्वाणीं ब्रह्मानन्दसधर्मिणीम् ॥

नानाविचारसंपूर्णामार्यसंस्कृतिभूषिताम् ।
नित्यं पठन्तु गैर्वाणीं सरस्वत्यनुरागिणीम् ॥

गैर्वाणीं प्रकृतार्थाढ्यां बहुधर्मप्रकाशिकाम् ।
नित्यं पठन्तु गैर्वाणीं गुणगौरववर्धिनीम् ॥

मासि मासि सुसंपूर्णां विधोर्बिंबवदादृताम् ।
नित्यं पठन्तु गैर्वाणीं सकलां लोकचेतनीं ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

स्मरणीयाः महापुरुषाः – २.

महाराष्ट्रपतञ्जलिः

ले. श्री डि. वि. श्रीनिवासदीक्षितः, गुण्टूरु.

वेदाङ्गेषु प्रधानतमं व्याकरणशास्त्रम् । अत एव भगवान् पतञ्जलिः प्राह –

"षट्स्वङ्गेषु प्रधानं व्याकरणं, प्रधाने च कृतो यत्नः फलवान् भवति" इति ।

शिक्षादिषट्स्वङ्गेषु व्याकरणं वेदस्य मुखमित्युच्यते । यथा मानवस्य सर्वाङ्गेषु मुखं प्रधानं भवति तथैव वेदस्य व्याकरणं मुखमित्युक्तत्वात् तस्य प्राधान्यं सम्पद्यते । अत एव –

मुखं व्याकरणं तस्य ज्यौतिषं नेत्रमुच्यते ।
निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे ।।
शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान् प्रचक्षते ।

इत्युक्ति समुचिता भवति । व्याक्रियन्ते व्युत्पद्यन्ते शब्दाः अनेनेति शब्दज्ञानजनकं व्याकरणमिति निर्वचनम् । व्याकरणशास्त्रं शब्दानुशासनमित्यपि कथ्यते । अनुशिष्यन्ते अपशब्देभ्यो विविच्य कथ्यन्ते साधुशब्दा अनेनेत्यनुशासनं शब्दानुशासनमिति । सूत्रवार्तिकभाष्यव्याख्यानादिरूपं शास्त्रमित्यर्थः । शिक्षानन्तरं व्याकरणं द्वितीयवेदाङ्गतामावहति ।

गोपथब्राह्मणमुण्डकोपनिषद्रामायणमहाभारतादिग्रंथाः शब्दशास्त्ररूपेऽर्थे व्याकरणशब्दं चिरात् प्रयुञ्जते । भाषानियमप्रदर्शनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हि व्याकरणशास्त्रस्य मुख्यं कार्यम् । अपि च व्याकरणशास्त्रं न्यायमीमांसादिसर्वशास्त्रोपकारकम् । अत एवोक्तम् –

"काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति ।

पाणिनीयं व्याकरणम् –

अखिलभाषाविर्भावभूमि - सुरभारतीज्ञाननिदानस्य पाणिनिमहर्षेः तपःफलं व्याकरणं अष्टाध्यायिनाम्ना प्रसिद्धम् । अस्यां अष्टौ अध्यायाः, प्रत्यध्यायं चत्वारः पादाश्च सन्ति । अष्टाध्याय्यां आहत्य ३९९६ सूत्राणि सन्ति । इन्द्रवायुभरद्वाजभागुरिपौष्करसादिचारायणकाशकृत्स्नादिपरमप्राचीनाः त्रयोदश वैयाकरणाः पाणिन्युक्ताः । किन्तु पाणिनेरष्टाध्यायी भूमण्डले सर्वाणि व्याकरणान्यधरीकृत्य विराजते । पाणिनिव्याकरणस्य वार्तिकपाठः कात्यायनकृतः । कात्यायन एव वररुचिनाम्नापि व्यपदिश्यते । सर्वेष्वपि व्याकरणेषु लौकिकवैदिकोभयशब्दसाधकतया पाणिनीयव्याकरणस्यैव प्राधानं विद्यते ।

महाभाष्यरचना –

महाभाष्यं भगवत्पतञ्जलिविरचितम् । व्याकरणशास्त्रार्णवस्य अपूर्वं, अनुपमं, असाधारणं ग्रन्थरत्नं महाभाष्यम् । अतीव सरलेन सरसेन प्रकारेण व्याकरणविषयोऽस्मिन् प्रतिपादितः पतञ्जलिमहर्षिणा । पतञ्जलेः महाभाष्यं न केवलं व्याकरणशास्त्रस्य प्रामाणिकं, अपि तु संस्कृतवाङ्मयस्यैव प्रमाणभूतम् । अत एवोक्त भर्तृहरिणा वाक्यपदीये –

"कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने" ।। इति ।

महाभाष्ये प्रतिपादितो विषयः अपारः । तस्याध्ययनमेव असाधारणविषयः । तस्य मननं अशेषशेमुषीवतामेव सुलभो विषयः । महाभाष्यभाषान्तरीकरणं पतञ्जलेरंशरूपिणः एव साध्यं नान्यस्य ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तौ गुरुशिष्यौ धन्यौ –

प्रातः स्मरणीयः, अनेकशास्त्रपाण्डित्यपरमावधिः, शास्त्र-ग्रंथरचयिता, महाभाष्यस्य महाराष्ट्रभाषान्तरीकरणकर्ता च महा-महोपाध्यायः श्रीवासुदेवशास्त्री महोदयः।

श्रीवासुदेवशास्त्रिणः जन्म शालिवाहनशके १७८५ संवत्सरे अधिकश्रावणकृष्णषष्ठयां "सातारा" नगरे अभवत्। तस्य जनकः महादेवशास्त्री महाशयः। वासुदेवशास्त्रिणः शैशव एव (द्वितीय-वत्सरे एव) जनकः स्वर्गं गतः। पितामहोऽपि कालहतकेन अप-हृतः। श्रीवासुदेवशास्त्रिणः पितामहः व्याकरणशास्त्रप्रवक्ता, शब्देन्दुशेखरस्य व्याख्याता, विद्वन्मकुटरत्नबिरुदाञ्चितश्च भास्करशास्त्री अभ्यंकरः। पितृपितामहवियोगात् वासुदेवः अद्वि-तीयोऽभवत्। तदा भास्करशास्त्रि - अभ्यंकरस्यान्तेवासी रामशास्त्री गोडबोले वासुदेवशास्त्रिणं पोषयितुं बद्धकंकणोऽभूत्। आचार्यस्य पौत्र इति अत्यन्तादरेण तं वीक्षते, पोषयति स्म च। श्रीरामशास्त्री-महोदयः स्वशास्त्रवैदुष्यं सर्वमपि वासुदेवाय दत्वा महाराष्ट्रपत-ञ्जलिमकरोत्। तौ गुरुशिष्यौ धन्यौ।

आचार्याणां आचार्यः –

१८९१ संवत्सरे रामशास्त्री स्वशिष्यं वासुदेवशास्त्रिणं "पूना"नगरं प्रति प्राहिणोत्। तत्र वासुदेवशास्त्री अभ्यंकरः संस्कृत-विद्यालये पंडितस्थानं लब्धवान्। न्यायमूर्तिना महादेवगोविन्दरनडे-महोदयेन सिस्नेह। तदा एव मुम्बापुरीस्थकलाशालासु उत्कृष्टत-मायाः सुप्रसिद्धायाः फेर्गुसन् - कलाशालायाः प्रधानसंस्कृताचार्यस्य श्रीवामनशिवराम आप्टेमहोदयस्य अकालमरणेन तत्स्थानं श्रीरनडे-महाशयस्य गुणवर्णनपत्रदानेन (with Recomandation) वासुदेव-शास्त्रिणे दत्तम्। अस्यां पदव्यां ३६ संवत्सरान् स्थित्वा अमरवाणीं विद्यार्थिहृदयकुवलयेषु निक्षिपन्, अशेषशेमुषीवतः कुर्वन् १९२८ वत्सरे श्रीशास्त्री महोदयः विश्रान्तः। तत्कलाशालास्थानां शास्त्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोविदानां सकलसन्देहान् सुलभतया निराकुर्वन् विश्रान्तोऽपि चिराय स्थितः। सर्वशास्त्रवैदुषीभूषितः, सकलगुणसम्पन्नः, सहृदय-समाश्रयणीयः, सर्वदाऽभिगम्यः, सरसः, श्रीवासुदेवशास्त्री महोदयः "आचार्याणामाचार्य एव"। तदेव सर्वथा सर्वदा सत्यम्।

महाराष्ट्रपतञ्जलिः –

एते हि शास्त्रिचरणाः बहून् छात्रान् व्याकरणादिशास्त्राणि अध्यापयन्। विदुषामेतेषां वंशे व्याकरणशास्त्रास्याध्ययनं परंपरया एव अखंडितं प्रचलितमासीत्। किन्तु श्रीवासुदेवशास्त्रिभिः विशिष्य व्याकरणशास्त्रे अनितरसाधारणं प्रभुत्वं संपादितम्। अत एवायं पतञ्जलिप्रणीतं महाभाष्यं महाराष्ट्रभाषायामनूद्य "महाराष्ट्रपतञ्जलिरभूत्। जगतीतलेऽस्मिन् पतञ्जलेर्महाभाष्यस्य भाषान्तरीकरणकर्ता एतावत्पर्यन्तं श्रीवासुदेवशास्त्री महोदयः एक एव। अनेन संस्कृतभाषायाः व्याप्त्यर्थं कृतां अनितरसाधारणां कृषि ब्रिटीष्-प्रभुत्वं ज्ञात्वा श्रीशास्त्रिणं "महामहोपाध्याय" बिरुदाङ्कितमकरोत्। सङ्केश्वरपीठाधीश्वरः "विद्वद्रत्नं" इति व्याहरत्। अस्य पुत्र. महामहोपाध्याय श्रीकाशीनाथवासुदेव अभ्यकरपण्डितः। श्रीशास्त्रीमहोदयेन –

१. काव्यप्रकाश, २. यतीन्द्रमतदीपिका, ३. पतञ्जलि-योगसूत्राणि ४. न्यायकोशमित्यादीनि परिष्कृतानि।

१. ब्रह्मसूत्राणि, २. शङ्करभाष्यम्, ३. महाभाष्यम् इत्यादीनि भाषान्तरीकृतानि। (महाराष्ट्रभाषायां)

१. भगवद्गीताव्याख्या, २. परिभाषेन्दुशेखरव्याख्या, ३. मीमांसान्यायप्रकाशव्याख्या, ४. लघुशब्देन्दुशेखरव्याख्या इत्याद्यनेकाः कृतयः विरचिताः।

१९३९ संवत्सरे श्रीशास्त्रिचरणाः परलोकं गता अपि स्वीयैः सुचरितैः सुरचितैः महाभाष्यादिभिः ग्रंथैः कीर्तिरूपं प्राप्ताः अत्रैव निवसन्तीति मे हार्दं वचनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गैर्वाणी सा जयतु सुचिरं भारते राष्ट्रभाषा

लेखकः विद्यानिधिः वे. मोरेश्वर ग. उपाध्यायः ज्योतिषी अरगे.
(कारवार)

प्राचीना या जगति सकले देवभाषा समेषाम्
सर्वा भाषाः सकलविधिभिः संश्रयन्ते सदा यां ।
रक्ष्या पूता भरतभुमहासंस्कृतिः सा ययैव
गैर्वाणी सा जयतु सुचिरं भारते राष्ट्रभाषा ॥

यस्यै दत्ता सकलसमये चादितो वाक् समासे
यस्याः उक्तौ ललितसरसा श्राव्यता सौष्ठवं च ।
विद्वांसस्तु प्रथितमतयस्सन्ति यस्याः प्रसादात्
गैर्वाणी सा जयतु सुचिरं भारते राष्ट्रभाषा ॥

यस्यां संति श्रुतिधनमहाभारताद्याः पुराणाः
दैवी वाणीत्यनिशमखिलैः स्तूयमाना पवित्रा ।
सांगा वेदाः समजनिषतानादयो यत्प्रसादात्
गैर्वाणी सा जयतु सुचिरं भारते राष्ट्रभाषा ॥

या वाणीशमुखाद्विनिर्गतवती वेदस्वरूपेण या
धर्माधर्मविवेचनेऽतिनिपुणा विज्ञानसंधायिनी ।
कर्माचारविधानबोधकुशला दक्षा बुधाराधिता
गैर्वाणी जयतात् महीशुभकरी सा राष्ट्रभाषा भवेत् ॥

सर्वलोकप्रियकरी विश्वशांतिप्रदायिनी ।
लोककल्याणसंधात्री जीयाद्गीर्वाणभारती ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमामि तां सदा गोदाम्

लेखकः श्री ना. ब. निगमान्तः, प्रोद्दुटूरु.

गुणालयां सदा भजे विराजदाननाम्बुजां
नमत्कराङ्गुलीचलद्द्विवर्णकीरभासिनीम् ।
अनल्परागिरङ्गराजचित्तहारिणीं सतीं
भुवङ्गतामिव श्रियं च विष्णुचित्तनन्दिनीम् ॥

सुशीलविष्णुचित्तभाग्यसन्ततेस्सुमावृते
वने तुलस्यलङ्कृते शुभंयुतारके दिने ।
कुलीरमाससङ्गते जनिं कृतां नमामि तां
प्रसिद्धविल्लिपुत्तुराख्यपत्तने विभासिनीम् ॥

शिशुत्व एव कृष्णचेष्टितेषु बद्धमानसां
मनोज्ञपद्यसंस्तुतप्रियामनिन्द्यवैभवां ।
नमस्करोमि सच्चरित्रशालिनीं सुमालिनीं
विशुद्धभक्तिपूतसुन्दराङ्गलासिनीं शुभाम् ॥

अवाप भुक्तमाल्यदेति नाम या महाशयै-
र्वितीर्णमाशु निर्मलं फणीशभोगशायिने ।
समर्पणाद्धृतोज्झितस्रगुत्तमस्य सद्यशः
भजामि तां स्मिताननां समस्तशास्त्रपारगाम् ॥

यदूत्तमं वृता हृदा गुणाभिरामविग्रहं
तदीयशौर्यदीपिकां मुदा तु पद्यमालिकां ।
चकार मार्गशीर्षके व्रतं चरन्त्यसौ पुरा
नमामि तां वराङ्गनां विनीतमस्तको ह्यहम् ॥

स्वयं हि गोपिका सती पुरं तदेव गोकुलं
यदूद्वहं विचिन्त्य यां भुजङ्गतल्पशायिनं ।
पुरस्थितास्स्त्रियश्च तां सुगोपयोषितः पुरीं
विशुद्धभक्तवन्दितां ततान सा गतिर्मम ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितानि

अनुवादकः श्री एन्. रामनाथार्यः.

(पूर्वानुबन्धः)

वरं प्राणपरित्यागः न विरोघो भवादृशैः ।
प्राणा जन्मांतरे भूयो भवन्ति न भवद्विधाः ॥ ॥ ४९३ ॥

It is better to give up life than to get separated from friends like you; In another birth life would come back but not persons like you.

एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य ।
तावत् द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति ॥ ४९४ ॥

Before I could reach the end of a sea of misfortunes, another misfortune has befallen me. Misfortunes multiply when one is in distress.

बलीयसा समाक्रान्तः वैतसीं वृत्तिमाश्रयेत् ।
वांछन् अभ्रंशिनीं लक्ष्मीं न भौजंगीं कदाचन ॥ ४९५ ॥

When one is overpowered by stronger men, one should behave like the cane plant (ie. he should be submissive). One who would like to be ever prosperous, should never assume the attitude of a serpent (which raises its hood in defiance and perishes).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नक्रः स्वस्थानमासाद्य गजेंद्रमपि कर्षति ।
स एव प्रच्युतः स्थानात् शुनापि परिभूयते ॥ ॥ ४९६ ॥

A crocodile from its place (in water) can attack even an elephant; dislodged from its place, it can be overpowered even by a dog.

असहायस्समर्थोऽपि तेजस्वी किं करिष्यति ।
निर्वाते ज्वलितो वह्निः स्वयमेव प्रशाम्यति ॥ ॥ ४९७ ॥

Though powerful what can a person accomplish without the help of others. Fire kindled in a place where there is no wind, gets extinguished of its own accord

संगतिः श्रेयसी पुंसां स्वपक्षे च विशेषतः ।
तुषैरपि परिभ्रष्टाः न प्ररोहान्ति तंडुलाः ॥ ॥ ४९८ ॥

Cooperation with others, especially with one's own party, is always good, to everyone. Even rice does not grow up shorn of the husk.

न तादृक् जायते सौख्यमपि स्वर्गे शरीरिणाम ।
दारिद्र्येपि हि यादृक् स्यात् स्वदेशे स्वपुरे गृहे ॥ ॥ ४९९ ॥

Even heaven does not bestow as much happiness on a person, though in poverty, as happiness he derives from residing in his own country, in his own town and in his own house.

(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

श्रीमण्डली

(नाटिका)

विद्यावाचस्पति, महोपाध्याय, साहित्याचार्य, कविसार्वभौम, कवीन्द्र,
श्री शिवशङ्करशास्त्री, साहितीसमितिः, ओंगोलु.

पात्राणि

स्वामी अनाथाः ऊर्मिला सरला रोहिणी इन्दिरा शर्मा शास्त्री।

प्रथमो रङ्गः

श्रीमण्डलीनाम्नि मठे विशाला कक्षा, तस्या उभयपार्श्वयोः द्वारे स्तः । शालाया मध्यभागे आन्दोलिकाफलकोपरि उपविष्टो मठाधिपतिः श्रीआनन्ददासस्वामी मन्दं मन्दं प्रेंखोलयते । स च ईषत् स्थूलकायः श्यामवर्णः; तस्य शिरः फालफल्येन चकास्ते । तत्कण्ठे विविधवर्णकुसुमदामानि विराजन्ते । स्वामी कौशेयकाषाम्बरधारी; शान्तं सरलं भाषते (मृदुभाषी) ।

अत्रान्तरे बालवितन्तुत्रयं प्राक्पश्चिमद्वारमार्गाभ्यां हठात् प्रविशति । स्वामी निश्चलो भवति । वितन्तवः तस्य पादात्रुपस्पृश्य विचुंब्य स्वकरतलैरर्थनिमीलितनेत्राणि मार्जयन्ते । स्वामी तासां शिरांसि लालयति । ईषच्च्युतावगुण्ठनानि ताः कर्णबाह्यं संस्कुर्वन्ति । अनाथाबृन्दगीतिः –

दर्शनलाभेन गुरोः सर्वाश्चिन्ता अपसृता नः
इहपरचिन्ता अस्माकं अपसृताः किलापसृताः किल ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहह! गुरुदर्शनमभूत् गुरोस्सद्गुरोश्चास्माकम् ।
इहचिन्ता: परचिन्ता: न भवन्तीत:परं न: ॥

स्वामी (सस्मितम्) नारायण! अत्रोपविशन्तु!

(अनाथा भूमावुपवेष्टुमुद्यता:) अधस्तात् मोपाविशत, स्त्रिय: समानस्थानमर्हन्ति खलु!

अनाथा: – स्वामिनां भवतां सान्निद्ध्ये तिष्ठन्तीनामास्माकं न लोप: कोपि! भवद्दिव्यमूर्ति विना नास्माक - मन्यद्वाञ्छितव्यम् स्वामिपादा: !

स्वामी – स्त्रिय:, तत्रापि शिष्या विशेषादरेण द्रष्टव्या:। अत्र मम सकाशे दारुफलके उपविशन्तु भवत्य:! (तास्तथा कुर्वन्ति) ग्रामे मठविषये तु किं वदन्ती व्याप्ता इति ऊर्मिला-देव्या इन्दिरया च निवेदितं ह्य: ।

प्रथमा अनाथा – स्वामिन:, जनाभिप्रायस्तु मुग्ध: खलु!

द्वितीया – यदा जनसंघो मूढ:, तदा तदभिप्रायो मूर्ख एव।

स्वामी – जना नितरां मां निन्दन्तीति ज्ञायते। दूषण-भूषणे इमं देहिनं स्प्रष्टुं न समर्थे!

अनाथा: – ये भवतो निन्दन्ति ते कीटपातं मरिष्यन्ति!

स्वामी – ऊर्मिलाया भर्ता किं ब्रूते ? (दरहसितम्)

तृतीया – स भार्यायामतीव कुपित: ।

स्वामी – सायंसमये सप्तघण्टिका: श्रुता: । तथापि सा मठं न प्राप! हन्त! कल्येऽपि सा नायाता!

द्वितीया – कथमागच्छति! यत्तस्या भर्ता द्वारमपि बबन्ध: जालकद्वाराण्यपि निबद्धानि ।

स्वामी – जालकशलाकांतरप्रदेशद्वारा सा मदन्तिकमाप्नो-तीति वा (मां सन्निधास्यतीति वा) ।

अनाथा: – किमुच्यते! लोका मूढा: !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वामी – पतिः कः ? भार्या का ? आचार्यपादैः किमादिष्टम् ? "का ते कान्ता ? कस्ते पुत्रः ? संसारोयमतीव विचित्रः?" स भर्ता उन्मत्तप्रायः ! नो चेत् पत्नीं कियत्कालं पञ्जरे बध्नाति !

प्रथमा – स्वामिभिस्सुष्ठूक्तम् ! अज्ञानपूर्णा वयं कियत्कालं गृहपञ्जरे तिष्ठेम ?

स्वामी – पञ्जरविहगस्य मुक्तिः का ?

अनाथाः – चित्तम् !

स्वामी – पञ्जरान्तरादुड्डयने मुक्तिः !

द्वितीया – बोधसमये भवद्भिर्यथाऽऽदिष्टं तथा गुणदेहेन सह यावज्जीवी वर्तते तावन्मोक्षो नास्त्येव !

तृतीया – भागवतपठने स्वामिनः परह्यः तदादिशन् मातृष्वसुः !

स्वामी – गृहेभ्यो बहिर्निर्गमिष्यन्ति यदि स्त्रीणां मुक्तिर्नास्ति !

प्रथमा – किं मठोपि गृहं न भवति ?

स्वामी – यथा गृहं निर्मितं तथैव मठोऽपि निर्मितः शिलाभिस्सुधया च । किन्त्वेष ज्ञानमयः, आनन्दमयश्च; गृहं पुनरज्ञानमयं, दुःखमयं च ।

अनाथाः – स्वामिनो यत्र यत्र वर्तन्ते तत्र तत्र ज्ञानानन्दौ विराजेते ।

स्वामी – मम दिव्यबोधे एकमेव महावाक्यरूपेण ब्रवीमिः "स्वस्मिन् यदस्ति, त (दद्वितीयं) दन्वेषय; गृहाद्बहिरागच्छ ।"

अनाथाः – अहह ! क आनन्दः ! का वाचः !

स्वामी – यथा गोपिकाः पतीन्, शिशून्, श्वशुरौ, गृहादीन् त्यक्त्वा श्रीकृष्णस्य सकाशं प्राप्ता इति पठितमस्माभिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमा – आनन्दस्वरूपा नानन्ददायकान्भवतोऽप्राप्य, यावत्कालं गृहमिति बन्धुरिति भावेन जनः स्थितः तावत् किं मोक्षसाम्राज्यं लभ्यते !

स्वामी – गोपिकाः सर्वस्वं तत्यजुः; आत्मनः सर्वस्वं त्यक्तुं समर्था यदि एते शिष्या अपि किं न मुक्ता भवेयुः ?

द्वितीया – अस्मादृशानां स्वेच्छा जीवद्भर्तृकाणां नास्ति ।

स्वामी – विनन्तवस्तावत् परिपूर्णा खलु !

तृतीया – ननु वितन्तुशब्दस्यार्थः कः ?

स्वामी – वि - इति, विगतः - तन्तुरिति प्रकृतिसम्बन्धः, अज्ञानबन्धः । तदा यूयं शुद्धज्ञानमूर्तयः । द्वयोः एकं लुप्तं भवति चेत् एकमेव शिष्यते; तत् पूर्णम् ।

अनाथाः – किं सर्वा वितन्तवो ज्ञानमूर्तय एव ?

स्वामी – अथकिं ! कस्सन्देहः ? यूयं ज्ञानमूर्तयः । युष्मत्सवरूपन्तु शुद्धस्फटिकसंकाशं, शुद्धसत्त्वमेव !

तृतीया – स्वामिनः, नो वस्त्राणि शुद्धानीति तथा ब्रुवन्ति ननु ! किं सा छलोक्तिः !

स्वामी – न हि, न हि ! सूक्तिरेव ।

प्रथमा – तदा रक्ताम्बराणां वितन्तूनां का कथा ?

स्वामी – तास्तु रजोगुणाधिकाः ।

अनाथा – ननु वयं पुनः ?

स्वामी – यूयं तु त्रिगुणातीताः ।

अनाथाः – इन्दिरा, ऊर्मिला, सरला देव्योऽपि त्रिगुणातीताः किम् ?

स्वामी – तास्तु सभर्तृकाः ।

प्रथमा – भवदन्तिकं प्राप्तुं समुत्सुकास्ताः । सरला पुनः सर्वदा भवत्स्वरूपध्याने तन्मयीभूता वर्तते ।

– (अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुक्कूर श्रीमदळहियशिंगर विंशतिमाला

कवयिता पैत्तांबाडि महाकवि श्री व. रामानुजाचार्यः.

श्रीनृसिंहपदांभोजध्यानार्चनकृतादरम् ।
श्रीमद्वेदान्तसूरीन्द्रयोगितल्लजमाश्रये ॥

त्र्यग्रग्रविद्विराजच्छ्रीत्र्यग्राख्याद्यस्वनामकम् ।
श्रीरम्यनरसिंहश्रीवेदान्तार्यमुनिं भजे ॥

कालेऽस्मिन् कालिकल्मषेऽपि भगवान् लक्ष्मीनृसिंहस्स्वयं
ज्ञानानुष्ठितिधुर्यतात्रयमसौ यस्मिन् सुतीक्ष्णं बुधे ।
दृष्ट्वा नैजमठाधिपं तमकरोदेतत्रितीक्ष्णाभिधा
द्याख्य श्रीनिगमान्तदेशिकशठद्विड्योगिनं संश्रये ॥

पंचषपदाभिषिक्तश्रीयोगीन्द्रादिसाहचर्यवशात् ।
विदितात्ममठसुवेद्यं नृहरिश्चक्रे यमर्चकं नौमि ॥

श्रीनैमिशारण्यतले गते स्वं स्थिरं पदं वीररघुप्रवीरे ।
निजार्चके योगिवरे तदर्थं यमेव चक्रे नृहरिस्स नोऽव्यात् ॥

त्रितीक्ष्णाग्रहाराभिजातो बुधेन्द्रः स पूर्वाश्रमे राजगोपालनामा ।
इदानीं त्रयीशीर्षसूर्याख्ययोगी गुरुर्नश्श्रितानां शुभानि प्रदद्यात् ॥

श्रीवीररघ्वीशशठारियोगी श्रीराजगोपालसुधीन्द्रमेनम् ।
पूर्वाश्रमे यं स्वपदे नियुज्य स्थिरं पदं प्राप गुरुं तमीडे ॥

शठारिरामानुजवेदशीर्षसूरीन्द्रसूक्त्यर्थरहस्यवेत्ता ।
मन्वादिशास्त्रार्थनिगूढवेदी स सर्ववित्त्वं दिशतात् गुरुर्नः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचिनोति हीति लक्षणोक्तिलक्ष्यतां भजन्
अयं त्रयीशिरोगुरुश्शठारियोगिपुंगवः ।
निजाङ्घ्रिपद्मसंश्रितान् स्वधर्मवर्त्मसंस्थितान्
दयानिधिस्स कारयन् चिरं जयत्वपि क्षितौ ॥

श्रीरंगनाथकमलानरसिंहरंगश्रीवीरराघवशठारियतिप्रवीरैः ।
काले भवत्वयमपि स्ववदित्यनूक्तो वेदान्तदेशिकमुनिस्स गुरुश्रियै नः ॥

यस्मिन् श्रीमदहोबिलेशभगवान् लक्ष्मीनृसिंहो बुधे
स्वेनैवोत्तरदेशतीर्थनमनं संकारयित्वाऽदिशत् ।
मध्येमार्गमुपेयुषि स्थिरपदं श्रीवीररघ्वीश्वरे
योगीन्द्रस्वमठं हि नैमिशवने वेदान्तसूर्याख्यके ॥

प्रस्थाय सोऽपि च ततः प्रतिनगरग्राममभिचरन्नेषः ।
शकटोष्ट्रवाजिगजमुखपरिजनपरिसेवितोऽवति ह्यस्मान् ॥

चतुश्चत्वारिंशे नृहरिमहिताहोबिलमठे -
ऽभिषिक्तो ह्यास्थाने निजचरणयुग्मांबुजजुषाम् ।
दिशन् सर्वाभीष्टानखिलमनुजानां यतिवर -
श्चिरं जीयाल्लोके निगममकुटो देशिकबुधः ॥

कठवल्लिमुखवेदपठनैकनिरतो
नरसिंहमठपीठविजयासनस्थः ।
श्रुतिमौळिगुरुनामयतिशेखरो मे
स्वनुतौ मतिं व्यदिशदिह देशिकोऽसौ ॥

अहोबिलमठस्य धूर्वहनतत्परेऽस्मिन् गुरौ
त्रयीशिखरदेशिकाभिधयतिप्रवीरेऽधुना ।
जडोऽपि विबुधायते बुधजनस्तु मुक्तायते
कलिः कृतयुगायते स्तुतिकृदेष दासोऽप्यभूत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यं संभाषणरम्यसिंहमपरं श्रीनाथयोगीश्वरं
श्रीरामानुजयोगिवर्यमपि च त्रय्यन्तसूरिं तथा ।
आद्यश्रीशठकोपसंयमिवरं प्राहुर्बुधास्तं त्वहं
मन्ये तत्सकलैक्यरूपममलं ध्यायामि योगीश्वरम् ।।

किंगृहहरेः प्रदत्तो निजपरिवारस्य वारणत्रितये ।
एको येन विना तं गुरुं वदान्यस्तु को वदाऽन्योऽस्ति ।।

तेषामुदारभावनां त्रय्यन्तगुरुयोगिनाम् ।
चरणांभोरुहद्वन्द्वान्नाऽन्या नो गतिरस्ति हि ।।

दयासौशील्यवात्सल्यमुखा आत्मगुणा गुरौ ।
यस्मिन् खेलन्ति संयुक्ताः नौमि तं योगिशेखरम् ।।

मालोलविष्णोरिह नित्यवासात् वेदान्तसूरीन्द्रयतीन्द्रसूरेः ।
अहोबिलक्षेत्रमभूत्पुरं च मुक्कूरभिख्यस्तु बुधाभिवन्द्यः ।।

पैत्तांबाडिनिवासेन श्रीवराहार्यसूनुना ।
रामानुजकवीन्द्रेण बहुग्रन्थकृता कृता ।।

त्रितीक्ष्णाख्याग्रहारश्रीरम्यसिंहगुरोरियम् ।
समर्पिता पदांभोजयुग्मे विंशतिमालिका ।।

जातिविध्वंसकानि सप्तमहापातकानि

(१) सिद्धान्तरहितं राजकीयं, (२) श्रमं विना प्राप्ता सम्पत्, (३) अन्तश्शुद्धिविहीनो भोगः, (४) शीलशून्या पांडिती, (५) नीतिनियमदूरं वाणिज्यं, (६) मानवक्षेमनिर्लक्ष्यं विज्ञानं, त्यागशून्यं आराधनं च इति १९२१ वत्सरे गांधीमहात्मा अवोचदिति श्रीराष्ट्रपतिः लक्नोनगरे गांधीभवनविभागं समुद्घाटयन् अस्मारयत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काचतंतवः कथं उत्पाद्यन्ते ?

(गूढलेखिनी)

सामान्यकाचः तत्र नोपयुज्यते । तेषु यः प्रमुखः घटकः भवति शिलिकण (सिलिकॉन) या काच इत्याख्यः स एव तदर्थे उपयुज्यते । तस्य गुणाः काचसदृशाः एव भवन्ति । १४१०° सेंटिग्रेड तापे द्रवीभवति, पारदर्शकश्चास्ति ।

एष सान सान स्टील - पात्रेषु द्रवीक्रियते । तेषां अधोभागे सुदृढाः पिहिताः स्टील - नलयः संयुक्ताः तिष्ठति, परं तासां अंतरभागास्तु सूचिकाग्रवत् भवंति । तासां अधः भवति एको दीर्घो रम्भः (सिलिंडर) । स च विद्युत् - गन्त्री - साहाय्येन महता रभसेन परिभ्राम्यते स्वीयाक्षे यत् तस्य पृष्ठभागः ४० - ४५ कि. मी./घंटा वेगेन धावति । तत काचित् दीर्घा छुरिका तेन संलग्ना तिष्ठति। तदनन्तरं भवन्ति चिमटाः (पिंचेस) ततः अन्ते गुंठलयः (स्पिंडल्स)।

सूक्ष्मनालिद्वारान्निर्गतः काचरसः रंभोपरि बहुविधसूक्ष्मतंतूनां रूपेण पतति झटिति. सः अग्रे नीयते । छूरिकया ते तंतवः पृथक् क्रियन्ते । ततः ते उत्थाप्य गुठलीनां उपरि नीयन्ते । ताः अपि यन्त्रचालिता तंतून् स्वोपरि आवृण्वन्ति समुचितक्रमेण ।

इत्थं कार्पासवत् काचतंतवः अपि प्रयत्नै. निर्मिता भवन्ति। एते कौशेयतंतुवत् मृदुलाः चमचमन्ति । तैः वस्त्राणि तथा विविधपदार्थाः निर्मीयन्ते ।

१९४० तमे क्रिस्ताब्दे अमेरिकास्थेन "ओवेन्स कॉनिंग्स" नामककाचोत्पादकेन एषा पद्धतिः आविष्कृता । एवं तु सामान्यतः अपि काचदण्डिकां मध्ये बिगलय्य उभयतो दूरं आकृष्य ४ - ५ फूटमितः तंतुः निर्मीयते स्म । परं अनया पद्धत्या तु विपुलप्रमाणेन काचतंतवः सुदीर्घाश्च उपलब्धाः भवन्ति । अद्य किल विविधराष्ट्रेषु तथा भारते अपि कोईम्बतूर, दिल्ली, कलकत्ता, मुंबई इत्यादिस्थानेषु काचतन्तु - निर्माणिकाः विद्यन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यया किं प्रयोजनम् ?

लेखकः श्री के. टि. नरसिंहः,
(व्याकरण - साहित्य - शिरोमणिः शिक्षाशास्त्री.)

अर्कः आतमश्च प्रभावं प्रदर्शयति । मानुषकृत्येषु जुगुप्सितो भूत्वा स्वकिरणै सन्तापयति पृथिवीम् । अथाऽपि एते मानवराक्षसाः न गणयन्ति तापं, न विरमन्ति कार्यात्, न बिभ्यति सूर्यात् । यथेष्टं मध्याह्नेऽपि व्रजन्ति । तस्मिन् जनसमूहे मालाऽपि काचन अबला ।

गच्छति, गच्छति, सा गच्छति, सुदूरं गच्छति । कुत्र गच्छति ? किमर्थं व्रजति ? न वयं जानीमः । साऽपि न जानाति । परं नरव्याघ्रेभ्यः आत्मानं रक्षितुं धावति सा । माला वीथ्यां अतति, तस्याः पादौ उष्णेन तप्तौ, जङ्घे गमनेन खिन्ने, उदरं जलेन पूरितं, मन निराशया शून्यं जातं, करौ स्वेदेन सिक्तौ, ग्रीवा एकया मणिमालया पूरिता, अधरं उच्छिष्टेनाऽऽद्रीकृतं, चक्षुः दौर्बल्येन विना यत्नं निमीलितं, कर्णौ दूष्यभाषणैः संपूरितौ, शिरः भास्करबाहुभिः प्रताडितम् । एषैव माला मध्याह्ने पथि लक्ष्यरहितयन्त्रमिव भ्रमति ।

सा का ? या जन्मकारकरहिता, दारिद्र्योपासिनी, शोकमूर्तिः, प्रकृतिसौन्दर्यशालिनी, शुद्धशीलवती, अष्टादशवर्षीया, अनाथा च जीवति सा माला । यया मुद्रालेखनयन्त्रशिक्षणं (Type - writting) अभ्यस्तं यया माध्यमिकपरीक्षा (SSLC) सफलीकृता यया संग्रहलेखनकला (Short - hand) आधीता सैव माला अज्ञेव, मूढेव, अन्धेव च गच्छति । तत्र को हेतुः ? आतम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्षणोपायाभाव एव। षण्मासाः गताः, बहूनि विज्ञापनपत्राणि (Applications) प्रेषितानि, बहुधा गोष्टीषु (Interview) उपस्थितम्। अथाऽपि तया स्त्रीत्वभङ्गरहिता काऽपि वृत्तिः न लब्धा। तत्र किं कारणम्?

अस्याः अशक्तिः न, नैपुण्याभावो न, असामर्थ्यं न, अज्ञानं न, अहङ्कारो न, अविनयो न, परं किं तर्हि? समाजस्य नीचता, सामाजिकानां कुटिलवृत्तिः, अधिकारिणां पशुत्वं, धनिनां कामवह्निः। सत्यं (गतानुभवान् भूयोऽपि एकवारं स्वमनसि स्मरति सा)।

स्मर्तुमेव अयोग्यं यत् तत्तु सर्वात्मना वक्तुमशक्यम्। अथाऽपि वक्ष्यामि। यतः लोकेनानेन मत्सङ्गमः इतःपरं कतिपयनिमेषाण्येव भविष्यति। ततः पूर्वमेव मच्छोकवृत्तान्तं ब्रवीमि। यतः याः यौवनान्धत्वेन अज्ञानिन्यो भूत्वा लैङ्गिकसुखेषु आत्मानः पातिव्रत्यं कुलगौरवञ्च निमज्जयन्ति तासां कृते मद्वृत्तान्तः गुणपाठो भवतु नाम।

पूर्वं मया उद्योगाय प्रयत्नः कृतः। वयसा, रूपेण, ज्ञानेन च सहकृता सती वृत्तिरूपास्थानमण्टपे अभिषिक्ता चाहमभवम्। परं न मया उषितं तत्र। कुतः? यस्याः शीलसंरक्षणे वर्तते रुचिः सा न तत्र (उद्योगे) जीवति, जीवितुं वा न प्रभवति। किमर्थं? कार्यालये उत्पीठिकायाः (Table) पार्श्वे उपविश्य विषयं (Matter) वक्ति सः धूर्तः। अपरपार्श्वे उपविष्टायाः मत्पादाभ्यां साकं क्रीडतः तस्य पादौ। तस्य चक्षुः विषयं न पश्यति, किन्तु विषमं पश्यति। कार्यं नाऽपेक्ष्यते तेन, परं सेविकाकायमपेक्ष्यते। आदरं न वाञ्छति सः, अपितु अधरमेव केवलम्। भगिनीबुध्या न पश्यति मां, किन्तु भार्याबुध्या व्यवहरति। अतः कासां सह्या ईदृशी बाधा जीवनयात्रायाम्?

या युवतिः वर्तते, या स्वपादाभ्यां स्थातुमभिलषति, या स्वशीलं पातिव्रत्यं वा दर्पणस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसं इव,तटाकस्य जलमिव, शरीरस्य प्राणं इव, चमर्याः केशान् इव, शकटस्य चक्रमिव, राजकीयनायकस्य मन्त्रिस्थानमिव, सज्जनस्य बुद्धिमिव, लतायाः पुष्पमिव, नद्याः तटीमिव, चलचित्रनायिकायाः लावण्यद्रव्यमिव च मनुते सा स्ववृत्तिं, उपोढुं अशक्ता, अबला च भवति । अत्र दृष्टान्तभूता अहमेव । मन्दभाग्यायाः मद्वृत्तान्तमेव वक्ष्यामि –

एकस्मिन् प्रसिद्धपाश्चात्यकार्यालये मया वृत्तिर्लब्धा । मम वेतनन्तु पञ्चशतम् । अहमासं आनन्दसीम्नि । मद्भाग्यज्योति अतीव प्राकाशत । परं गच्छता कालेन पुरुषस्य लक्षणं, नीचस्य स्वरूपं, अधिकारिणः अन्तरात्मा, कुटिलस्य चेष्टा च ज्ञाता मया । मम अधिकारिणः वयः पञ्चपञ्चाशत् । स तु वयसा स्थानेन च वृद्धोऽपि चेष्टया युवा, दृष्ट्या पशुः, कर्मणा नरमांसबुभुक्षुः । एकदा तेनाऽहं परिपीडिता । तदारभ्य त्यक्ता मया सा वृत्तिः । तन्न सत्यं निष्कासिता तेनेति । कारणं पृष्टं मया । तदा सः मूर्खः विललाप "कार्यकरणार्थं कार्यालये सन्ति बहवः । अतः त्वद्वृत्तिस्तु न केवलं कार्यनिर्वहणं, अपि तु मयि स्वानुरागप्रदर्शनमिति" । सद्यः तं कपोले प्रताड्य तस्मात् भवनात् अहमवातरम् । भूयोऽपि कार्यालयान्तरे समारूढा जाताऽहम् । तत्रस्थः कश्चन सहोद्योगी युवा मां ऐच्छत् । जाताऽहमपि तस्मिन् मदनाक्रान्ता । गतानि दिनानि । स्नेहः प्रावर्धत । अनिच्छन्तीमपि मां उपभुक्तवान् सः । परं न दत्तं मे तेन स्वगृहिणीस्थानम् । विचार्यमाणे स तु पूर्वमेव विवाहितः । तस्य पुत्रौ द्वौ एका पुत्री च वर्तन्ते । पश्यंतु अबलानां जीवनम्, परामृशन्तु यौवनस्य प्रमादं ।

अत एव गच्छामि । कुत्र ? उद्योगार्थं न, तेन साकं युद्धाय न, यत्र कुत्राऽपि जीवनाय न । कुतः ? ममाशा मृगतृष्णिका जाता, यौवनं सागरजलं जातं, प्रयत्नः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुभूमौ पतिता वृष्टिः, लावण्यममावास्यारात्रिर्जाता । अतः नेच्छामि जीवितुं, नाऽभिलषामि कमपि द्रष्टुं, नास्ति मे किमपि लक्ष्यम् । अत एव गच्छामि, गच्छामि । यावत् शरीरे प्राणास्सन्ति तावदवधि गमिष्यामि । ततः जलाभावे सस्यं इव मरिष्यामि ।

प्रेमा विद्यैतद्वयोर्मध्ये
प्रेमैव हि भवेत् गुरुः ।
प्रेम्णैव लभ्यते विद्या
विद्यया किं प्रयोजनम् ॥

मालायाः मरणे मूलं
शीलमेवाऽत्र कारणम् ।
नरमांसबभुक्षुभ्यो
नार्यो नश्यन्ति सांप्रतम् ॥

परीधावि-उत्तरायणपरीक्षासु

सर्वप्रथमतया उत्तीर्णे:

विचक्षणा
बि. रमादेवी, सेलं.

अभिज्ञा
एस. शुभा, श्रीरंगम्.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

६. परमशिवपरीक्षा

काशीं गतः शंकरः प्रत्यहं गंगास्नानं कृत्वा तपश्चाचरन्नास्त । कस्मिंश्चिद्दिने कश्चिद्ब्रह्मचारी तमुपेत्य प्रणनाम ।

ब्रह्मचारी प्रह – स्वामिन्! अहं कावेरीतीरवासी सनन्दननामाऽस्मि । संसारनिस्पृहोऽहं सन्यासाश्रमस्वीकारार्थं भवदन्तिकमागतोऽस्मि । मां शिष्यत्वेन परिगृह्य अनुगृह्णातु तत्रभवान् इति ।

शंकरः सदयं तं शिष्यं पर्यग्रहीत् । कदाचित् शंकरः सनन्दनाय तत्त्वं प्रबोधयति स्म । तदा चण्डालः कश्चित्सुरापानमदमत्तः अवाच्यानि अश्लीलानि प्रलपन्, अनियन्त्रितगात्रगतिरितस्ततश्चलन्नध्वना तेनैवायातः तयोः उपरि पतन्निव आसीत् । कुपितः सनन्दनः "अरे! दुष्ट, दूरं गच्छ" इत्याह । अथैवमुक्तः स प्रत्याह– "दूरं गच्छेति कं प्रति कथयसि? देहमुद्दिश्य? अथवा देहिनं?" श्रुत्वेमं प्रतिप्रश्नं सनन्दनश्चकितोऽभूत् ।

'देहमुद्दिश्य चेद्ब्रूषे "गच्छे"ति तर्हि अन्नमयाद्भवदीयाद्देहात्तादृशस्यैव मदीयस्य को वा भेदः? येन कस्यचिद्देहस्य देहान्तरं दूरतः कर्तव्यं भवेत् । न देहं, किन्तु देहिनमेव गच्छेत्युक्तवानस्मीति चेत् तर्हि गंगायामिव सुरायामपि प्रतिबिम्बभावं भजन् सूर्य इव आत्मा त्वदीये मदीयेऽपि शरीरे निर्विशेषं भासते' इति चण्डालो व्यवृणोत् ।

शंकरः सनन्दनमाह – "वत्स! मया बोध्यमानं तत्त्वमेतत् अनेन महात्मना ते सम्यक्प्रबोधितम् ।"

इत्युक्त्वा अभ्यागतं नमस्कृत्य "स्वामिन्! अस्मान् परीक्षितुं आगतः परमशिव एव भवान्" इत्याह शंकरः । चण्डालरूपेणागतः परमशिवः निजरूपं प्रदर्श्य "वत्स! ब्रह्मसूत्रभाष्य - रचनार्थं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोविन्दयतिस्त्वां प्रेषयामास किल! तमेव विषयं पुनः स्मारयितु-महमागतोऽस्मीत्युक्त्वाऽन्तर्दधे।

शंकरः विश्वनाथं भगवन्तं स्तुत्वा तदनुग्रहेण सनन्दनेन साकं बदरीवनं प्रतस्थे। तत्र दीक्षाविधिना ब्रह्मसूत्राणां भाष्यं रचयामास। न केवलमेतत्, किन्तु उपनिषदां भगवद्गीतायाश्च भाष्यग्रन्थान् प्रणीतवान्, महाभारतीयसनत्सुजातीयस्य व्याख्या-मकरोत्। नैतावदेव, अपितु बहून् उद्ग्रन्थान् विरच्य लोकोपकार-मकरोत्।

७. व्यासदत्तो वरः

कदाचित् सशिष्यस्य शंकरस्य समीपमागत्य कश्चिद्वृद्धो ब्राह्मणः प्राह – पञ्चदशवर्षदेशीयोऽसि! किमेतत्सत्यं यद्भवता किल वेदव्यासस्य ब्रह्मसूत्राणां भाष्यं विरचितमिति।

शंकरः – बाढम्। वृद्धः – "तथा चेत् मम कतिचन सन्देहाः सन्ति। तत्तत्स्थलेषु भवदीयं भाष्यं कीदृशमस्तीति ज्ञातु-मिच्छामि।" इत्याह।

वृद्धेन अनुयुक्तानां सूत्राणां सर्वेषामपि शंकरः स्वीयं भाष्यं श्रावयामास। स वृद्धः "भवदीयं भाष्यं न समीचीनं; अस्य सूत्रस्य अयमर्थः, अस्येदं तात्पर्यमिति" मार्गान्तरं नेतुं प्रावर्तत।

"आर्य! भवदुक्तं तात्पर्यं अस्य सूत्रस्य न भवितुमर्हति। एवमेव बहवोऽपार्थं प्रतिपाद्य भगवतो व्यासस्य हृदयं न ज्ञातुं ज्ञापयितुं च पारयन्ति। अत एवाऽहं एतद्भाष्यं रचयितुं प्रवृत्तो-ऽस्मि" – इति शंकरः सविस्तरमवोचत्। अथ वृद्धः तुष्टस्सन् स्वीयं रूपं प्रदर्श्य "वत्स! अहमस्मि व्यासः; त्वां परीक्षितुमित आगतोऽस्मि। त्वं मदीयब्रह्मसूत्राणां समीचीनं भाष्यं रचित-वानसि। सन्तुष्टोऽस्मि, कमपि वरं वृणीष्व" इत्याह। शंकरः –

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पारमार्थिकः अद्वैतसिद्धान्तः लोके सर्वत्र यथा विराजेत तथाऽनुगृह्णातु भवान् । व्यासः – अद्वैतसिद्धान्तं प्रवक्तुमेवावतीर्णोऽसि किल शंकर! मत्सूत्राणामपार्थं कल्पयतः पण्डितान् वादे विजित्य तेभ्यः पारमार्थिकं तत्त्वमुपदिश्य अद्वैतवेदान्तसिद्धान्तं प्रतिष्ठापय । भवद्भिरचितानां भाष्याणां भवदीयैः शिष्यैः टीका व्याख्या विरचय्य आसेतुहिमाचलं प्रचारमानय । भवदीयमायु प्रमाणं एकवर्षशेषमेवाऽस्ति । अस्मिन्नत्यल्पे काले यावद्भारत - मज्ञानान्धकारमपनेतुमवकाशो न पर्याप्तः । अतः द्वात्रिंशद्वत्सरपर्यन्तं भवदायुषो वृद्धिर्विधीयते ।

इत्युक्त्वा भगवान् व्यासः दीर्घायुर्वरं दत्वा – दैवदत्तमायुः द्विगुणितं कृत्वाऽन्तर्दधे ।

८. सनन्दनस्य भक्तिविशेषः (पद्मपादः)

शंकरभगवत्पादानां ख्यातिस्समन्ताद्व्याप्ता । क्रमशः तदीया शिष्यसन्ततिः प्रवृद्धा । शंकरः स्वरचितभाष्यस्य गूढार्थान् विशेषतः प्रायशश्च सनन्दनायैव विवृण्वन्नास्त । "पश्यत! अस्मदाचार्याणां सनन्दने कियान् पक्षपातः!" इत्यन्ये शिष्या अन्योन्यमुपांशु ब्रुवन्तः स्थिताः ।

आचार्यः तद्विज्ञाय सनन्दनस्य आचार्यनिष्ठं भक्तिविशेषं ज्ञापयितुकामस्समयं प्रतीक्षते स्म । एकदा सनन्दनः गङ्गाया अपरं तीरं यदा गतः तदा "सनन्दन ३, सत्वरमित एहि । कार्यमस्ती" त्युच्चैराचार्यः चुक्रोश ।

आचार्यस्य उच्चैराह्वानं श्रुतवानेव समनन्तरं सत्वरं सनन्दनः गंगाप्रवाहमलक्षयन् स्थलवत् जलप्रवाहेऽपि पदानि विन्यस्यन्नाजगाम । जाह्नवी तदीयां आचार्यनिष्ठां भक्तिं ज्ञात्वा पदविन्यासससमये तत्पादयोरधस्तात्पद्मानि आधारयामास । सनन्द-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नस्य पादपद्मयोः आस्पदानि बृहत्पद्मानि छात्रा व्यलोकयन्, महतानन्देन सनन्दनस्य भक्तिविशेषं प्रशशंसुः । तदारभ्य सनन्दनस्य पद्मपाद इति विशिष्टं नामान्तरं प्रथितम् ।

९. "भज गोविन्दम्"

शंकरः काश्यां यदाऽऽसीत्, प्रत्यहं उषःकाले शिष्यैस्साकं स्नातुं गङ्गानदीं गच्छन्नास्त । मध्येमार्गं कस्मिश्चित्कुटीरे "डुकृञ करणे" इति व्याकरणविषयः वारं वरं श्रुतः । व्याकरणमभ्यसितुं काशीमागतः कश्चिद्विद्यार्थी तं विषयं साधयितुं पारायणं कुर्वन्नासीत् । प्रथमदिने श्रुतः स विषयः पुनर्द्वितीयदिनेऽपि श्रुतः, एवं तृतीये चतुर्थे च दिने । पद्मपादः "गुरुवर्य ! कोऽप्ययं मन्दबुद्धिरिति भाति । बहुदिनैरेकमेव विषयं अभ्यस्यति । एवं सति सागरवदपारं व्याकरणशास्त्रं अयं कदा वा तर्तुं शक्नुयात् ?" इत्याह ।

"यावज्जीवं परिश्राम्यापि नाऽयं व्याकरणशास्त्रपारीणो भविष्यति । असमर्थोऽयं मौढयेन वृथा कालं नयति । अत एतं तत्प्रयत्नात् निवर्तयितुमुचितम् ।" – इति वदन् समनन्तरमेव शंकरः उच्चैस्स्वरेण –

भज गोविन्दं भज गोविन्दं
गोविन्दं भज मूढमते !
संप्राप्ते सन्निहिते काले
न हि न हि रक्षति "डुकृञ् करणे" ।

इति श्लोकं पपाठ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमादीच – दक्षिणायनपरीक्षाणां समयसूची

परीक्षा	8—9—73		9—9—73		10—9—73	
	प्रातः	सायम्	प्रातः	सायम्	प्रातः	
परिचयः	–	–	परिचयः	–	–	घंटाद्वयमात्रं
अभिज्ञः	–	–	प्रथमपत्रं	द्वतीयपत्रं	–	घंटाद्वयमात्रं
विचक्षणः	–	प्रथमपत्रं	द्वितीयपत्रं	तृतीयपत्रं	–	घंटात्रयमात्रं
समर्थः	प्रथमखण्डे प्रथमपत्रं	प्रथमखण्डे द्वितीयपत्रं	द्वितीयखण्डे प्रथमपत्रं	द्वितीयखण्डे द्वितीयपत्रं	–	,,
कोविदः	प्रथमखण्डः	द्वितीयखंडः	तृतीयखण्डः	चतुर्थखण्डः	पंचमखण्डः	,,

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु.
10—8—73.

की. श्रीनिवासाचार्यः,
परीक्षामन्त्री.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 1845/60. *Postal R. H. No. 493.*
Licensed to Post without Prepayment. LICENCE No. 57.
आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

भारतसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ४-००

प्रहेलिका

विष्णुः किं कुरुते ? (1) ऽथ गांडिवधरः मन्त्रेण कस्योदभूत् ? (2)
कैलासः कथमस्ति ! (3) सागरतले किं वर्तते ? (4) कुत्र मा ? (5)
चोर किं लभते ? (6) कदा न जलदः ? (7) दृश्यं तु के पश्यतः ? (8)
मत्प्रश्नोत्तरमध्यमाक्षरपदे विघ्नेशसम्बोधने ॥

(१) अवति (२) शक्रस्य (३) उत्तुंगः (४) वडवा
(५) कमले (६) प्रहारम् (७) अकाले (८) नयने ।

— वक्रतुंड ! महाकाय !

– श्री बालगणपतिभट्टः, श्रीरंगपत्तनम्.

Published by Sri N. Ramanatha Iyer B. A; B. L., Advocate
& Secretary S. B. P. Sabha, Chittoor (A. P.)
Printed by Sri T K Thiruvengadacharya
at Vijaya Press, Chittoor (A. P.) C 1500

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

दूरध्वनिसंकेतः – "संस्कृतम्"

वाणीं भजत गैर्वाणीम्

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आ. प्र.) भारतम्.

संपुटः ११ | 15 JULY 1973 | क्रमांकः ७



प्रमादीच-
आषाढांकः

शकाब्दाः १८९५

मूल्यम्
०–४० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूचिका

१.	आर्जवं हि कुटिलेषु न नीतिः	१
२.	संपादकीयम्– नर्तने अशक्ता मार्दंगिकमक्षिपेत्	२
३.	मनोरंजनम्	४
४.	साहित्यशास्त्रे ध्वनिसंप्रदायस्य सर्वसंप्रदायसंग्राहकता	५
५.	कविः	१०
६.	सुभाषितानि	१५
७.	गुरुवायुपुरधीशदंडकः	१७
८.	पलायनयन्त्रं	१८
९.	साष्टांगाष्टकम्	१९
१०.	उत्तरायणपरीक्षाफलानि	
११.	उपयुक्तानि केन्द्राणि	२९
१२.	गान्धीकथा	३२
१३.	श्री शंकराचार्यः (पूर्वानुबन्धः)	

(अत्र पृष्ठानां अनुस्यूत्यां भंगं मर्षयन्तु सहृदयाः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर्जवं हि कुटिलेषु न नीतिः

साधु परिभूयते असाधुः परिचर्यते,
स्वादु भृशमद्यते कटुकं परिह्रियते,
हरिणो मृगमात्रं सिंहो मृगराजः,
ऋजु प्रतार्यते कुटिलः अनुनीयते ॥

पाकः परितोऽनुनीयते लोकेन,
शान्तस्वान्तं भारतं तु अवमन्यते,
चीना प्रसाद्यन्तेऽनुनयैः,
नानाविधं प्रबाध्यते भारतम् ॥

रोटीपोटलिकाभिरावर्ज्यते,
धाटीसमाटीकनैश्च विभीष्यते,
बहुसमस्याकल्पनैः प्रबाध्यते,
मुहुर्मुहुः वनगज इव निपात्यते ॥

भारतं विभक्तं सीमासु व्रणितं,
व्रणशोधनेप्यनवकाशं सत् व्यथितं,
स्वौदार्येण स्वयमेव संयतमवस्थितं,
अनृतनिन्दाभिरभितो दूषितम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

नर्तने अशक्ता मार्दंगिकं आक्षिपेत्

मूल्यस्य दिनदिनाभिवृद्धेः सामान्यजनानां जीवितं अस्त-व्यस्तं भवति । उद्योगशीलाश्च वेतनग्रहणवेलायां विकसितमुखा अपि ऋणप्रतियातनात्परं प्रथमसप्ताहे एव म्लानमुखा जलोद्धृता मीना इव परितः क्लिश्यन्ति । दारिद्र्यदोषेण च उत्कोचादिभ्यः करं प्रसारयन्ति । तथापि अनापूरितकुक्षयः कार्यस्थगनबन्धादि-शस्त्रास्त्राणि शातयन्ति । यत्किंचिद्वेतननवर्धनेनापि तेषां आकां-क्षापूर्तिर्न भवति । तेषामायेन सहैव मूल्यानामपि अभिवृद्धिः आप-तत्येव । अतः "पुनर्दरिद्रः पुनरेव पापी" इत्याभाणकानुगुणं वर्तते तेषां दुर्दशा ।

एतां समस्यां मूलतोऽविचार्य बाह्यरूपदर्शनेन निवारणप्रय-त्नेन हनुमल्लांगूलमिव सा जटिला भवति । सर्वाणि नाणकानि अर्बुदन्यर्बुदसंख्यया व्यवहारे अवतारितान्यपि समस्यां न परिष्कु-र्वन्ति, प्रत्युत सागरजलमौर्वाग्निमिवाधिकं संदीपयन्ति ।

आहारधान्यानां मूल्यस्य तनूकरणेन अन्येषां वस्तूनां मूल्यानि स्वतः ह्रसेयुः, अथवा सामान्यप्रजानां सुखस्य मार्गोप्युद्घाटितो भवेत्, दुष्परिणामाश्च क्रमशो दूरतो भवेयुः ।

आहारमूल्यस्थगनार्थं सर्वकारेण आहारमहावाणिज्यायाः आत्मायत्तीकरणं संकल्पितं । तेन सहैव धान्यादानमूल्यमभिवर्धित-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मासीत् । एतेन प्रथमक्रय एवाधिकमूल्यं तत् संरक्षणकोष्ठेषु कृमिकीटमूषिकादिजग्धं, भारे च न्यूनं, स्तरे च विभिन्नं, सकलस्थलप्रेषणसंविधानसंकटपतितं सत् महार्घमेव विक्रीयेत ।

एवमपि स्वदोषं कृषकेषु, वाणिक्षु च आरोपयति सर्वकारः । सर्वकारायत्तं सर्वमपि सुस्थमिति नैवानुभवामः, प्रत्युत अन्यथैव जनानामनुभवः । व्यक्तिगतविषये व्यक्तिः समाजस्समितिर्वा एकैकस्यां दशायां जागरूकतामवलबते । सर्वकारायत्तस्य विषयस्य तु न कोपि बाद्धचो भवति । उन्मत्तबीजमिश्रितगोधूमचूर्णप्रभृतीनि बहून्युदाहरणानि लभ्यन्ते । तंडुलेषु अयश्चूर्णमिश्रणादधिकं न वक्तव्यम् । यद् सर्वकारस्पृष्टं तद्वस्तु आदेशानुसारं अविभक्तं, पाताळगतं, आकाशचुंबिमूल्येन सह अन्धकारापणे अव्यक्तं गोचरीभवति । शर्कराविषये इयं दुरवस्था अनुभूयते । शर्करा च मासमध्ये कदाचित् हठादवतरति, द्वित्रदिनेष्वेव अदृश्यतां सा गच्छति । तादृशे अल्पकाले धनं दत्वा एकदैव सर्वमादातव्यम् । अन्यथा नास्ति शर्करा । अपि च शर्कराभ्यासहीनाश्च तदादानपत्रवन्तः पत्रविक्रयाय प्रयतन्ते, वाणिजश्च तत्पत्रक्रयणाय सन्नह्यन्ति । इदं त्वेकं प्रहसनं यदल्पमूल्येन शर्करा जनेभ्यो विभज्यत इति । सा च तदुपयोगिनां कृते अपर्याप्तैव वर्तते । किञ्च सर्वकारः शर्करोत्पादनिकासु शर्करां अल्पमूल्येन स्वीकृत्य तल्लाभार्थं शिष्टस्य सर्वस्य तदिच्छाधीनमूल्याय आपणे विक्रयाय अधिकारमार्पिपत् । अद्ययावच्च तंडुलकणविषयेपि एषैव नीतिराश्रीयते । शालिधरट्टकेभ्यः लेवीं स्वीकृत्य विभजनेन अतिरिक्ततंडुलाना मर्घोधिकस्स्वत एवांगीकृतः । सर्वधान्यस्य सर्वकारायत्तत्वे किल किं वा भविष्यति इति नैव ज्ञायते । गोधूमवाणिज्यास्वीकरणपंकमज्जनेनापि सर्वकारगजस्य ज्ञानमुद्भवेदिति बहवो मन्यन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुतः धान्यं गोधूमं तंडुलं वा देशे बहुलं विद्यते, यावत् कुसूलेषु न माति, नूतनधान्यसंरक्षणाय च अवकाशो नास्ति च। तथापि सर्वकारचेष्टाधीना आशाग्रस्ताः तत्पातालबिलेषु रक्षन्ति अधिकमूल्यसंपादनाय। नैषाऽतिशयोक्तिः यत् सर्वकारे क्रयणाद्विरते मूल्यं धान्यस्य पंचाशच्छातं ह्रस्वीभवेत् तदनुगुणं च इतरवस्तूनां, कर्मचारिणां आंदोळनानि च नश्येयुः सुखसंतोषादिकं च प्रजानां प्रवर्धेत इति।

एतत्सर्वैर्विभावनीयं प्रजा नाम न केवलमुत्पादयितारः, अपितु तदुपयोक्तारोऽपीति। तत्पाक्षिकदृष्टिमुत्सृज्य विनियोक्तॄणामपि क्षेमं मनसि निधायैव विधानानि निरूपणीयानि।

अन्नं बहु कुर्वीत !

गृहिणी– तंडुलानामभावोद्य जागर्ति।

गृही– कंचित्कालं सहस्व। अस्मत्सम्मतिग्राही सर्वसंकटनिराकृतिं प्रतिज्ञातवान् खलु। सोऽमात्यो भवतु।

* * *

एकः– कोऽयं दुष्कालः देवतामूर्तिष्वपि पादरक्षाः प्रयुज्यन्ते।

अन्यः– करुणावरुणालयस्स देवः पादरक्षाप्रहारिणं तं कन्नप्पमेव मनुते किल।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साहित्यशास्त्रे ध्वनिसम्प्रदायस्य सर्वसम्प्रदायसंग्राहकता

रचयिता श्री समुद्राल रङ्गरामानुजाचार्य, द्वारकतिरुमला.

[पूर्वानुबन्धः]

अलङ्कारवादोऽपि ध्वनिवादाङ्गभूत एव। अलङ्कारो हि द्विविधः— शब्दगतोऽर्थगतश्चेति। अर्थगतालङ्कारोऽपि द्विविधः वाच्यवृत्यालिङ्गितः तदनालिङ्गितश्चेति। यः वाच्यवृत्यनालिङ्गितः स एव प्रतीयमानरूपतया ध्वनिरिति ध्वनिवादिभिर्व्यपदिश्यते। स एव काव्ये अन्यालङ्कारापेक्षया चमत्कारनिबन्धनं प्राधान्यं भजति। तदर्थमेवान्यवाच्यालङ्कारोपादानमिति व्यङ्ग्यालङ्काराणां ध्वन्यङ्गतायां सत्यां, वाच्यालङ्काराणां तदङ्गता ख्यातप्रायैव।

अयमपरो विशेषः। यमकोपमादीनामलङ्काराणां लौकिककटकाद्यलङ्कारसम्मितत्वं निखिलाभ्युपगतम्। लौकिकालङ्काराः शरीराश्रिताः कृत्रिमाः बाह्यशोभाहेतवश्चेति काव्यालङ्काराणामपि तथात्वमेव वक्तव्यम्। तदैवालङ्कारपदस्यान्वर्थता। एवं तेषां शब्दार्थाश्रितत्वपर्यवसानात् प्राधान्यं न सम्भवति। किञ्चालङ्काराणामुपस्कारकत्वात् नियतमुपस्कार्यः अन्यः अङ्गीकार्यः। काव्ये हि सर्वप्रधानतया रस एवोपस्कार्य इति तदुपस्कारकतया अलङ्काराणामलङ्कारत्वमन्वर्थं भवतीति च अलङ्कारवादोऽपि स्वेन रूपेण अवस्थातुं न प्रभवतीति ध्वनिवादाङ्गतैव युक्ता अलङ्कारवादस्य।

2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ गुणवादोऽप्येवमेव। गुणो ह्यमुख्यवृत्त्या शब्दार्थाश्रितत्वेन प्रसिद्धोऽपि मुख्यतो रसाश्रय एव। अतः काव्योपात्तरसानुरोधेन तत्तद्रसव्यञ्जकतया गुणोऽपि रसरूपध्वन्यङ्गभूत एव। अत एव "मधुरो रसः" इत्यादिविश्वजनीनव्यवहारा उपपद्यन्ते। एवं गुणवादस्यापि ध्वनिवादाङ्गतायां सत्यां विशिष्टपदसङ्घटनारूपायाः रीतेरपि रसानुकूलतया उपादेयत्वेन रसरूपध्वन्यङ्गत्वं सूपपादमेव। औचित्यमपि रसादिकमाश्रित्यैव तिष्ठति, न तु स्वरूपत इति औचित्यवादोऽपि ध्वनिवादाङ्गमेव।

वक्रोक्तेः भङ्गीभणितिरूपायाः प्राचीनालङ्कारिकैः अलङ्कारत्वमभ्युपगतमिति तस्याः ध्वन्यङ्गत्वं निर्बाधमेव।

एवं प्राचीनानां सर्वेषां रसादिसम्प्रदायानां ध्वनिसम्प्रदायान्तर्भावे निरूपिते नवीनस्य अनुमितिवादस्यापि ध्वनिवादानतिरिक्तता अवश्यवक्तव्या।

तथा हि –

प्रतीयमानः अर्थः सहृदयहृदयवेद्यः अस्तीति अनुमानवादिनाप्यभ्युपगतप्रायमेव। किन्त्वयमत्र विशेषः – सहृदयश्लाघ्यस्य अर्थस्य प्रतीत्यर्थं व्यञ्जनात्मको यो व्यापारो ध्वनिवादिभिरभ्युपगतः, तं विनैव अनुमानरूपप्रमाणेन व्यङ्ग्यतयाऽभ्युपगतस्यार्थस्य प्रतीतिर्भवतीति तेषां आशयः।

अनुमितिवादिनस्त्वयमभिप्रायः –

"शब्दादर्थाद्वा असंबद्धोऽर्थः नैव भवतीति निश्चप्रचम्। तथा चेत् यस्मात् कस्मादपि शब्दात् यस्य कस्याप्यर्थस्य प्रतीतिरापद्येत। एवं शब्दात् तत्प्रतिपाद्यादर्थात् वा प्रतीयमानस्यार्थान्तरस्य तत्प्रतिपादकशब्दार्थाभ्यां अविनाभाव एव। अयमेव कार्यकारणभावः, साध्यसाधनभावः, लिङ्गलिङ्गिभावः इत्यादिशब्दैः व्यवह्रियते। एवञ्च व्यङ्ग्यस्यार्थस्य व्यञ्जकस्य च साध्यसाधन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावसम्बन्धसत्त्वात्, व्यञ्जकं साधनमनुमापकमिति, व्यङ्ग्योऽर्थः साध्यः अनुमाप्यः इति च व्यवहारः स्यात्। एवं व्यङ्ग्यप्रतीतिरनुमितिरूपेति, कृतं व्यङ्ग्यव्यञ्जकभावकल्पनया। इत्थं व्यङ्ग्यव्यञ्जकभावस्य निरासात्, अनुमाप्यानुमापकभावस्यैवाभ्युपगमाच्च ध्वन्युदहरणेषु अनुमानप्रसक्तिरुदाहर्तव्या। यथा–

"भ्रम! धार्मिक! विस्रब्धं स शुनकोऽद्य मारितस्तेन।
गोदावरीकच्छनिकुञ्जवासिना दृप्तसिंहेन॥"

अत्र केनचित् सुकृतिना यूना सह विस्रम्भसम्भोगसुखास्वादलालसया विजने वने कृतसङ्केतया कयाचित्, कुसुमापचिचीषया भ्रमतः धार्मिकस्य तद्देशागमनं विघ्नमिव मन्यमानया विदग्धया नायिकया शुनः बिभ्यतस्तस्य धार्मिकस्य तादृशश्वमारकदृप्तसिंहावस्थित्युद्घाटनद्वारा विस्रम्भसञ्चारयोग्यतां विधिमुखेन प्रदर्शयन्त्या प्रकारान्तरेण तद्गमनं निषिद्धमिति वस्तुस्थितिः।

अत्र 'भ्रम धार्मिक विस्रब्ध'मिति वाक्यार्थरूपो भ्रमणविधिः वाच्यः। तस्य 'स शुनकोऽद्य मारितस्तेन' इत्यादिना श्वहननं दृप्तसिंहविहितं वाक्यार्थरूपमेव हेतुः। तत्प्रतिषेधस्तु अनुमेयरूपः। एवमेव कार्यकारणभावस्तत्र तत्र उदाहरणेषु कल्प्यः"– इति।

ध्वनिवादिनस्त्वत्र प्रत्यवतिष्ठन्ते–

अस्ति व्यङ्ग्यानुमित्योर्वैलक्षण्यम्। अनुमितिर्हि नियतरूपं दधाना व्यभिचारादिदोषादुष्टाद्धि हेतोर्भवति। व्यङ्ग्यन्तु नैवम्। व्यभिचारादिदोषदुष्टादपि व्यञ्जकाद्भवति। किञ्च व्यङ्ग्यमपि सर्वथा नियतरूपमेवेति न वक्तुं शक्यते। नैतदनुमानस्थले उपपद्यते। व्याप्तिपक्षधर्मताज्ञानादिसहकृतेनैव हेतुना अनुमितिसिद्धिः। यथा-धूमरूपः हेतुः वह्निव्याप्य इति ज्ञातः, पक्षे पर्वतादौ दृष्टः, विपक्षे अस्थितश्च यः स एव वह्निरूपं साध्यं साधयितुं शक्नोति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि धूमस्य वह्नेरिव तदितरस्यापि साधकता, तर्हि न तस्य वह्नि प्रत्यनुमापकता, अन्यथा तु वह्निज्ञानस्य अप्रामाण्यापत्तेः। व्यङ्ग्यस्थले तु नास्ति पक्षधर्मताज्ञानाद्यपेक्षा नियतसाध्यसाधनभावापेक्षा वा। यदि अनुमापक इव व्यञ्जकोऽपि स्यात् तर्हि तत्प्रतिपन्नेऽर्थे सम्यङ्मिथ्यात्वादिसन्देहा एव न भवेयुः।

न हि व्यङ्ग्योऽर्थः सर्वत्रैकरूप इत्यनुभवः। "गतोऽस्तमर्कः" इत्यादिषु, व्यञ्जकात् सूर्यास्तमयरूपादर्थात् वक्तृबोद्धव्यादिसहकारेण व्यङ्ग्यार्थानां विभिन्नानां प्रतीतेः। अतः यादृशोऽविनाभावो व्याप्यव्यापकभावस्थले, न तादृशः व्यङ्ग्यव्यञ्जकभावस्थले इति वक्तव्यम्। अत एव "भ्रम धार्मिक विस्रब्ध" मित्यादिपद्ये हेतुः व्यभिचारदोषदूषितोऽपि निषेधरूपं व्यङ्ग्यार्थं समर्पयति।

उक्तञ्चात्र विषये मम्मटभट्टैः—

"भीरुरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेणाप्यन्यैवंभूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकान्तिको हेतुः। शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोऽपि। गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितः। अपितु वचनात्। न वचनस्य प्रामाण्यमस्ति, अर्थेनाऽप्रतिबन्धादित्यसिद्धश्च। तत्कथमेवंविधात् हेतोः साध्यसिद्धिः?" इति। "एवमेव 'निश्शेषच्युतचन्दन'मित्यत्रापि गमकतया उपात्तानां चन्दनच्यवनादीनां कारणान्तरतोऽपि सद्भावात् अनैकान्तिकत्वमेव तेषाम्। यथा तत्रैव स्नानकारणत्वेनापि प्रतिबद्धानि। व्यक्तिवादिना च अधमपदसहायानामेषां व्यञ्जकत्वमुक्तम्। प्रमाणाप्रतिपन्नेनाऽधमत्वेन कथमनुमानं भवितुमीष्टे।" इति च।

किञ्चायमप्यत्र विशेषः— यत्र व्यङ्ग्यार्थव्यञ्जकतया निविष्टानां विशेषणानां असाधारण्यं तत्रानुमानस्य प्रवृत्तिः, यत्र तु साधारणतयैवोपादानं तत्र न स्वप्नेऽप्यनुमानस्य प्रसक्तिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत एव निश्शेषच्युतचन्दनमित्यादिपद्ये चन्दनच्यवनादीनां विशेषणानां वापीस्नानव्यावर्तनेन रमणरूपार्थं प्रत्यसाधारणव्यञ्जकत्वं प्रतिपादयतां अप्पय्यदीक्षितानां सरणिं प्रत्याचक्षाणेन पण्डितराजेन व्यञ्जकानामसाधारण्यसम्पादनं व्यक्तिप्रतिकूलमिति, अनुमानानुकूलमिति च सुदृढं प्रतिपादितम् ।

यथा– एवञ्च व्यञ्जकानां साधारण्यं प्रतिपादयतां प्रामाणिकानां ग्रन्थैः सह असाधारण्यं प्रतिपादयतस्तव ग्रन्थस्य विरोधः स्फुटः । किञ्च यदिदं निश्शेषेत्याद्यवान्तरवाक्यार्थानां वापीस्नानव्यावृत्तिद्वारेण व्यङ्ग्यासाधारण्यं सम्पाद्यते, तत् किमर्थं ? मिति पृच्छामः । व्यङ्ग्यस्य व्यञ्जनार्थमिति चेत्, व्यञ्जकगतासाधारण्यस्य व्यञ्जनानुपायात् । .... प्रत्युताऽसाधारण्यस्य व्याप्यपरपर्यायस्य अनुमानानुकूलतया व्यक्तिप्रतिकूलत्वाच्च । तस्मात् वाच्यार्थसाधारण्यमेवोचितमतिविदग्धनायिकानिरूपितानां विशेषणवाक्यार्थानाम्" इति ।

जगन्नाथपण्डितेन अस्मिन्नेव सन्दर्भे साधारणव्यञ्जकैरपि व्यङ्ग्यार्थप्रतीतिः 'औन्निद्रय चिन्तालसत्व' मित्याद्युदाहरणमुखेन प्रदर्शिता ।

पूर्वोक्तसन्दर्भेण विशेषणासाधारण्ये एव अनुमानप्रसक्तिरिति, न तु साधारण्ये इति च सिद्ध्यति । व्यङ्ग्यन्तु साधारणविशेषणैरिव असाधारणविशेषणैरपि प्रतिपादयितुमर्हतीति व्यङ्ग्यव्यञ्जकभावस्य विस्तृतविषयता प्रतीयते । साधारणविशेषणस्थले व्यञ्जनायाः अवश्याभ्युपगन्तव्यतया असाधारणविशेषणस्थलेऽपि तथैव निर्वाहे सति नास्त्यनुमानस्य आवश्यकता ।

एवं सर्वेषु रसादिसम्प्रदायेषु ध्वनिसम्प्रदायाङ्गतां गतेषु साहित्यशास्त्रे ध्वनिसम्प्रदाय एव सर्वातिशायीति निश्चप्रचम् ।

3

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविः

ले. श्री राधा, नेल्लूरु.

सर्वप्राणिकर्तृविधातृसृष्टयां अस्पष्टानि बहूनि चित्रविचित्राणि दृग्गोचराणि भवन्ति । अपरिहरणीयाः अनुबन्धविशेषाः तत्र प्रतिबिम्बिताः सन्ति । जन्मजन्मान्तरेभ्यः युगयुगान्तरेभ्यश्च अविदिततलाः सागरा इव अनुबन्धविशेषाः अद्यापि परिदृश्यमाना एव सन्ति, भाविन्यपि काले परिदृश्येरन् इत्यत्रापि न संशयः । ते अनुबन्धाः भवन्ति द्वेषजनकाः वा प्रीतिजनका वा । प्रीतिजनकाः अनुबन्धविशेषाः आह्लादं मानसिकविकारं च जनयन्ति । द्वेषजनकाः अनुबन्धविशेषाः क्रोधं मानसिकदीप्तिं च जनयन्ति । मानवेषु विलक्षणो गुणः एकोऽस्ति । मनोहराणां बहूनां वस्तूनां दर्शनेपि तेष्वन्यतमं एव तन्मनोरञ्जकं भवति । तदेव सः सर्वोत्कृष्टम् वस्त्विति भावयति । नाऽनेन विरम्यते, किन्तु तत्संपर्कवेलायां आनन्दडोलाविहारादिकं च करोति । तद्वत् केषांचित् वस्तूनां दर्शने अनिर्वचनीयः निष्कारणश्च आवेशः रोषो वा समुद्भवति । तत्र दोषलेशाभावेऽपि तद्दर्शने असह्यताबुद्धिं प्रदर्शयति । "स्वेन मोहितैव रम्भा, स्वेन प्लावितैव गंगा" इति लोकोक्त्यनुसारेण प्रीतिजनकं वस्तु सर्वोत्कृष्टमिति, रोषजनकं वस्तु सर्वाधममिति च सः निर्वक्ति । तादृशपरिस्थितेः कारणं जन्मान्तरगतः अविच्छिन्नः अनुबन्धविशेषः इति आस्तिकानां वेदान्तिनां चाभिप्रायः ।

किन्तु सामान्यव्यक्तयः नास्तिकजनाश्च जन्मान्तरगतानुबन्धविशेषस्य कारणत्वं नांगीकुर्वन्ति । तेषां अलौकिकदृष्टयभाव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

एव तत्र कारणम् । तादृशलौकिकदृष्टिमन्तः "भिन्नरुचिर्हि लोकः" इति वाक्यानुसारेण तद्वस्तुदर्शनजन्यानन्दातिशयस्य वा द्वेषातिशयस्य वा तद्गताकर्षणातिशयः एव कारणम् भवति, न तु जन्मान्तरानुबन्धविशेषः इति प्रवदन्ति । एकैकस्य एकैका रुचिः, एकैकस्य एकैका कांक्षा, एकैकस्य एकैकाशा, एकैकस्य एकैकं वेदनम् च नित्यम् अस्मन्नयनगोचरमेव । एवम् भिन्नरुचित्वरूपहेतुना तद्गताकर्षणातिशय एव तत्र कारणमिति तेषामभिप्रायः । एकस्मै पाण्डुरवर्णः रोचते, एकस्मै रक्तवर्णः रोचते । अन्यस्मै वर्णान्तरं रोचते । तद्वत् भिन्नभिन्नाकर्षणान्येव भिन्नभिन्नरुचीनां कारणानि, न तु जन्मान्तरानुबन्धः इति लौकिकानां नास्तिकानां च वादः ।

सूर्योदये पद्मं विकसति । चन्द्रे उदिते कुमुदं विकसितं भवति । राकासुधाकरदर्शनेन सागरः उत्तुंगतरंगप्लावितनाकलोको भवति । नीरदेषु पुष्करवितरणव्यापृतेषु मन्दं मन्दं गच्छती मयूरी स्वीयहेलालीलाविलासप्रदर्शनपूर्वकं नाटचं करोति, चन्द्रास्तमये चकोरी प्रियविरहासहिष्णुतया गलद्बाष्पनयना भवति । सूर्ये अस्तंगते कमलानि मुकुलितानि भवन्ति । एतस्य सर्वस्यापि यत्किञ्चित् कारण अवश्यं अंगीकार्यम् । कारणेन विना कार्यस्य असंभवः खलु । पद्मविकासे सूर्योदय एव कारणमिति चेत् सूर्योदयेन कुतः पद्मानामेव विकसनं स्यात् कुमुदानामपि ? इति प्रश्नः समुदेत्येव । अत एव एतस्य सर्वस्यापि येन केनापि कारणेन भाव्यम् । वेदान्तिनां आस्तिकानां अभिप्रायानुसारेण जन्मान्तरानुबन्धविशेषः वा नास्तिकाभिप्रायानुसारेण तत्तद्वस्तुगताकर्षणातिशयो वा कारणमिति अवश्यम् अंगीकार्यम् । सूर्यकमलयोः प्रीतिजनकः सम्बन्धविशेषः यथा, चन्द्रकमलयोः द्वेषजनकश्च सम्बन्धविशेषः तथैव - साहचर्यमिव वैरुध्यमपि प्रत्येकवस्तुप्रतिनियतम् इत्यत्र आलंकारिकाः एव प्रमाणम् । तथा हि –

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
.... शब्दार्थस्याऽनवच्छेदे विशेषस्मृतिहेतवः ।।

(काव्यप्रकाशः)

पूर्वोक्तरीत्या अनुबन्धो वा आकर्षणम् वा अचेतनवस्तुगतं वा चेतनगतं वा यत्किञ्चित् वृत्तगतं वा सत् तत्तद्वस्तुविशेषे भिन्नभिन्नभावान् जनयति । आप्तदर्शनेन चित्तं मन्दाकिनीवीचिकाविलासविहारि भवत्येव । तथा अनुबन्धजनितानां, प्रीतिवैरुध्याद्याकर्षणजनितानां च भावविशेषाणां प्राचीनाः नवरसत्वं आपादयामासुः ।

विभावैरनुभावैश्च सात्त्विकैः व्यभिचारिभि. ।
आनीयमानः स्वाद्यत्वं स्थायिभावो रसस्मृतः ।।
श्रृंगारहास्यकरुणा रौद्रवीरभयनकाः ।
भीभत्साद्भुतशान्ताश्च रसाः पूर्वैरुदाहृताः ।। इति ।

एव मुद्भूतान् भावविशेषान् अन्येभ्यः प्रकटीकर्तुं मानवाः भाषां प्रधानसाधनत्वेन स्वीकुर्वन्ति । तस्य मानवसंकेतजन्यत्वं, मृगादिरवानुकरणजन्यत्वं च कथ्यते । स अप्रकृतः विषयः । भाषाद्वारा मानवः सुस्पष्टं भावविवरणं करोति । किन्तु भावप्रकटीकरणे सर्वे एकम् एव पन्थानम् न आश्रयन्ति । व्यक्तिगत – संस्कारानुगुण्येन भिन्नभिन्नप्रक्रियाभिः भावा प्रकटीक्रियमाणाः सन्ति । क्षुत्पिपासापीडितः सामान्यः "क्षुधातुरोऽस्मि, पिपासापीडितोऽस्मि" इत्येव तद्वक्ति । भावुको वा कविर्वा तथा न व्यक्तीकरोति । "मदीयोदरे मूषिकाः धावन्ति" इत्यादिव्यंग्यप्रक्रियानुसारेणैव प्रकटीकरोति । अयमेव पूर्वोक्तविषयस्योदाहरणम् । भावुकैः कविभिश्च अनुस्रियमाणा प्रक्रिया एव आलंकारिकैः व्यंग्यशब्देनोदाहृतः । तथा हि –

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रम धार्मिक विस्रब्धं स शुनकोऽद्य मारितस्तेन ।
गोदावरीकच्छनिकुञ्जवासिना दृप्तसिंहेन ॥ इति ।

(ध्वन्यालोकः)

प्राप्तसंकेतस्थला काचन नायिका स्वैरविहारनिरोधकं ब्राह्मणं प्रत्येवं कथयति । अत्र भ्रम इति वाच्ये, मा भ्रम इति व्यंग्योत्पत्तिः भवति । शुनकभीरुः एव पुरुषः सिंहे सति कुतो वा तत्र चरेदिति अत्र व्यंग्यसाधनम् । तव निरोधो नास्तीति कथयन्त्येव सा स्वचातुर्या स्वनिरोधमेव अपासरत् । एवं रीत्या कथने वक्त्रा भावुकतापरिपोषकेण भाव्यम् ।

भावुकस्य सृष्टिः विचित्रपथानुसारिणी । कान्तानयनयोः तेन शरच्चन्द्रचन्द्रिका दृश्यते । प्रेयसीप्रियवचनेषु सः निर्झरमनोज्ञध्वनिं शृणोति । विनीलजलधरमालिकां दृष्ट्वा सः प्रोषितभर्तृकां नायिकां स्मरति । चेतनानां अचेतनत्वं, अचेतनानां चेतनत्वं च आपादयितुं शक्नोति कविः । कालिदासः मेघसन्देशे अचेतनानपि चेतनत्वेन चिन्तयित्वा मनोहरं काव्यं व्यरचयत् खलु । तथा हि –

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसनां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावतः प्रियतम इव प्रार्थनाचाटुकारः ॥

एवंरीत्या जन्मान्तरगतानुबन्धप्रभावविशेषेण वा, तत्तद्वस्तुगताकर्षणातिशयप्रभावेण वा जायमानां भावोद्रिक्ततां सर्वविलक्षणचमत्कारजनकविधानेन व्यक्तीकुर्वन् एव "कविः" इत्यस्मिन् विषये न संशयः ।

केवलं कवयते इति कविः इति कविशब्दं निर्वक्तुं शक्यते । किन्तु कवेः कानिचन प्रत्येकलक्षणानि सन्ति, किञ्चित् वैशिष्ट्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चास्ति । विवक्षितं विषयं सः याथातथं न वक्ति, किन्तु भङ्ग्य-न्तराश्रयेण । उक्तं च पाश्चात्येन Sir Philer Sidnee नामकेन "Now for the poet he nothing affirms and therefore never leith" इति । अत एव ब्रह्मसृष्टेरपि भिन्ना कविसृष्टिः । तदुक्तं–

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ।। इति ।

"नाऽनृषिः कुरुते काव्य"मिति प्राचीनानां वचः । काव्य-कर्तृणा कविना अवश्यं ऋषिणा भाव्यमिति अस्य वाक्यस्य भावः । ऋषिशब्दस्य कामक्रोधाद्यरिषड्वर्गविजेता इत्यर्थकथनं न संगच्छते । यदि तथा कथ्येत्त तर्हि आधुनिकानां विमर्शकाणां वादानां सर्वेषा-मपि मिथ्यात्वमापादितं स्यात्, यतः आधुनिकाः विमर्शकाः काव्य-परिशीलनेन न केवलं कविकालादिकं निर्वर्णयन्ति, किन्तु कवेः मन-स्तत्वमपि । यदि कविः कामक्रोधादिजेता तर्हि कथं वा तन्मन-स्तत्वं काव्यद्वारा ज्ञातुं शक्यं भवति । तेन विरचितस्य सर्वस्यापि विषयस्य भावनाजन्मत्वमेव अंगीकार्यं, न तु स्वमनोभावनात्वं । आलोचनजन्यभावानां मनस्तत्वस्य भेदो दृश्यत एव । अतः ऋषि-शब्दस्य "कामक्रोधादिविजेते"त्यर्थकथने "नाऽनृषिः कुरुते काव्य"-मिति वाक्यं असंगतं स्यात् । अतः ऋषिशब्दस्य अतीतदृष्टिमान् इति वा अलौकिकदृष्टिमानिति वा अर्थो वक्तव्यः । सैव अलौकिक-दृष्टिः अलौकिकानन्दहेतुभूता अस्ति । अतः अलौकिकदृष्टिपरि-पुष्टमनस्कः अत एव नवनवोन्मेष प्रतिभोल्लसितः कविः ।

एवं च अलौकिकदृष्ट्या दृष्टान् भावान् यः सर्वजनविलक्ष-णचमत्कारजनकसंविधानेन व्यक्तीकरोति सः कविः इति कवि शब्दस्य निर्वचनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितानि

रचयिता श्री एन्. रामनाथार्यः.

(पूर्वानुबन्धः)

यस्याऽस्ति सर्वत्र गतिस्स कस्मात् स्वदेशरागेण हि याति नाशम् ।
तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरुषाः पिबन्ति ॥४८६॥

Why should a person suffer and perish in his own country, due to his attachment to that place, when he has better opportunities of livelihood in other places. Fools drink the brackish water from their well, saying that the well was constructed by their father (when better water is available elsewhere.

पुंसामसमर्थानां उपद्रवायाऽऽत्मनो भवेत्कोपः ।
पिठरं ज्वलदतिमात्रं निजपार्श्वाण्येव दहतितराम् ॥ ४८७ ॥

The angers of powerless persons cause distress only to themselves The earthern vessel, boiling furiously, only burns its sides

स सुहृद्व्यसने यस्यात् अन्त्यजात्युद्भवोपि सन् ।
वृद्धौ सर्वोपि मित्रं स्यात् सर्वेषामेव देहिनाम् ॥ ४८८ ॥

Even a low born person is indeed a true friend, who helps during one's distress At the time of prosperity, everyone behaves like a friend to everyone else.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घातयितुमेव नीचः परकार्यं वेत्ति न प्रसाधयितुम् ।
पातयितुमस्ति शक्तिः वायोर्वृक्षं न चोन्नमितुम् ॥ ॥ ४८९ ॥

A wicked person knows only to spoil others work but not to help them in achieving their work. The wind has power to pull down a tree but not the fallen tree to stand

यत्रोत्साहसमारंभः यत्राऽऽलस्यविहीनता ।
नयविक्रमसंयोगः तत्र श्रीरचला ध्रुवम् ॥ ॥ ४९० ॥

The Goddess of prosperity resides where work is commenced with enthusiasm, where there is no procrastination and where there is a combination of valour and sound policy.

तद्दैवमिति संचिंत्य त्यजेन्नोद्योगमात्मनः ।
अनुयोगं विना तैलं तिलानां नोपजायते ॥ ॥ ४९१ ॥

Thinking that everything is ordained by Fate, one should not cease from personal effort. Without personal effort, even oil cannot be extracted from sesame.

दयितजनविप्रयोगः वित्तवियोगश्च केन सह्याः स्युः ।
यदि सुमहौषधिकल्पो वयस्यजनसंगमो न स्यात् ॥ ॥ ४९२ ॥

Who can bear the pangs of separation from dear persons or bear the distress caused by loss of wealth, if there is no contact with intimate friends, who resemble great medicines (which relieve pains).

(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुवायुपुराधीशदण्डकः

रचयिता श्री विद्वान् बालगणपतिभट्टः, श्रीरङ्गपत्तनम्.

गुरुवातपुराधीशं भवबंधनतारकम् ।
शंखचक्रगदापद्मशोभितं शरणं भजे ॥

वन्दे वन्दारुमन्दारं इन्दिरामन्दिरं शुभम् ।
अमन्दानन्दसन्दोहदातारं शरणं भजे ॥

जय वातपुराधीश जय वागीशसन्नुत ।
जय वर्षांबुदश्याम जय वेदांतसन्नुत ॥

जय जयगुरुवातगेहेश्वराजादिजेशादि देवौघवंद्यांघ्रिपंकेज, जाम्बूनदाभूष, जम्भारिदम्भव्रजोच्छेद, गोविन्द, कंसांतकादित्यकोटिप्रकाश प्रभो, योगिहृत्पंकजानन्ददानाब्जबंधो, गदाशंखकौमोदकीचक्रपाणे, नताभीष्टचिन्तामणे, योगिचूडामणे, श्रीमणे पाहि मां पाहि मां पाहि माम् ।

गुरुपवनपुराधिपाग्रागतागस्कनाग:कुलांधौघनाशैकदीक्षागुरो, गोकुलावास गोपाल, गोपांगनाप्रेमपीयूषगंगावगापानलोलागगोवर्धनोद्धार, गोपेश, नन्दात्मजानन्दसिंधो, गजेन्द्रापदुद्धार, गंगापगासंगिनीतीरखेलादृताग्रार्चनार्हप्रभो गोपबंधो, पाहि मां पाहि मां पाहि माम् ।

पवनपुरनिवास पीतांबरालंकृतापद्विनाशैकबंधो, पयोधीशकन्यापते, पादपद्मार्चितानन्तदेवाधिदेवोत्तमातीत कारुण्यपूर्णाप्रमेय,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकृष्टासुरध्वंस, पादप्रणम्रार्तलोकार्तिनिर्वापणापूर्वशक्ते, पतत्रीशपत्राननाब्जोल्लसद्दिव्यकांते, प्रतिज्ञातधर्मोद्धते पाहि मां पाहि माम् ।

पवनपुरपतेऽब्जनाभेऽब्जनेत्राब्जपाणेऽब्जपादाब्जमालांग, वन्दारुमन्दारमन्दाक्षिपीडापहार प्रभो मन्दरोद्धार, मन्दाकिनीपूरपादातिसौंदर्यसिंधो, दशास्यादिदैतेयशिक्षासुदक्ष क्षमादुःखदूरात्तमत्स्यादिदिव्याकृते, हे रतीशांग राधाचकोरेष्टराकाशशांक प्रभो, पाहि माम्, पाहि माम् ॥

पलायनयंत्रं

(गूढलेखिनी)

अमेरिकायाः प्रसिद्धेषु आविष्कारकेषु श्री थॉमस एडिसन नामा प्रमुख बभूव। सः एव फोनोग्राम-विद्युद्दीप-विद्युत्-ट्रेन - इत्यादिकानां सहस्राधिकानां वस्तूनां प्रथमकल्पकः आसीत्। तस्य जीवनकाले तस्य विषये किंवदंती आसीत् यत् सः सर्वदा भोजनस्नानादिकार्याणां समयेष्वपि यस्य कस्यापि यंत्रस्य चिंतने निमग्नो ववृते। तं बहवः जनाः सभासु भाषाणानि दातुं तथा सायंभोजनार्थे न्यमंत्रयन्। सोऽपि तादृशनिमंत्रणानि सहसा न अनुमनुते स्म क्वचिन्मित्राग्रहेण गच्छति स्म, एकवारं इत्थमेव सभां गतः आसीत्। भोजनोत्तरं वक्ता तस्य सभ्येभ्यः परिचयं यच्छन् उचे– "एते श्री एडिसन महाभागाः अतीव बुद्धिमन्तः राष्ट्रस्य सुखसंपत्तेः मूलकारणभूताः ललामभूताः सन्ति। सदा तेषां चित्तं नूतनयंत्रस्य चिंतने एव निमग्नं वर्तते। तेनैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वयं विविधसुविधाः प्राप्नुमः। अतः अतीव सम्मानार्हाः एते" (मध्ये एव श्री एडिसनं प्रति मुखं कृत्वा पप्रच्छ) "किं सुष्ठु? भवन्तः अस्मिन्समये कस्य यन्त्रस्य चिंतने निमग्नाः सन्ति ?" इति ।

श्री एडिसनमहाभागः आतम-श्लाघां श्रुत्वा उद्विग्नः, कथं गंतुं शक्ष्ये ? इत्येव चिंतयन्नासीत् । तस्य प्रश्नस्य प्रसंगस्य लाभं गृहित्वा झटिति "पलायन-यंत्रस्यैव" इति कथयित्वा अन्य-स्मिन्नेव क्षणे सभागृहात् निर्गत्य स्वीययानेन पलायनं चक्रे ।

आबाल्यं विविधा आपदः सोढवा स्वमातुः उपदेशं अनुसरन् एव सः महत्पदं आरूढः आसीत् । सः कदाऽपि हि संकट-ग्रस्तं, साह्यार्थे आगतं, न निवर्त-यामास । तस्य धार्मिकविचाराः सर्वथा क्रिस्तमतविपरीताः बभूवुः । स. वेदान्ते श्रीविवेकानं-दानां प्रवचनेषु स्वीयमतानां समर्थनं लेभे ।

साष्टांगाष्टकम्

रचयिता श्री बालगणपतिभट्टः, श्रीरंगपत्तनम्.

उरसा मनसा दृष्टचा शिरसा वचसा तथा ।
पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥

कर्तुं मे किल कोपि वा किमपि वा योग्यः कदावापि नो
हीत्थं भूरिमदावलेपनफलात् शश्वत्प्रभुं शङ्करम् ।
सर्वेशं जगदीश्वरं सकलदं दूरीचकार स्वयम्
नीचोरः! पुरतस्स्थितावनरतं देवं नमाऽद्यादरात् ॥

संसाराधिगतं सुखं खलु महन्नित्यं सदा तृप्तिपदम्
हीत्थं भावनया किलानुदिवसं यत्नं तदर्थं कृतम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लालापानमिवास्ति सा नवशिशोरङ्गुष्ठमात्रे भ्रामिः
त्यक्त्वा तां जगदीश्वरं नम सदा भक्त्या पुनर्हे मनः !

पश्यन्ती पुरतस्समागतमहो सर्वञ्च दृष्टे ! मुहुः
स्थित्वा जातु विशालमन्दिरवरे चित्रं चलत्सुन्दरम् ।
दृष्ट्वाऽनित्यसुखं त्विदं स्थिरमिति व्यर्थं भ्रमित्वा पुनः
यातस्ते समयो मुधा पशुपतिं शम्भुं नमाऽद्यादरात् ॥

नित्यं तैलसुगन्धलेपितमहो सीमन्तसंशोभितम्
शश्वत्कङ्कतिकाकरेण बहुधा सम्मानितं त्वम् शिरः ।
प्रत्यक्षं समुपागतं त्वधिकृतं ह्युच्चं नमित्वा भवान्
व्यर्थं कालमहो निनाय गिरिजाजानिं नमाऽद्यादरात् ॥

कण्ठाद्ये जननप्रदेशनिवहे जातैर्मुहुर्गुम्फिता
वर्णैस्त्वं सततं सहागतजनैः शश्वन्मुधा भाषसे ।
नास्त्यन्तं न च मध्यमादिरहितं व्यर्थं पुनस्ते खलु
जातो वै समयो नमाऽद्य गिरिशं भो वाक् ! महेशं विभुम् ॥

ग्रामीणेऽध्वनि कण्टकावृतपथे वा राजमार्गेऽथवा
नित्यं रासभकुक्कुरादिशमलं ह्याधानयित्वा गतौ ।
हे पादौ ! समयो निरर्थकमभूदद्यावधिर्मूल्यवान्
तस्मादाशु महेश्वरञ्च नमतं देवं प्रभुं शङ्करम् ॥

दुर्वस्तुग्रहणे सदा हि निरतौ दुर्वस्तुदानेऽथवा
नित्यं मूढपरप्रतारणकलाविज्ञौ तथा लेखने ।
दुष्टे नित्यरतौ ततो नु समयोऽमूल्यस्तु व्यर्थोऽभवत्
ईशानं खलु भो करौ ! हि नमतं देवं प्रभुं शङ्करम् ॥

वाक्चित्तेषु सुमुद्रितोऽथ बहुधा व्रीडावहो यो ध्वनिः
हे कर्णौ नितरां श्रुतो ह्यनुदिनं मोघो युवाभ्यां हि सः ।
नामासीन्न कदापि तत्र गिरिजाजानेर्हि पुण्यप्रदम्
तस्मादद्य युवां हतौ च नमतं देवं भवानीपतिम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

परीधावि - उत्तरायणपरीक्षाफलानि

Samskrita Basha Pracharini Sabha, Chittoor.

Results of April Examinations 1973.

The following are the Register Numbers of successful Candidates who appeard for the Samskrit Examinations held on 7, 8 & 9 th April 1973.

PARICHAYA

I Class:- 866 867 882 884 901 908
910 912 915 918 920 921 922 924 926
927 929 946 948 958 970 973 974 975
1014 1020 1021 1024 1025 1049 1051 1058 1090
1101 1103 1104 1107 1108 1110 1111 1114 1115
1116 1117 1118 1119 1123 1124 1273 1276 1285
1286 1368 1369 1382 1383 1384 1391 1456 1457
1460 1462 1464 1465 1466 1470 1471 1473 1474
1475 1476 1478 1482 1484 1485 1486 1488 1489
1490 1493 1498 1499 1500 1504 1505 1515 1516
1519 1520 1529 1530 1531 1533 1535 1590 1592
1593 1610 1614 1619 1640 1647 1650 1657 1658
1661 1664 1667 1669 1670 1671 1672 1673 1698
1704 1708 1746 1767 A 1796 1807 1853 1879 1881
1884 1887 1888 1894 1897 1898 and 1903

II Class:- 865 883 886 894 895 897
899 900 902 904 909 916 943 945 947

P. T. O.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

949	959	971	972	977	978	980	993	1015
1016	1018	1019	1023	1046	1047	1050	1054	1055
1056	1059	1062	1063	1065	1069	1070	1091	1098
1105	1122	1127	1135	1136	1150	1233	1234	1235
1237	1243	1246	1253	1254	1256	1270	1271	1282
1350	1367	1372	1373	1374	1375	1376	1377	1378
1387	1399	1400	1438	1461	1463	1467	1468	1469
1472	1480	1487	1491	1497	1516 A	1518	1524	1525
1532	1547	1548	1550	1569	1591	1602	1604	1605
1606	1608	1609	1611	1612	1615	1616	1617	1620
1622	1623	1636	1637	1639	1641	1648	1649	1652
1653	1654	1656	1662	1663	1665	1666	1668	1692
1702	1703	1705	1706	1707	1718	1745	1750	1751
1752	1754	1755	1758	1765	1766	1768	1769	1773
1776	1798	1801	1802	1804	1808	1816	1817	1818
1821	1826	1856	1857	1880	1882	1883	1885	1886
1889	1890	1905	1922	and	1924			

III Class:-			864	885	887	893	896	898
905	906	939	940	941	942	960	976	979
987	996	997	998	999	1009	1010	1012	1013
1017	1026	1048	1052	1053	1060	1064	1066	1067
1068	1071	1072	1073	1074	1102	1137	114	1143
1144	1149	1157	1159	1161	1164	1165	1166	1168
1170	1172	1231	1232	1236	1237 A	1238	1239	1241
1242	1244	1245	1247	1255	1262	1265	1266	1268
1272	1275	1277	1278	1279	1281	1284	135	1352
1361	1364	1385	1386	1401	1402	1444	1445	1455
1479	1483	1501	1506	1517	1526	1534	1545	1549
1603	1607	1613	1618	1621	1624	1625	1638	1642
1651	1655	1660	1710	1715	1716	1748	1749	1753

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

1756 1759 1760 1774 1775 1777 1797 1800 1803
1805 1819 1820 1822 1823 1824 1825 1827 1828
1854 1891 1892 1895 1921 1923 and 1926

ABHIJNA

I Class:- 862 863 874 875 931 932
934 935 954 1001 1033 1036 1037 1132 1181
1407 1410 1459 1507 1521 1594 1595 1596 1598
1645 1674 1676 1677 1678 1681 1682 and 1683

II Class:- 861 888 889 890 891 892
950 951 952 953 964 1034 1035 1038 1039
1040 1042 1075 1076 1077 1174 1175 1178 1186
1202 1203 1208 1257 1258 1259 1260 1261 1292
1301 1310 1365 1408 1411 1418 1458 1494 1502
1503 1511 1522 1537 1572 1576 1578 1580 1581
1597 1627 1628 1643 1646 1679 1680 1684 1685
1719 1722 1723 1779 1789 1790 1792 1793 1834
1839 1867 1906 1907 1908 1913 1917 1918 and
1927

III Class:- 872 873 963 989 991 1000
1002 1003 1005 1078 1173 1176 1179 1180 1184
1185 1189 1191 1193 1195 1200 1205 1206 1289
1294 1295 1296 1297 1298 1299 1302 1303 1305
1307 1312 1417 1419 1420 1421 1422 1509 1510
1536 1538 1539 1541 1570 1573 1574 1575 1577
1579 1582 1583 1584 1585 1587 1626 1629 1630
1631 1632 1633 1721 1781 1783 1784 1785 1787
1791 1795 1812 1813 1814 1831 1833 1835 1838
1840 1841 1861 1862 1864 1866 1899 1915 and
1916

VICHAKSHANA

I Class:- 1084 1214 1686 1734 and 1735

II Class:- 876 879 880 983 1082 1083
1212 1213 1217 1218 1252 1327 1338 1340 1366

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

1432 1633 1634 1635 1687 1688 1689 1725 1728
1731 1844 1845 and 1920

III Class:- 878 938 984 985 1216 1220
1222 1229 1251 1315 1316 1320 1321 1322 1323
1324 1326 1328 1329 1330 1331 1332 1334 1336
1337 1341 1342 1343 1423 1427 1429 1431 1489
1543 1551 1695 1696 1847 1848 1868 1869 1870
1909 1910 1911 and 1912

SAMARTHA

I Class:- Nil
II Class:- 1344 1346 1433 1440 and 1512
III Class:- 986 1007 1008 1085 1086 1087
1089 1131 1347 1552 1737 1852 1871 1872 1873
1874 1875 1876 1877 and 1878

I Part only:- 1133 1599 1600 & 1601
II Part only:- 955 1088 1426 1434 1496
1553 1691 1738 & 1851.

KOVIDA

I Class:- Nil.
II Class:- 1441 only.
III Class:- 967 968 969 and 1442.
I Part only:- 881 only.
I, II & IV Parts only:- 1929 only.
I, III & V Parts only:- 1437 only,
I & V Parts only:- 957 only.
II & V Parts only:- 1740 1741 and 1743.
IV Part only:- 1443 only.
V Part only:- 1348 1349 1739 and 1742

The following candidates stood first in I Class in the Examinations mentioned below.

Prizes will be awarded to them in due course.

Parichaya:- No. 918. Santha Iyer, Indraprastha. (New Delhi).

Abhijna:- No. 1678, S. Subha, Srirangam.

Vichakshana:- No. 1734, Ramadevi, Salem.

की. श्रीनिवासाचार्यः,
परीक्षामन्त्री.

1—6—73.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षाव्युत्तरायण (April 1973) परीक्षासु उपयुक्तानि केन्द्राणि – ५७.

---

(१) अंबत्तूरु (२) अनन्तपुरम् (३) अनकापल्ली (४) आत्रेयपुरम् (५) आदोनी (६) आर्यवटम् (७) इंद्रप्रस्थम् (८) इलंगाडु (९) कडपा (१०) कर्नूलु (११) काकिनाड (१२) कुंभकोणम् (१३) कोंडमाचुपल्ली (१४) कोमरगिरि-पट्णम् (१५) कोरसवाडा (१६) कोयंबतूरु-ए (१७) कोयं-बत्तूरु-बी (१८) क्रोंपेट (१९) गद्वाल् (२०) चित्तूरु (२१) चिदं-बरम् (२२) तंजावूरु (२३) तांडूरु (२४) ताडेपल्लिगूडेम् (२५) तिरुमल (२६) तिरुपति (२७) तिरुवेंगाडु (२८) तिरुचि-रापल्ली (२९) त्यागरायनगर् (३०) दोम्मरनंद्याल (३१) निव-गाम् (३२) नेल्लूरु (३३) पिठापुरम् (३४) पेद्दापुरम् (३५) भीम-वरम् (३६) मंत्रालयः (३७) मदनपल्ली (३८) मदुरै-ए (३९) मदुरै-बी (४०) मन्नार्गुडी (४१) मुक्कामल (४२) राजमंड्री (४३) रामनाथपुरम् (४४) रायदुर्ग (४५) लैपाक्षी (४६) वट्टिचेरुकूरु (४७) वड्वूरु (४८) विजय-नगरम् (४९) विल्लुपुरम् (५०) शाहपूर (५१) श्रीकाकुलम् (५२) श्रीरंगम् (५३) श्रीरामापुरम् (५४) सत्यवेडु (५५) सेलम् (५६) हिन्दुपूर (५७) हैदराबाद।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीधावि - उत्तरायणपरीक्षाफलसारिणी

उत्तीर्णाः – ७६३.

परीक्षा	अभ्यर्थिनः	उपस्थिताः	उत्तीर्णाः			
			प्र. श्रे.	द्वि. श्रे.	तृ. श्रे.	खंडशः
परिचयः	605	508	130	164	139	—
अभिज्ञः	282	249	32	78	87	—
विचक्षणः	101	92	4	28	46	—
समर्थः	47	43	—	5	20	13
कोविदः	19	18	—	1	4	12
आहत्य	1054	910	166	276	296	25

संस्कृतभाषाप्रचारिणी सभा,
1—6—73.

की. श्रीनिवासाचार्यः,
परीक्षामन्त्री.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमादीच - दक्षिणायनपरीक्षाणां सन्नाहकार्यक्रमः

विना विलम्बशुल्कं आवेदनपत्राणां प्रेषणायान्तिमावधिः	१ रू. विलंबशुल्केन सह आवेदनपत्र-प्रषणाय अन्तिमावधिः	परीक्षाणां प्रचलनसमयः
20—7—73	31—7—73	कोविदः सेप्टम्बर 8, 9, 10 तिथिषु, विचक्षणसमर्थौ 8, 9 तिथ्योः, परिचयाभिज्ञे 9 तिथौ

आवेदनपत्राणि 20 पैसामात्र - पोस्टलचीटिकाप्रेषणे विना मूल्यं प्रेष्येरन् ।

शुल्कं—

परिचयः रू. 1—50; अभिज्ञः रू. 3—00;

विचक्षणः रू. 4—00; समर्थः रू. 6—00;

कोविदः रू. 10—00;

विशेषानुमतिशुल्कम् (Examption fee) रू. 5—00.

विलंबशुल्कम् (Late fee) रू. 1—00.

परिचयाभिज्ञविचक्षणसमर्थपाठचपुस्तकानि सभायां लभ्येरन् । विशेषजिज्ञासायां 20 पैसामात्राः पोस्टलचीटिकाः प्रेषणीयाः ।

प्रधानमन्त्री,
संस्कृतभाषाप्रचारिणी सभा,
चित्तूरु. (आं. प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गांधीकथा

अपि महात्मागांधी पादशकटारोहणाभ्यस्तः? अस्योत्तरं दातुं समर्था बिरला एव। अयन्तु महात्मा तथापि कलां जानाति स्म।

बहवो वदंति गांधीमहोदयः 'यन्त्रविरोधी' इति। किन्तु तन्न सत्यम्। 'सीवनयंत्रं महलोकोपकारकं' इति यदा कदा वा प्रशंसति स्म। "यदि भारतस्य क्षुद्रोपि ग्रामः विद्युत्सौकर्यं लब्धुं समर्थो भवेत् तामेव शक्तिमुपयुज्य ग्रामोद्योगीकरणे प्रयत्नं करोमि" इति च वदति स्म।

तदानीं गांधी महाशयः साबरमती आश्रमे वसति स्म। कार्यगौरवेण स्थानांतरं गतस्सः तस्मिन्नेव दिने स्वेनैव निश्चिते कार्यान्तरे उपस्थातुं यथासमयं असर्थोऽभवत्। कथमपि स्वोद्दिष्टं कर्म परिसमाप्य प्रतिनिवर्तते स्म। तदैव तस्याग्रे आश्रमवासी कश्चन पादशकटेनाऽऽजगाम।

"कुत्र प्रास्थितः?" गांधी अपृच्छत्। "बापूजी, भवद्भिः सा सभाऽलंकर्तव्या इदानीम्। भवद्भिरेव सभाव्यवस्थापकानां अनुमतिर्दत्ता ननु? केवलं दश निमेषा अवशिष्टाः। भवतः स्मारयितुं आगतोस्मि" इति सोऽवदत्।

"एवं तर्हि ते पादशकटं मे देहि" "आश्चर्यम्! किं तत्र भवन्तः एतेन शकटेन गच्छन्ति? कुत्राऽपि पतिताश्चेत्? राजमार्गे जनसम्मर्दोप्यस्ति"।

"आफ्रिका-वाससमये मया कृतोभ्यासः किं बिस्मरणार्थम्? यच्छ, यच्छ, समयं व्यर्थं मा यापय" इति वदन्नेव पादशकटोपरिस्थानमुद्दिष्टं प्रति प्रस्थितो महात्मा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालशंकरः– "राजन्! भवतः किमस्माभिः कार्यमस्ति? यद्भवान् इयद्दूरं आगतः"।

चन्द्रशेखरः– "स्वामिन्! मया त्रीणि नाटकानि रचितानि। तत्र दोषाश्चेत् स्युः तर्हि ज्ञापनीयाः" इति राजा प्रार्थयामास।

बालशंकरः तन्नाटकत्रयं सावधानमाकर्ण्य लोपान् आपूर्य राजनं सन्तुष्टचित्तं अकरोत्।

चन्द्रशेखरः– "स्वामिन्! भवदर्थं मयाऽऽनीतं द्रव्यजातं परिगृह्य मां धन्यं विधेहि।

बालशंकरः– "राजन्! नेदमस्माकं अपेक्षितं; अत्रत्यान् दरिद्रानाहूय तेभ्यस्तद्द्रव्यं देहि।

इत्येवं राजानमादिश्य तथा कारयित्वा तमामन्त्रयामास।

४. सन्यासः

शंकरस्य अष्टमजन्मदिने केचित् महर्षयः तद्गृहमागताः। ते तं बालमन्तिके उपवेश्य "भवान् आर्यधर्मस्थापनार्थमवतीर्णः साक्षात् शंकरः; अतोऽत्र कालं मा वृथा नैषी" इति चेतयामासुः।

आर्याम्बा– महात्मानः! किमुच्यते तत्र भवद्भिः इमम‍र्भकं प्रति?

महर्षयः– अम्ब! त्वदीयः कुमारः स्वीयपरिमितायुष्काले महत्कार्यं कुर्यात्।

आर्याम्बा– अस्य आयुष्कालः कियान्?

ऋषयः– षोडश वर्षा एव।

ते तस्याः भर्तुः शिवगुरोः वरं– "अल्पायुः महापुरुषः सुतो भवतु" इत्येवंरूपं ज्ञापयित्वा गता यथागतम्।

2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर्याम्बा दुःखिता सती– "वत्स ! इदं सत्यं चेत् त्वं शीघ्रमेव विवाहं कुरु; तेन पत्न्याः पातिव्रत्यमहिम्ना तव दीर्घमायुर्भविष्यति" इत्याह ।

शंकरः– अम्ब ! इदमाद्यं यज्ञोपवीतमेव ममऽतिभारावहं भाति । सत्येवं द्वितीययज्ञोपवीतधारणकारिण्याः द्वितीयायाः परिग्रहः मामस्वतन्त्रं उद्दिष्टकार्यभ्रष्टं च कुर्यात् । अतो विवाहप्रसक्तिर्माऽस्तु । प्रत्युत सन्यासः कर्तव्यः; तदर्थं अनुमतिर्दीयताम् ।

अम्बा– वत्स ! किमेतन् ब्रवीषि ? कांचित्कन्यां परिणीय पुत्रवान् न भवसि चेत् वंशः कथं धृतो भविष्यति ? पितरः अधोगतिं प्राप्नुयुः । सन्न्यस्य यदि त्वं मां विहाय गच्छसि मरणादनु मम उत्तरक्रियाः कः कुर्यात् ?

एवं सा विललाप । तां अनुनेतुं शंकरः प्रवृत्तः । परन्तु जननी सन्यासाय अनुमतिप्रदानं निराकृतवती ।

सन्यासानुमतिं प्राप्तुं शंकरः प्रतीक्षमाण आसीत् । कदाचित् पूर्णानद्यां स्नानार्थं मात्रा साकं शंकरो गतः । स्नानं कुर्वतः शंकरस्य पादं कश्चिद्ग्राहो जग्राह । स अन्तरन्तराकर्षन्नास्त । शंकरः– "अम्ब ! ग्राहो मां कर्षति एह्येहि, पाहि पाहि" इति चुक्रोश । आर्याम्बा पुत्ररक्षणोपायं अजानन्ती नदीतीरे इतस्ततः ससंभ्रमं धावन्ती आक्रन्दनं अकरोत् । बालस्तत्समये अम्ब ! "नाऽहं मुञ्चामि यावत्सन्न्यासं न करिष्यसि" इति वचश्श्रूयतेऽन्तर्भागात् । सन्यासाय वा स्वर्गाय वा सत्वरमनुमतिर्दीयता मिति सदैन्यं प्रार्थयामास ।

गत्यन्तराभावात् सा पुत्रं सन्यस्तुं अनुमेने । शंकरोऽपि नदीजलस्थित एव सन्यासं स्वीकृत्य भवबंधा द्विमुक्त इव मकरमुखान्मुक्तस्सन् तीरं प्राप ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर्याम्बा– वत्स! गृहमागच्छ। व्रणचिकित्सां कारयिष्यामि यावत्।

शंकरः– यतिरहं संवृत्तः; गृहं कथं आगच्छेयम्? नर्मदातीरे गोविन्दयतिवरं उपसद्य सन्यासाश्रमं यथाविधि स्वीकरिष्यामि। सा पुनर्यथापूर्वं एतद्वाक्यं श्रुत्वा विलपितुं उपचक्रमे– "वत्स! इतस्त्वयि गतवति मम गतिः का वा भविष्यति?" इति।

शंकरः– अम्ब! इतः परं भट्टारक एव त्वां रक्षेत्। अन्त्यकाले मामनुस्मर। अवश्यमागमिष्यामि; यत्र कुत्राऽपि स्याम्, तव अन्त्यसंस्कारं करिष्यामि। इत्युक्त्वा पूर्वाश्रमे निजज्ञातिं भट्टारकमाहूय "भ्रातः! इतः परं त्वमेव मत्प्रतिनिधीभूय मातुः संरक्षणं कुरु। मदीयं सर्वं स्वं स्थिरचररूपं त्वदधीनं भविष्यति; त्वमेव भुङ्क्ष्व" इत्यादिश्य तमङ्गीकारयामास।

५. गोविन्दयतिः

ऊनदशवर्षदेशीयः शंकरः बालयतिर्भूत्वा काषायांबरधारी सन् दण्डं करे धृत्वा उत्तराभिमुखो नर्मदातीरं गत्वा गोविन्दयतिपुंगवस्य आश्रमं प्राप।

तत्रत्याः तदीयं वेषं दृष्ट्वा साश्चर्या बभूवुः।

शंकरः– गोविन्दयतिवराः कुत्र सन्ति?

तत्रत्याः– ते तस्यां गुहायां सामाधिमग्नाः सन्ति। तद्दर्शनार्थमेव वयमपि प्रतीक्षामहे। बालयतिः शंकरः न प्रतीक्षते स्म ते यथा। समनन्तरमेव स गुहां प्रविश्य आदिशेषावतारं गोविन्दयतिं स्तोतुमारेभे। यतिवरोऽपि ध्यानमुद्राविनिद्रस्सन् "कोऽसि बालकस्त्वं"? इति प्रप्रच्छ।

शंकरः– अहं ब्रह्माऽस्मि; ब्रह्माऽहमस्मि इति ज्ञातवानहम्।

गोविन्दयतिः– (सहर्षं) किमहं ते कुर्याम्?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शंकरः– सरहस्यं वेदविज्ञानमधिगतं । बादरायणप्रणीत-ब्रह्मसूत्राणां यथार्थं विवरणं अनुगृह्य सन्यासाश्रमविधानं यथाविधि अनुगृह्णातु तत्रभवान् ।

गोविन्दयति शंकरं शिष्यं स्वीचकार । सन्यासाश्रमं प्रसाद्य, ब्रह्मसूत्राणि प्रबोध्य वेदान्तरहस्यं विशदीचकार ।

कदाचित् शंकरः गुहायां गुरोः सकाशे यदाऽऽसीत् तदा बहिः कश्चिदार्तनादः श्रुतः । बहिरागते शंकरे, समन्ततः स प्रदेशः जलमय आसीत् । तत्प्रान्तवासिनः सर्वेऽपि प्रवाहात् प्राणरक्षणार्थं पर्वतशिखरं प्राप्ताः । तत्रत्यान् कतिपयान् शंकरः पप्रच्छ– कथमिदं जलं? इति । तेऽपि– "महती वृष्टिरासीत्, नर्मदाप्रवाहः उद्धृतः आसीत् । प्रवाहेऽस्मिन् अस्माकं पशव, वस्तुजातानि, गृह - क्षेत्राणि सर्वाण्यपि जलप्लावितान्यासन्; अथ अस्माकं प्राणहानिरपि संभाव्यते" इति व्यलयन् । शंकरे तद्रक्षणं कथं कर्तव्यमिति चिन्तयति प्रवाहानीतः कश्चिद्घटो दृष्टिपथ गतः । शंकरस्तं घटमादायाभिमन्त्र्य पुन प्रवाहे व्यसृजत् । कुम्भसम्भव समुद्रजलमिव स कुम्भः प्रवाहजलं सर्वमपि स्वकुक्षौ निक्षिप्तवान् । निर्जलं तं प्रदेशं दृष्ट्वा गिरिशिखरादवतीर्णा जना शंकरं महात्मानं भावयन्तः साष्टाङ्गप्रणिपातं "रक्षिता वयं बालरूपधारिणा परमात्मना तत्रभवता" इति स्तोतुमारेभिरे ।

गोविन्दयतिशेखरः शंकराय पञ्चवर्षान् सकलाविद्या उपादिशत् । "वत्स! त्वं परमशिवांशेन जातोऽसि । लोके अज्ञानं दूरीकृत्य परब्रह्मस्वरूपं प्रबोधय । इतः परं न काऽपि विद्याऽपूर्वा मत्तः संग्राह्याऽस्ति ते । काशीं गत्वा व्यासमहर्षेः ब्रह्मसूत्राणां भाष्यं विरचय" इत्यादिश्य आशीर्वादपुरस्सरं तं आमन्त्रयामास ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूचना

परिचयाभिज्ञविचक्षणसमर्थपरीक्षा पाठचपुस्तकानि सभायां लभ्येरन् ।

प्रधानमन्त्री,
संस्कृतभाषाप्रचारिणी सभा,
चित्तूरु. (आं. प्र.)

సంతానదీపిక

(తెలుగులిపి)

సాంద్రతాత్పర్యము. సకలవిధసంతానప్రతిబంధయోగములను జాతకచక్రమున గుర్తించుటయు, ఆ ప్రతిబంధములకు కారణములు తెలిసికొని, వానికి ప్రాయశ్చిత్తములు నిర్ణయించుటయు సప్రమాణముగా నిందు చూపబడినది.

దీని వెల 1-00 మాత్రము.
పోస్టేజి ప్రత్యేకము.

శ్రీ వైష్ణవస్తోత్రమంజరి

(తెలుగులిపి)

ఇందు శ్రీవైష్ణవులకు నిత్యానుసంధేయములగు స్తోత్రములన్నియు చేర్పబడియున్నవి. శ్రీరామానుజాష్టోత్తరశతనామస్తోత్రముతోపాటు నామావళియును కూర్పబడియున్నది.

దీని వెల 1-00 మాత్రము.
(పోస్టేజి ప్రత్యేకము)

విజయ నిశ్శేణి గ్రంథమాల,
8-2-44, జండావీధి, చిత్తూరు.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

R. N. 1845/60. *Postal R. H. No. 493.*
Licensed to Post without Prepayment. LICENCE No. 57.
आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.

भारतसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ४-००

प्रहेलिका

कवचन पिहितकायः पीतवर्णस्सितांतः
त्रिणनयनसुहृदग्रः श्लक्ष्णदेहस्सुपूर्णः ।
शतशतसहजातः मातृमृत्युस्वरूपः
सपदि कथय विद्वन् मेऽभिधानं प्रसिद्धम् ।।

— कदलीफलं ।

– श्री बालगणपतिभट्टः, श्रीरंगपत्तनम्.

Published by Sri N. Ramanatha Iyer B A; B. L., Advocate
& Secretary S. B. P. Sabha, Chittoor (A. P.)
Printed by Sri T K Thiruvengadacharya
at Vijaya Press, Chittoor (A. P.) C 1500

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

दूरध्वनिसंकेतः –" संस्कृतम् "

वाणीं भजत गैर्वाणीम्

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आ. प्र.) भारतम.

संपुटः ११ | 15 FEBRUARY 1973 | क्रमांकः २

परीधावि-माघांकः | शकाब्दाः १८९४ | मूल्यम् ०–४० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूचिका

१.	अ ास्य गांभीर्यम्	१
२.	**सम्पादकीयम्–** श्रेयान् स्वधर्मो विगुण: परधर्मात्स्वनुष्ठितात्	२
३.	**न्यायमाला–** अभावविरक्तिन्याय:	४
४.	मुक्तकम्	४
५.	श्री वेङ्कटेशशतकम्	५
६.	सुभाषितानि	७
७.	स्वतंत्र - अभिनवभारतदेश:	९
८.	अमरजीवी राजाजी	१३
९.	सल्लाप: सुहृद्भि:	१५
१०.	मयसभा	१७
११.	आन्ध्रप्रदेश:	२३
१२.	श्री बोधानंदभारतीस्वामिन: जयन्तीमहोत्सव:	२६
१३.	ग्रन्थपरिचय:	२८
१४.	चाचानेहरूपितृव्य:	२९
१५.	हरिं भज सुखकरम्	३०
१६.	गजाननसुप्रभातम्	३१
१७.	उत्तरायणपरीक्षाणां व्याक्षेप:	३३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अजस्य गांभीर्यम्

कश्चनाजः कस्यांचन रात्रौ
यूथभ्रष्टः कष्टः प्राविशत् जीर्णालयम् ।
अगर्जदर्धरात्रेऽजगन्धाकृष्टोऽभिधावन् हर्यक्षः
अजश्च शिथिलकवाटमावृणोत् आलयद्वारम् ।।

सिंहोऽस्मि द्वारि वर्ते न मुञ्चे त्वां अभक्षयित्वा
समर्यादमपावृणु कवाटं प्रविश मद्वदनम् ।
येनैककबलवत् गिलिष्यामि त्वां अबाधमानः,
नो चे त्वां चित्रं हन्यां प्राणानमोचन् शनैश्शनैः ।।

अजोऽस्म्यहं पितामहस्य पितामहः पश्य मम कूर्चां
शतं गजान् सहस्रं व्याघ्रान् एकं मृगराजं ।
हन्यामिति व्रतं मे परिपूर्येत भवतो वधादद्य नूनं
अहो सुदिनमिदं कूर्चाविसर्जनाय सिंहपिशितपारणाय च ।।

दृष्ट्वा कूर्चां श्रुत्वा, च अजस्य वचनानि ।
मृगराजोऽधावद्यथागतं गुहाम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

श्रेयान् स्वधर्मो विगुणः
परधर्मात् स्वनुष्ठितात्

स्वे स्वे कर्मण्यभिरतः सिद्धिं विन्दति मानवः । स्वीयं कर्मधर्मश्च यद्यपि अन्यैः अपहस्येत, अथवा निन्द्येत, तथापि ते न परिज्यजेत् । स्वीयस्य आचारस्य अनूचानस्य किमपि कारणं भवेदेव । कालव्यवधानात् कार्यकारणभावसंबन्धसुघटितत्वाप - रिज्ञानेन हेतुना स्वधर्मो नैव त्याज्यः । काकदन्तपरीक्षणमिव तत्कारणगवेषणमनावश्यकमेव । ये केचन अत्र मूढविश्वासत्वमारोपयन्ति ते अपि क्वचिद्विषये तद्वन्त एव भवेयुरिति तन्मुखोल्लासाय आत्मस्वरूपनाशो न कर्तव्यः । "येनाऽस्य पितरो याताः येन याताः पितामहा , तेन यायात्सतां मार्गं तेन गच्छन् न रिष्यते" ।

शिरसि शिखा

भारतदेशीयानां शिरसिशिखाया धारणं बहोः कालादनुवर्तते, तत्रापि स्त्रीणां पूर्णशिखा । तच्छेदनं च अमंगलप्रायं संभाव्यते । एतस्य कारणमुष्णदेशवासित्वं ऊर्ध्वंगतपस्तेजस्सूचकत्वादिकं यद्यप्युच्यते तदन्यथापि प्रतिवादसंभवात् शास्त्रमात्रशरणानां तादृशाप्रतिष्ठिततर्कशरणत्वं नैव श्रोयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुखे तिलकम्

मुखे तिलकं भारतीयानां अत्यंन्तावश्यकं मन्यते । तिलकेषु भेदो न गण्यते यथोपासनं तत्तद्धारणस्यावश्यकत्वात् । शून्यमुखता केवलं निन्द्यते । एतस्यापि आचरणस्य युक्तिभिस्समर्थनं कर्तुं शक्यते परदृष्टिपाताकर्षणनिरोधादिप्रयोजनैः । तथापि अपूर्वसंजनकताया एव तत्प्रयोजनत्वेन अंगीकारे न कापि हानिः । कर्णवेधः अपि भारतीयस्य भद्र आचारः । एवं मूर्तिपूजनं, पितृश्राद्धं, गोमयशोधनं, वेदशास्त्रपुराणादिविश्वासः, पापभीतिः, पुण्यार्जनकुतूहलं, पुनर्जन्मविश्वासः, अहिंसासत्यास्तेयादिव्रतपरिपालनं इत्यादयः भारतीयानां शुभाचाराः प्रथन्ते ।

आपतिताऽस्मिन् काले हैंदवानां परानुकरणरसिकता । परेषां तृप्त्यर्थं एते शिखां खण्डयन्ति, मण्डयन्ति शिरः विविधप्रकारैः । तिलकं मार्जयन्ति, आर्जयन्ति मुखवाससा वैशद्यम् । यद्रक्षणार्थं शुल्कमपि तद्द्विघातुकेभ्यस्समर्प्य प्राणाधिकतया अस्माकं पूर्वजा अरक्षन्, यद्रक्षार्थं प्राणानपि अत्यजन् तयोः शिखातिलकयोर्विषये अधुनातनानां आदर एतादृशो विवर्तते ।

सकलमतसहनं सकलप्रजासहमतिश्च भवेदेवास्मकं, परन्तु सामरस्यस्य अयं नार्थः यद् स्वीयस्वरूपनाशेन परानुकरणमेवेति । परस्नेहार्थं चुबुके शिखाधारणं, शिरसि शिखावारणं, मुखे तिलकमार्जनं नैव समंजसम् ।

भारतीयसिद्धांतानां आचाराणां च पाश्चात्यविद्वत्प्रशंसाप्राप्तिकालेऽस्मिन् तन्निराकरणं परानुकरणं च भारतीयस्य लज्जावहं भवति ।

अतो भारतबन्धून् प्रार्थये स्वस्ववेषभूषाभाषाचाराणां अपरित्यागपूर्वकं प्रपंचप्रजाभिः संगम्य प्रपंचप्रशंसापात्रं भवेयुरिति । अत्र विषये सिख्खसोदराः अत्यंतप्रशंसार्हा ये स्वस्वरूपसंरक्षणपूर्वकमेव विविधकर्मनिष्ठाः संस्तूयन्ते जगति ।

एतद्देशप्रसूतस्य
सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन्
पृथिव्यां सर्वमानवाः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभावविरक्तिन्यायः

"अवरः"

वैराग्यं भुक्तभोगानां कदाचिज्जायते स्वतः। स्वभावसिद्धे वैराग्ये भोग्यवस्तूनां समीपे सत्त्वेऽपि न तत्र भोगेच्छा पुनर्भवति। सैव विरक्तिः नैसर्गिकी।

दारिद्र्यदोषेण भोग्यवस्तूनां अभावे या विरक्तिः सा न स्वतस्सिद्धा। यदा पुनः भोग्यवस्तूपलाभः तदा वैराग्यमपगच्छति। ईदृशं वैराग्यं अभाववैराग्यमित्युच्यते। ईदृशान्येव वैराग्याणि बहूनि सन्ति। यथा प्रसूतिवैराग्यं, श्मशानवैराग्यमित्यादिकं। एतादृश-स्थलेषु या या विरक्तिर्जायते सा सर्वाऽपि अभावविरक्तेर्भगिनी भवति।

यत्ने कृते यदि न सिद्धयति कोऽत्र दोषः? इति समाधानं अभावविरक्तिन्यायं स्मारयति।

"सहजं कर्म कौन्तेय मुक्तसंगः समाचर" तदेव वैराग्यम्।

मुक्तकम्

पित्रेऽसौ गरलं ददाविति रुषा पाथोनिधेर्जीवनं
हर्तुं क्षिप्तकरः, गिरीन्द्रसुतया "मामा भवेः साहसी।
गूढोऽस्मिन् तव मातुलो गिरिभिदो भीतस्त्वया दर्शितः
स्याद्वत्से"ति निवारितः करिमुखः पायात्सदा नो मुदा॥

—मा. शिवरामराजः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीवेंकटेशशतकम्

पैत्तांबाडि महाकवि व. रामानुजाचार्यविरचितम्.

(पूर्वानुबन्धः)

श्रीतोण्डमानभिधभूमिपतेः पुराऽऽसी-
दाकाशराज इति नामधरोऽनुजश्च ।
भक्तस्त्वयीह धरणीपतिरप्यपुत्रो
लब्धुं सुतां श्रियमसौ हि तपश्चकार ॥

तदा पुरेऽस्मिन् वरपुष्करिण्यां राजीवपुष्पादिमनोहरायाम् ।
सौवर्णमेकं कमलं बभूव यस्मिन्शिशुः श्रीश्च हिरण्यवर्णा ॥
पत्न्या धरण्या सह तत्तटेऽस्मिन् आकाशराजस्तपसि स्थितोऽत्र ।
सूर्योदये तन्नमनप्रवृत्तश्शुश्राव बालध्वनिमंबुमध्ये ॥

गत्वा तत्र सुवर्णरूपनळिने बालां ज्वलन्तीं श्रिया
दृष्ट्वा नैजतपःफलं त्वियमिति प्रीतो गृहीत्वाऽऽदरात् ।
पत्न्या साकमुपेत्य नैजनगरं पद्मावतीति स्वयं
कृत्वाऽऽख्यामवति स्म राज्यमनघः श्रीवेङ्कटेशेक्षणात् ॥

काले गते कतिपये च विवाहयोग्यां
मत्वा सुतां वरविचिन्तनतत्परेऽस्मिन् ।
श्रीमान् स एव वररूपमुमेत्य भूपे
कन्यां तदा स्वयमयाचत वेङ्कटेशः ॥

दृष्ट्वा वरं तमथ दारसुतासमेतो
मत्वा सुलक्षणमुखैर्भगवन्तमेव ।
आनन्दतुन्दिलमना मुदितां सुतां तां
तस्मै ददावुदकदानयुतं स भूपः ॥

पद्मावतीवेङ्कटेशविवाहे दुन्दुभिध्वनिः ।
साप्सरोनृत्तशब्दं च पुष्पवृष्टिश्च खादभूत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्मावतीपाणिमसौ गृहीत्वा स्थानं निजं वेङ्कटशैलशृंगम् ।
श्रीवेङ्कटेशो रमयन्प्रियां स्वां गत्वाऽऽलयं पूर्णमनोरथोऽभूत् ॥

इति पद्मावती विवाहदशकम् ॥ १० ॥

अथ फलश्रुत्यष्टकम्

कतिपयकाले गच्छति निरीक्ष्य पद्मावतीं प्रियामवदत् ।
मद्हृदयस्था लक्ष्मीरेव त्वं चासि लक्षणं खलु मे ॥

यद्वदुपायोपेयत्वयुतायाः पुरुषकारताऽभ्याधिका ।
त्वय्यस्ति संश्रितेषु त्वमतो माताऽसि सर्वलोकानाम् ॥

श्रीशुकनगरं गत्वा तव जन्मस्थानमाश्रितान् रक्ष ।
साकं मया त्वमधुना प्रभृति त्वद्राज्यपालनं कुरु च ॥

प्रतिकार्तिकमासं ते महामहे त्वन्मुदे मदीयानि ।
मत्प्रहितानि स्वीकुरु माल्यादीनीति वेङ्कटेशोक्त्या ॥

स्वीकुर्वन्ती तथाऽद्यापि प्रतिवत्सरमब्धिजा ।
भाति सा वेङ्कटेशश्च पातान्नो दिव्यदंपती ॥

श्रीवेङ्कटेशश्शतकं स्तोत्रमेतत्स्वयं मया ।
स्वकीयं श्रीप्रदं भव्यं स्वप्रीत्यै समकारयत् ॥

प्रीयतां यत्प्रणीतेन स्तोत्रेणानेन वेङ्कटः ।
भगवान् वासुदेवो नः कलौ कालेऽपि रक्षकः ॥

श्रीवेङ्कटेशशतकं पठतां जनानां
सर्वेष्टदानमहितस्स वृषाद्रिनाथः ।
काले कलावपि दिशेदभिवांछितानि
पद्मावती च बहुमंगळदानदक्षा ॥

इत्थं श्रीवात्स्यसद्वंशजविमलगुणः श्रीवरहाख्याविद्व-
त्सूनुः रामानुजाख्यो दशविधबिलसद्रूपकाणां प्रणीता ।
अन्येषां सत्कृतीनामभिनवमहिष्श्रीसहस्रस्य चापि
प्राणैषीत् वेङ्कटेशस्तवमिह शतकं सर्वसिद्धिप्रदं च ॥

सम्पूर्णम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

सुभाषितानि

रचयिता श्री एन्. रामनाथार्यः.

(पूर्वानुबन्धः)

आपदामापन्तीनां हितो प्यायाति हेतुताम् ।
मातृजंघा हि वत्सस्य स्तंभीभवति बन्धने ॥ ॥ ४६५ ॥

When misfortunes befall even friends act animically; when a calf is to be tied, the leg of its mother serves as a post·

मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति ।
अपि निर्वाणमायाति नाऽनलो याति शीतताम् ॥ ४६६ ॥

A man of self respect would rather die than stoop to meanness; fire wold get extinguished but would never become cool·

सेवेव मानमखिलं ज्योत्स्नेव तमो जरेव लावण्यम् ।
हरिहरकथेव दुरितं गुणशतमप्यर्थिता हरति ॥ ४६७ ॥

Just as servitude destroys all self respect, the moonlight darkness, old age personal beauty and the stories of Sri Vishnu and Sri Siva all sins begging hundreds of good qualities.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

को धर्मो भूतदया ; किं सौख्यमरोगिताजगति जन्तोः ।
कः स्नेहः सद्भावः, किं पांडित्यं परिच्छेदः ॥ ॥ ४६८ ॥

What is righteous conduct? Kindness to all beings· What is true happiness? Freedom from diseases What is friendship? Noble conduct· And what is erudition? Discrimination

दानोपभोगहीनेन धनेन धनिनो यदि ।
भवामः किं न तेनैव धनेन धनिनो वयम् ॥ ॥ ४६९ ॥

If a person is considered wealthy, though he neither enjoys himself nor bestows wealth on others, in that sense, can we also not be considered rich, even without wealth

यद्ददाति यदश्नाति तदेव धनिनो धनम् ।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥ ॥ ४७० ॥

That alone is considered the wealth of a rich person, which he himself enjoys and also bestows on others· For, after his death others enjoy his wealth and are free even wi·h his wife

नाऽप्राप्यमभिवांछन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्स्वपि न मुह्यन्ति पण्डिताः स्थिरबुद्धयः ॥ ॥ ४७१ ॥

Wise men do not crave for things unattainable nor feel sorry for lost things; they are steadyminded even during calamities

(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्र - अभिनवभारतदेशः

लेखकः श्री के. टि. नरसिंहः,
व्याकरण - साहित्य - शिरोमणिः शिक्षाशास्त्री.

[पूर्वानुबन्धः]

आन्– (सपरिहासं विहस्य) सन्तानाधिक्यस्य स्वप्राणत्यागस्य च को वा संबन्धः ?

गृहस्थः– पूज्य ! अहन्तु एतेषां पञ्चदश संख्यानां सन्तानानां रक्षणार्थं मदीयं सर्वस्वमपि व्ययीकरोमि । एवं स्थिते मद्भार्या भूयोऽपि अन्तर्वत्नी जाता । सामान्यतः तस्याः शिशुद्वयमेव स्यात् । अतः एतेषां रक्षणभीत्याऽहं मत्प्राणानपि त्यक्तुं सज्जोऽभवम् ।

आन्– (सविषादं तस्य मलिनदेहं पश्यति) भो गृहस्थ ? मास्तु ते भीतिः । इतःपरं यथा ते वंशाभिवृद्धिः न स्यात् तथैव त्वत्कृते कुटुम्बनियन्त्रण (Family Planning) चिकित्सां करिष्येऽहम् ।

गृहस्थः– (सहर्षम्) तर्हि तदनन्तरं संख्याभिवृद्धि न भवेद्वा ?

आन्– नैव । प्रपञ्चे प्रतिदिनं बहुलक्षपरिमिता शिशव प्रादुर्भवन्ति । विशिष्य अस्माकं आशियाखण्डे प्रतिनिमेषं पंचविंशतिसहस्र (२५,०००) परिमिताः शिशव उपजायन्ते । तेषां रक्षणार्थं प्रतिनिमेषं त्रयः भिषजः, पञ्ज दास्यः, तिस्रः उपमातारः, पञ्चाशदुत्तरसप्तशत (७५०) संख्याकाः शिक्षिताध्यापकाश्च अपेक्ष्यन्ते । अत. ईदृशविपरीत - जना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धिक्य निवारणार्थमेव अस्माकं भारतप्रभुत्वं बहुकोटिपरिमितं धनं व्ययीकृत्य कुटुम्बनियन्त्रणकेन्द्राणि स्थापयति ।

गृहस्थः– (सामाजिकान् पुरस्कृत्य) अत्र ये केचन भवेयुः मादृशाः ते सद्य एव कुटुम्बनियन्त्रणकेन्द्रं प्रति व्रजन्तु इति मत्प्रार्थना। (भिषजे नमस्कृत्य गच्छतः । भिषगपि स्वहस्तघटिकायन्त्रं दृष्ट्वा घण्टां परामृशन् अतति)

(यवनिका पतति)

पञ्चम प्रदर्शनम्

(भास्करेण स्वपितुः कृते उत्तरं लिखितम् । भास्करपिता तत्पठन् वेदिकां प्रत्यायाति । तदा तत्रस्थौ इतरग्रामीणौ तन्मुखमेव पश्यतः । भास्करपिता अतीव सन्तुष्टः तौ प्रति वक्ति)

भास्करपिता– मम पुत्रः देशान्तरात् आयाति ।

प्रथमः– कदा ?

भा. पि.– अद्यैवेति उत्तरमुखेन ब्रवीमि ।

द्वतीयः– किमर्थं भास्करः देशान्तरमगमत् ?

भा. पि.– पूर्वमेवानेन कृषिविज्ञानमधिकृत्य अभ्यस्तं खलु । इतोऽपि सामूहिककृषिः कथं कर्तुं शक्येत इत्यवगमनार्थम् ।

प्रथमः– कारणान्तरमपि भवेद्वा ?

भा. पि.– ओं ? स्यान्नाम ।

(तदा भास्करः स्वपेटिकां गृह्णन् रङ्गं प्रविश्य पित्रे अन्याभ्यां च प्रणमति । तदा भास्करपिता तं पृच्छति ।)

भा. पि.– प्रयाणे अपि सौविध्यमभूत् ?

भास्करः– तथैव । आम् ।

भा. पिता– त्वद्गमनागमनप्रयोजनं किमिति शुश्रूषवस्स्मः वयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भास्करः– निवेद्यते मया ।

प्रथमः– कं देशं प्रति जगाम भवान् ?

भास्करः– जप्पान् देशं प्रति ।

द्वितीयः– किमर्थम् ?

भास्करः– कृषिरङ्गे उभयोः देशयोर्मध्ये विद्यमानभेदस्यावगमनार्थम् ।

प्रथमः– अपि भेदः अस्ति ?

भास्करः– पर्वतपरमाणुभेदोऽस्ति ।

भा. पिता– कस्मिन् विषये ?

भास्करः– विषये विषये ।

प्रथमः– न ज्ञायतेऽस्माभिः ।

भास्करः– विपुलरूपेण वक्तव्यम् ।

द्वितीयः– तर्हि नः कृते अवश्यं कथ्यताम् ।

भास्कर– तथैव । श्रूयतां कृषिरङ्गे किमपि उद्यमं कृत्वा तद्देशीयाः सस्यश्यामलत्वं संपाद्य तद्द्वारा आहारसमृद्धिं प्रापुः । किञ्च देशान्तरस्य कृतेऽपि धान्यादिकं प्रेषयन्ति ।

प्रथम– तेषां कृषिभूमिः अस्मदपेक्षया अधिका स्यात् ?

भास्कर– न हि । अस्माकं देशापेक्षया अतीव अल्पदेशोऽयम् ।

भा. पिता– सस्योत्पादने तेषां सहजसौविध्यं स्यान्नाम ?

भास्करः– तदपि न । यत जप्पान्देशे बहूनि अग्निपर्वतानि सन्ति । तद्द्वारा असकृत् अग्निस्रावः उपजायते । तदा सर्वस्यापि नाशो भवति ।

द्वितीयः– तर्हि कृषिभूमिः समतला स्यात् ?

भास्कर– त्वदुक्तिरयुक्ता भवति । देशोऽयं भिन्नभिन्नलङ्कापूरितो भवति । अपि च भूमिरपि न समतला ।

प्रथमः– दीर्घकालानुभवेन साधितवन्तो भवेयुः ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भास्करः– तदपि न । यतः द्वितीयप्रपञ्चयुद्धे हिरोषिमा प्रभृति मुख्यनगराणि संपूर्णतया नाशितानि ।

द्वितीयः– प्रभूतभूस्वामिनां हस्तेष्वेव समस्ता भूमिः निक्षिप्ता स्याद्वा ?

भास्करः– निरर्थिका शङ्केयम् । तत्र तु असंख्याकाः अल्पभूस्वामिनः अधुनापि व्यवसायं प्रकुर्वन्ति ।

भा. पिता– एवं सति तत्कथं साधितं ? ब्रूहि ।

भास्करः– ते सर्वे अहर्निशं कर्म कुर्वन्ति । जप्पानीयाः इत्यस्य अपरार्थः श्रमशीलाः इति । किञ्च कृषिविज्ञानप्रभावेन, नूतनबीजसंरोपणेन, क्षुद्र सस्यप्रतिरोधन जन्तुनाशेन, नवीनयन्त्रोपयोगेन, भिन्नभिन्नभूभागानां एकीकरणेन, समष्टिव्यवसायेन च तेऽभिवृद्धिं साधितवन्तः ।

प्रथमः– तद्दर्शनेनाऽस्माकं फलं किम् ?

भास्करः– तद्वत् वयमपि कुर्मः । "सङ्घे शक्तिः कलौ युगे" इति सत्यं जानीमः । पुरातनपद्धतिं त्यक्त्वा नूतनमार्गं स्वीकुर्मः ।

द्वितीयः– प्रातिस्विकपुरुषेण तत्कथं साध्यम् ?

भास्करः– प्रातिस्विकः पुरुषोऽपि जनतन्त्राख्यभवनस्य स्तम्भ एव भवति खलु । तेन यदि प्रयत्यते तर्हि प्रभुत्वमपि तस्मै उपकरिष्यतीति भृशं विश्वसिमः ।

प्रथमः– केन प्रकारेण प्रभुत्वं सहकरिष्यति ?

भास्करः– भारतप्रभुत्वं तदर्थं बहुविधं प्रयत्नं करोत्येव ।

भा. पिता– न ज्ञायतेऽस्माभिः, यान् कांश्चन प्रकारान् ब्रूहि ।

भास्करः– तथा । प्रथमतः भारतप्रभुत्वन्तु भारतदेशे प्रतिप्रान्तं कृषिविश्वविद्यालयं स्थापयति ।

–(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

अमरजीवी राजाजी

"अवरः"

शान्तिरस्तु—

भारतराजनैतिकक्षेत्रे कुरुवृद्धः, प्रथमभारतीय (गवर्नर् जनरल्) राष्ट्रपालकः प्रसिद्ध राजनीतिकोविदः महामनीषी श्रीमान् चक्रवर्ति राजगोपालाचार्यः २५–१२–७२ सोमवासरे सायं ५–४४ घण्टासमये मद्रास् महानगरे जनरल् हास्पिटल् भवने कालधर्मं गत ।

भारतराजनैतिकक्षेत्रे ऊनान्यूनं पञ्चाशद्वत्सरपर्यन्तं प्रमुखपात्रधारी "राजाजी" उपाख्यः "भारतरत्न" बिरुदाङ्कितः "सि. आर्" प्रत्याहारव्याहृत अयं महान् नव दिनानि मृत्युना सहयुध्यन् अन्ते शाश्वतीं निद्रामुपाक्रमत् ।

मरणसमये तत्समीपे कुटुम्बसभ्याः राष्ट्रपतिः वि. वि. गिरिमहोदयः, तमिलनाडु मुख्यमन्त्री श्री करुणानिधिः, अन्ये मन्त्रिणः संस्थाकांग्रेस् नेता श्री कामराजः, भूतपूर्व केन्द्र वित्तमन्त्री श्री टि. टि. कृष्णमाचार्यः, केन्द्रमन्त्री श्री सि. सुब्रह्मण्यश्च आसन् ।

मूत्रपिण्डसम्बन्धिना व्याधिना बाधितो राजाजीमहोदसः जनवरी १७ दिनाङ्के जनरल्हास्पिटलं नीतः । सर्वविधानि वैद्यसौकर्याणि समर्पितानि । जराभारेण पुनरुज्जीवन मसम्भवमासीत् । चिकित्सया युरेमियाव्याधिस्तु शान्तप्रायः । मलविसर्जकान्त्राणि निष्क्रियाण्यासन्निति, प्रत्युत अन्तिमदशायां श्वास-कोश-व्याधि पुनरुद्धृत आसीदिति, तत एव मृत्युरुपस्थित इति भिषग्वराः प्राहुः ।

अमरजीविनो राजाजीमहोदयस्य आत्मा शान्तो भवतु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्परिवारस्यापि सन्तापशान्तिरस्तु ।

प्रसिद्धिः–

राजाजी बहुमुखप्रज्ञाशाली, प्रपञ्चे न कोऽपि प्रमुखो विषयोऽस्ति, यस्तेन न परामृष्टो विमृष्टो वा नाऽभूत् । अयं महान् साहित्यकोविदः; रामायण महाभारत काव्येतिहासानुवादं सरलशैल्या आग्ल्यां द्राविड्यां च अकरोत् । सामान्यप्रजावगमनार्थं भगवद्गीतायाः उपनिषदाञ्च भाष्याण्यरचयत् । निजविश्वासपात्रं सिद्धान्तं प्रतिपादयितुं रक्षितुं च स न कदापि पश्चाद्गतः । विश्वासयोग्येषु विषयेषु स न कदापि सन्धिमङ्गीचकार; सिद्धान्तेषु स न कस्यापि पुरतः नतमस्तकोऽभवत् । अण्वस्त्रोत्पत्ति विमृशन् व्यतिरेक - भावव्यापनेन निर्माणात्मकं विधानं प्रतिपादयामास । स्व. सोवियेट् प्रधानामात्येन निकेता क्रुश्चेव्महोदयेन साकं बहुकालपर्यन्तं पत्रव्यवहारं कुर्वन्नासीत् । अण्वस्त्रपरीक्षानिरोधार्थं स्व. केन्नेडीमहोदयं अङ्गीकारयितुं अमेरिका देशमप्ययं गतः ।

दिशापरिवर्तनम्–

अस्य सिद्धान्तेषु राजनैतिकचर्यायां च परस्परविरुद्धा अप्यंशास्सन्ति । ३५ वत्सरेभ्यः प्राक् मद्रासराष्ट्र - मुख्यमंत्री भूत्वा अनिवार्यपाठ्यतया हिन्दीभाषाध्ययनं यः प्रवर्तयामास स एव अन्त्यकाले हिन्दी भारत-राष्ट्र - राजभाषा भवितुं नार्हतीति प्रतिवादमकरोत् । हिन्दी व्यतिरेकोद्यममपि दक्षिणभारते प्रोत्साहयामास च । द्र. मु. क. पक्षं मद्रासराज्याधिकारे रूढमूलं कर्तुं यावच्छक्ति साह्यमारचयत् । कांग्रेसपक्षं परित्यज्य स्वतन्त्रपक्षं स्थापयामास । आरोग्यविधिषु राजाजी महान् श्रद्धालुः । आहारविहारादौ अनिवार्यविधया नियमपालनेन ते ९४ वर्षेऽपि वार्धके नीरोगस्सन् ग्रन्थपठने, लेखने च समर्थ आसीत् । स्वदेशीय - विदेशीयवार्तापत्रिकापठनं स्वयं कुर्वन् शृण्वन् वाऽसीत् ।

–(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सल्लापः सुहृद्भिः

लेखकः श्री य. कृष्णशर्मा, बेंगलूरु–४.

१. श्रोता भवति वा न वा !

दुर्लभेषु अन्यतमं हि वक्तृत्वं नाम। तत्रापि संस्कृतस्य वक्तारः दुर्लभतमाः। केनचित् उक्तं क्वचित् यत् "लेखनं हि अध्ययनं विहंति, वक्तृत्वं तु अध्ययनं लेखनं चेति द्वयमपि" इति। अत एव ? संस्कृते अधीतिन वयं प्रायः न प्रवर्तामहे संस्कृते किमपि लिखितुं वक्तुं वा।

यद्यपि जाग्रत्येव वहवः संस्कृतस्य लेखकाः वक्तारश्च राष्ट्रस्य भाग्यात्। परं तु श्रोतारो नैव लभ्यंते। इदं तु सामान्यमेव, न तु विशेषः; यत् संस्कृतपाठशालासु महापाठशालासु वा आयोज्यमाने सांस्कृते समारंभे तत्समारंभायोजकाः केवलं द्वित्राः उपतिष्टंति, नेतरे छात्राः अध्यापकाः वा इति। प्रायेण हि संस्कृतज्ञाः अन्तर्मुखाः भवंति। जनसंमर्दात्, कोलाहलाद्वा मानसिकी शांतिः एकाग्रता च विक्षुभ्यति। अत एव हि वयं सभासमारोहादिभ्यः पलायामहे सुदूरम्। इत्थं च सुभाषितमिदं समन्वेति संस्कृतसमाजेऽद्य यत् "संस्कृतस्य वक्तारो दुर्लभाः लोके श्रोतारस्तु सुदुर्लभा." इति।

२. संस्कृतश्राद्धम् !

"न नाम विस्मर्तव्यं 'संस्कृतं' इति पदं" इति कृत्वा संस्कृतोत्सवनाम्ना सर्वत्र समाचर्यते संस्कृतश्राद्धं भारतेऽद्य महता संरंभेण। संस्कृतस्य प्रतिसांवत्सरिके श्रद्धेऽत्र पितृस्थानाय नगरपालिकायाः अध्यक्षः, विश्वेदेवस्थानाय मान्यः राज्यपालः, विष्णुस्थानाय मान्यवरः शिक्ष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णसचिव.; पौरोहित्यनिर्वहणाय तुंदिल: कश्चित् धनी च आहूयन्ते सादरम् । एते किल महान्तः सम्यगिव जानंति संस्कृतं आंग्लयाः माध्यमेन । सर्वे च ते स्वकीयेन आंग्लभाषणेन, देशभाषाभाषणेन वा संस्कृतज्ञान् अशेषानपि चकितान्, स्तब्धान् मूकान्, अंततः अज्ञांश्च विदधति । "मॉक्स्मुल्लरः" संस्कृतविषये एवमवदत्, मॉक्डोनालः अनैवमवादीत्" इत्येवं वदन्तः ते संस्कृतोपरि अन्यादृशमेव प्रकाशं विकिरंति । "स्याँस्क्रिट्" "स्याँस्क्रिट्" इति भाषणस्य आन्तं यावत् असकृत् उच्चैःस्वरेण उच्चारयंति ।

वस्तुतः वहूपकृतं पाश्चात्यैः विदद्भिः संस्कृतम् प्रति। सर्वथा वयं अधमर्णाः एव स्थास्यामः तेषां सर्वदैव इति नातिशयोक्तिः । परं, यत्र सांस्कृते समारंभे, पाणिनेः, वाल्मीकेः, व्यासस्य वा, भासस्य, काळिदासस्य, बाणस्य वा, शंकराद्याचार्याणां, जिनबुद्धदीनां वा, दर्शनस्य कस्यचित्, रामायणस्य, महाभारतस्य वा कस्यचित् संस्कृतग्रन्थस्य नामापि नोच्चार्यते, यत्र च सांस्कृते समारंभे, स्वागतादि बन्दनार्पणं यावत् सर्वे कार्यकलापाः आंग्लया देशभाषया वा निर्वर्त्यंते, कथं वा अर्हति अयं सांस्कृतसमारंभव्यपदेशमिति न पश्यामि ।

"दिनाचरण" इति शब्दः "औध्र्वदैहिक कर्म" इत्यर्थं अभिधत्ते कर्णाटकेषु । युज्यते किल संस्कृतस्यापि दिनाचरणं तदभिमानिनां अस्माकम्, यतो हि, अविमृश्यकारितापटवः पाश्चात्यविमर्शकाणां वचनमेव प्रमाणं मन्वाना भारतीयाः अपि केचित् "संस्कृतं मृतभाषा" इति तारं गर्जंति तदा तदा । इत्थं च युक्तमेव मृतस्य संस्कृतस्य पुण्यलोकावाप्तये संस्कृतोत्सवनाम्ना (संस्कृतदिनाचरणनाम्ना) औध्र्वदैहिककर्मानुष्ठानं, प्रतिसांवत्सरिकश्राद्धानुष्ठानं च । विश्वसिमि, अनेन च कर्मणा संस्कृतं अचिरादेव शाश्वतं पुण्यलोकं आप्नुयात् इति । क्षाम्यतु संस्कृतं, क्षाम्यन्तु च संस्कृतज्ञाः माम् !

–(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मयसभा

रचयिता– श्री पंडित दीवि. वेङ्कटरामाचार्य, गर्तपुरी.

अहो ! एतन्मयसभाभवनसौन्दर्यं निरुपमानं, त्रिजगज्जेगीयमानं च। दशकिष्कुसहस्रविस्तारायामरमणीयम्, प्रभाकरप्रभानिभशुभतेजोविराजितम्, सकलरत्नाकरैकप्रशस्तरत्नकाञ्चनचयाञ्चितम्, अनल्पशिल्पकल्पनाकल्पितं चास्य सौन्दर्यं हरिहरादीनपि आश्चर्यचकितान् करोतीति नातिशयोक्तिः।

अपि च अगणितमणिमाणिक्यलिखितरङ्गवल्लिकालङ्कृतम् लम्बमानमणितोरणराजिविराजितम्, चित्रविचित्रचित्रसहस्रप्रशोभितम्, कर्पूरकस्तूरिकाकुंकुमप्रमुखदिव्यपरिमळद्रव्यमयम्, सर्वगीर्वाणप्रशंसनार्हाद्भुतवस्तुसन्दोहसम्भरितम्, सुरेश्वरधनेश्वरप्रमुखसकलदिक्पालकसभाभवनसौन्दर्यम् अस्याः सौन्दर्यस्य सहस्रांशमपि अनुकर्तुं नार्हति। संपूर्णचन्द्रचन्द्रिकासन्निभस्फटिककुड्यानि, कनककवाटगेहळीविटङ्कवातायनानि, पुष्यरागवितर्दिकान्, विनिर्मलस्फटिकोपलसोपानमार्गान्, समस्तनिर्जरस्तवनीयस्तम्भसहस्रम्, मणिगणकिरणप्रसारकस्तम्भोदञ्चनानि वीक्षितुं सहस्राक्षोऽपि नालमिति मन्ये।

अहह ! कुतोऽयं गीतध्वनेः संभूतिः ? सुयोधनहृदयमप्यानन्दडोलिकाभिर्दोलायते। परमानन्दानुसन्धानमेतद्गानमाधुर्यम्। (परितः विलोक्य) कुत्राऽपि न दृश्यते ? कथं अमन्दमन्दारमरन्दपरिष्यन्दमानेन हृष्यदिन्दिन्दिराबृन्दस्य झँकारोऽयम्। बम्भरसंरम्भोऽयं अस्माकं श्रवणयोः अपूर्वमानन्दं जनयति। भृङ्गानपि संमोह-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्ति इमानि प्रसूनानि, अतीवमनोहराणि च। (पुष्पाणि स्पृष्ट्वा) चित्रं चित्रमेतत्। तर्हि, कुतोऽयं पुष्पलिहां झंकारः! ऊहातीतः, चित्रमेतद्वर्णनातीतम्। तत एव आबालगोपालं "मयसभा", "मयसभा" इति स्वप्नायते। किमयं पुष्यसौरभसन्दोहः? आम्, ज्ञातं, अस्याः चन्दनगन्धितनूलतिकायाः दिव्यगन्धः। अहह! एषा मन्मथस्य अस्त्रं, उताहो त्रीन् लोकान् जेतुं ब्रह्मणा सृष्टं दिव्यास्त्रं वा? विद्याधरा, फणाधरा, वीणाधराश्च, अस्याः शोणाधरायाः सदृश्यः भवन्ति वा!

अस्या वदनं संपूर्णचन्द्रकलासदनम्। कंठोऽयं दिव्यशंखसौन्दर्यमङ्गलकरः। करौ त्रिजगतां शोभाकरौ। नेत्रे शतपत्रजैत्रे। अधरः सुधामधुरः। जघनं धराघनम्। मध्योऽयं भावाभावमध्यः। केशपाशः घनसंकाशः। ऊरू रम्भाद्वयतिरस्कारौ। पदौ मृदुपल्लवास्पदौ। अस्याः सौन्दर्यं अन्यस्यां कस्यांचन सुन्दर्यां दृश्यते वा? एषा सुन्दरी सर्वसमयसौख्यप्रदात्री न भवेद्वा? अस्याः विना सख्यं जीवितमेत्र निस्सारं, निस्तेजश्च। मदनास्त्रमेव एषा नारी। एनां पश्यन्नेव पराङ्गनापराङ्मुखोऽपि सुयोधनः मदनविकारं प्राप्नोतीति महदाश्चर्यम्। अहं भावयामि अनया चतुरप्रसङ्गतरङ्गेषु प्लवमानः दरहासपाशैः बद्धः मधुरगानैरालापितः, प्रणयकलाप्रावीण्येन प्रदर्शितो भवेद्यद्यहं अदृष्टवान् मत्तः कोऽन्यः? अस्याः करपल्लवेषु स्थिता प्रसूनमालिका नानावासनावासिता, विशेषविलासनिलया च सौन्दर्यं प्रदर्शयति। एनां भृतवतो जन्म धन्यम्। हे कलकंठि! उत्कंठया स्थितस्य नरकंठीरवस्य मम कंठं मनोहरेण सुमनोहारेणालंकुरु। आः! मौनमवलंबसे वा? स्त्रीणां सहजभूषणं लज्जां वहसि वा? उताहो, अस्मानवगन्तुं धृतो मनोरथः?

श्रूयतां, वयं विश्वविश्वंभराधीश्वराः। अखर्वबाहागर्वनिर्वहणाः। अवार्यशौर्यधैर्यधुर्याः। कुरुक्षितिपतयः। निखिललोक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लावण्यसीमाधाम त्वम् । अभिमानधनः धराधवोऽहं । आवयोः सख्यं अनुपमानं भविष्यति । मम हृदयंगमा त्वम् । रमणीमणे ! रमणीयमणिकंकणकिंकिणीगणक्वाणैः मन्दाक्षमन्दाक्षरैश्च सकाशमस्माकं आयाहि । भवत्करविलसिता सुममाला मदीयगलसीमानमलंकरोतु । तदा हि राजाधिराजोऽहं त्वदीयहृदयाधिदैवतं नूनं भविष्यामि । आं, अद्यापि ह्रियं धारयसि ? तर्हि, वयमेव त्वत्सकाशमागत्य तव पाणिग्रहणं कुर्मः । (समीपं गत्वा) आश्चर्यं ! एषा काञ्चनपाञ्चालिका बालिका ! इयं राजाधिराजमेव आश्चर्यहर्षायत्तचित्तं करोति । (स्पृष्ट्वा) अयं कलाखंडः रमणीयः खलु चिरस्मरणीयश्च । संक्रन्दनसंस्तूयमानसभाभवननिर्माणप्रवीणः मयः कलामयः । तस्य महनीयशिल्पं दर्शं दर्शं विबुधैः हेमनाम्नी अप्सराङ्गना दत्तेति न किञ्चिदप्याश्चर्यम् । अहो ! एतत्सुन्दरमन्दिरसन्दर्शनं गतजन्मकृतसुकृतफलम् । अस्याः सभायाः सम्पादनेन पाण्डवाः लब्धप्रतिष्ठा । तेषामैश्वर्याणि द्विगुणीकृतानि शत्रूणां ईर्ष्याकराणि च । आः ; किम् धरणीधारणधुरीणस्य गदायुद्धप्रवीणस्य, सुयोधनसार्वभौमस्य वदनाद्वा एषा अपश्रुतिः पाण्डवाधमानां एतादृशी अशेषख्यातिर्वा ? एतावत्पर्यन्तं एकचक्रपुरे भैक्षम् चरन्तो पाण्डवार्भका जीवन्ति स्म । परमद्य अक्षीणलक्ष्मीसंसेव्याः ते कुबेरमेव अधिक्षिपन्तीति महदाश्चर्यम् । राजसूयं परिसमाप्य सुवर्णशकलान्, विशुद्धरत्नाजालानि च प्रजाभ्यः बहूकृतानीति इतोऽपि चित्रम् । भोजनतुष्टाः शतसहस्रभूसुरग्रामण्यः निर्विरामं शंखध्वानेन तदध्वरोत्सवं समापितवन्तः । बत! पञ्च पाण्डवाः पञ्चामरद्रुमैः, हरिपञ्चायुधैः, हरपञ्चाननैश्च उपमीयन्ते ।

आहूताः क्ष्मापतयः, "एते पाण्डवाः, देवतावृक्षाः, मन्दारचन्दनपारिजातसन्तानकल्पका इव मनोरथान् पूरयितुं समर्था इति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णवायुधानि पाञ्चजन्यसुदर्शननन्दकशार्ङ्गकौमोदक्य: इव अजय्याः इति, ईश्वरमुखानि ईशान - अघोर - सद्योजात - वामदेव-तत्पुरुषानीव परमपवित्राः इति, मत्सम्मुखे प्रशंसनं कुर्वन्तीति कर्णकठोरमेतत् । सर्वस्मादपि अगणितमणिमया एषा मयसभा ममैकतः ईर्ष्यां जनयति, अन्यतो नेत्रोत्सवमापादयति । क्रकचाघात इव हृदयमाकलयति । अस्मज्जनकः द्रुपदसन्निधाने स्थितान् पाण्डवानाहूय कुतो वा राज्यभाग तेभ्यो दत्तवान् ! विश्वकर्मा इन्द्रप्रस्थमतिलोकसुन्दरं कुतो वा निर्ममौ ! मयोऽपि वृषपर्वणे दातुमिच्छन्नपि सभामिमां धर्मजाय कुतो वा प्रादात् ! हितैषिणस्सर्वे अपि राजसूयं कुरुत इति कुतो वा बोधमकुर्वन् ! कष्टं भो ! सर्वथा मयि प्रतिकूलो विधि । नाहं दायादानां प्राभवं स्मारं स्मारं सोढुं शक्तः । सभाया वैभवं एतैरेव नयनै पश्यन् क्षणमपि न तिष्ठेयम् । ततो मे भवनादस्मात् बहिर्गमनमुचितम् । (सर्वतो परिक्रम्य) स एव ! विवृतद्वारदेशः । आं, कोमलकुसुमसुवासनामिलितमलयानिलः ग्रीष्मताप इव सर्वमपि शरीरं बाधते । अस्माद्द्वारदेशान्निर्गन्तुं इच्छामि (गन्तुमिच्छति । शिरः कवाटेन ताडितम्) महती पीडा । भ्रमः । द्वारदेश संवृतः । अन्यैः प्रमादोऽयं न दृष्टः खलु । मयस्य चातुर्यं कीदृशम् ! अगोचरः मार्ग । ईर्ष्यानिलदग्धदेह सुयोधन जीवितान्तं अत्रैव तिष्ठेदेव ? दायादानां भाग्यलक्ष्मीं वीक्षेत एव ? अल्पसमये अनल्पकल्प इव भासते । कथं धरामि ? अन्य मार्ग अस्ति वा ? अन्वेषयामि ? (परितो विलोक्य) अहो ! एष असमानरसालः कोकिलकुलकोलाहलानां निधानम् दर्शनकुतूहलं जनयति । (पदद्वयं निधाय अधो दृष्ट्वा) भवनमध्ये कासारः ? अयं जलाशयः मदमराळमयः अरविन्दसौगंधिकबन्धुरः शैवलोत्कररञ्जितः, नीलकूर्मसमुदयसुन्दरः । सरोवरमेतत् कथं तरणीयम् ? परिधानोत्कर्षस्य करणं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुचितम् । अद्भुतं ! एतत् नीलाश्मरश्मिस्थगितमणिस्थलम् । अमी मीनमराळवारिजकूर्माः शिलाकाञ्चननिर्मिताः । अहह ! प्रजापतेः सृष्टिमपि तिरस्करोति मयब्रह्मणो सृष्टिनैपुण्यम् !

अहो ! असौ बालरसालतरुः नवपल्लवैः, सुधारसभरितफलैः, नयनानन्दकरो भवति । हेमन्तेऽपि अस्मिन् प्रान्ते वसन्तः सहस्रशः प्रकाशते । अयं प्रशान्तवसन्तमधुरसमयः प्रविमलप्रसूनफलमधुरसमयः । इदमाम्रफलं भुञ्जतां जन्मसफलम् तथ्यमेव तथ्यम् । (ग्रहीतुमुद्यम्य) किं, इदं शिलानिर्मितम्? अहो ! मयस्य कलाप्रावीण्यं अनन्यसामान्यं, असामान्यजनसामान्यं च । नो चेत्, असौ तरुः न केवलं मानवान्, किन्तु पल्लवखादिनः पिकनिकरानपि भ्रमयति वा ? शीर्षासनेन तपः कुर्वतामपि अस्माकमेषा सभा लभ्यते वा ? ज्ञातीनामधिकता कथं क्षीणतामुपेयात्, असंभवः । पाण्डवप्राभववैभवदर्शनदुर्गतिः अस्माकमागतेति महत्कष्टम् ।

जनक इव अन्धो भूत्वा जीवनं अस्मादधिकमिति मन्ये । अवश्यमेव गन्तव्यं मया । अहो ! अन्यः जलाशयः दृश्यते । नहि नहि भ्रमोऽयम् । चित्तविभ्रमोऽयम् । अयमपि मणिस्थलमेव । (त्वरया पदान् प्राक्षिप्य जले निपत्य) बत ! एषः स्फटिकदीप्तिजालपरिवृतस्सरोवरः । अस्याः सभायाः प्रलोभः अस्माकं हृदयशल्यभूतः । (परिहासं श्रुत्वा) ।

आः ! का एषा ? अस्मान् दृष्ट्वा परिहसति ? आं ज्ञातम् । हण्डे । द्रौपदि ! त्वमस्मान् परिहसितुं समर्था वा ? क्षात्रं परित्यज्य, श्मश्रु वापयित्वा, ब्राह्मणवेषं धृत्वा, जरासंघं निर्जितवन्तं भीमसेनमेव परिहस । स्वयं वनितां संपाद्य सोदराणामपि अर्धाङ्गिनीं कृत्वा असमर्थ इव स्थितं पार्थमेव दृष्ट्वा विकटाट्टहासं कुरु । अनुजैः भैक्षमाचारयन्तं धर्मराजमेव, नहि नहि अधर्मराज-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेव दृष्ट्वा सभायां परिहस । एतादृशान् षञ्च भर्तॄन् आसाद्य क्षत्रियवंशस्य कलंकमापादयंत्याः आत्मनो परिहासं विधेहि । याहि याहि । सर्वंसर्वंसहाभारधुरंधरं, अरिवीरषण्डखण्डनोद्दण्डगदादण्ड-धरम्, कुरुवंशदुग्धपाथोध्युद्भूतसुधाकरम्, धृतराष्ट्रसुताग्रजम् प्रमादेनापि परिहसितुं समर्था वा? पञ्चभर्तृके! राजसूयाध्वराय, आहूतोऽहं, बन्धुरहं, वयोधिकोऽहं, एतादृशं मां कुलमर्यादां अग-णय्य परिहससि वा? नीचे! किं दृष्ट्वा अहंकारं प्रदर्शयसि? पञ्चभर्तृकाहमिति गर्वातिशयः? उताहो संपद्गर्वः । बन्धकि! पदताडितः कालसर्पः समयं निरीक्ष्य, परीक्ष्य दंष्ट्रया दशतीति न ज्ञायते वा? अवमानदवानलवेदनादोदूयमानमानसः सुयोधनः प्रती-कारमकृत्वा कदापि न निद्रातीति नहि जानासि । (दन्तान् संघट्य) दुरहंकारे! नवखण्डलमण्डलाधिनाथस्य, रिपुकुंभिकुंभभेदनदक्ष-हर्यक्षस्य अस्य दुर्योधनस्य अबला कीदृशी त्वम्? अस्मत्प्रतीकार-दवाग्निज्वालासु भस्मीकरोमि त्वाम् । तव अहंकारस्य कारणभूता एषा मयसभा कथमपि मया स्वायत्तीक्रियत एव । तदेव न, त्वामपि कुरुवृद्धैः, गुरुवृद्धैः च परिवेष्ठितायां कुरुसभायां पराभूय त्वदहङ्कारं निश्शेषं करोमि ।

अन्यथा नाहं गान्धारीप्रियतमपुत्रः, नहि अभिमानधनः सुयोधनः, धराधिनाथोऽपि नहिनहि नहि ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आन्ध्रप्रदेशः

" अवरः "

आन्ध्रप्रदेश शासनसभायां आहत्य २८७ संख्याकानां सभ्यानां मध्ये २१९ संख्यायाः कांग्रेसपक्षीया एव । अस्या मवस्थायां तदेकैकनायकः श्री पि.वि. नरसिंहारावः इयत्त्वरितं (कार्यनिर्वृत्ति) (Resignation) त्यागपत्रं समर्पयेदिति न कोऽपि राजकीयकोविदः ज्योतिश्शास्त्रज्ञो वा प्रागेव विज्ञातुं पारयति । एतादृशी असाधारणी आश्चर्यकरी परिस्थिति स्समुपस्थिता । एतत्कारणभूताः संघटनाः अपि ऊहातीता एव सन्ति ।

अर्धशताब्दात्प्राक् स्वीयपौराणां रक्षणार्थं हैदराबादसंस्थानाधीशेन निजांनबाबमहाशयेन प्रवर्तितं मुल्कीशासनं संविधानानुगुण मेवेति सुप्रीम्कोर्टेन निर्णय - प्रकटनात् आन्ध्रप्रदेशे राजकीयः कल्लोलः प्रवृत्तः ।

राष्ट्रप्रभुत्वोद्योग - नियोगशासन - गतांशान् तिरस्कुर्वता १९६९ तमे वर्षे प्रकटितेन स्वीयनिर्णयेन गतवर्षत्रयकाले अस्मिन् व्यवहारे अनुवर्तमाने शासनसंबन्धिनि समरे मुल्कीनियमशासनोज्जीवन -पुनर्निर्णयः सर्वोच्चन्यायालयेन करणीय आसीत् ।

१९५६ वर्षे आन्ध्रतेलंगाणानायकानां मध्ये संभावितमहाजनांगीकारेण तेलंगाणाप्रान्तीयानां कतिपयोद्योगनियोगविधाने विशिष्टं प्राधान्यं कल्पयितु मिच्छया केन्द्रशासनं प्रवृत्तम् ।

मुख्यमन्त्री श्री पि. वि. नरसिंहारावः सन्दर्भवशात् इष्टगोष्ठ्यां (न तु शिष्टगोष्ठ्यां) वदन् "मुल्कीसमस्यायाः सर्वोच्चन्यायालयः अन्तिमनिर्णय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मकार्षीत्" इत्युद्घाटयामास । मुख्यमन्त्री तेलंगाणाप्रान्तीय इति हेतोः तदुक्तं दुरुक्त मिति मन्वानानां आन्ध्रोद्योगिवर्गाणां मध्ये असंतृप्तिः प्रज्वलिता ।

एतद्विषये यथाकथंचित् परस्पराङ्गीकारं साधयितुं कृताः प्रयत्नाः विफला अभवन् । ततश्च प्रधानमन्त्रिण्याः निर्णयः प्रार्थितः ।

गत नवम्बर २७ तमे दिने प्रधानमन्त्रिणी पञ्चसूत्र - पथकनाम्ना मुल्कीविवादपरिष्काराय कंचन निर्णयं प्रकटीचकार । परन्तु आन्ध्रप्रान्तस्यापि प्रान्तीयसंघः आवश्यक इति, आन्ध्रप्रान्ते अभिवृद्धिहीनस्थानानां अभिवृद्ध्यर्थं अधिकधनवितरणमपेक्षितमिति च आन्ध्रप्रान्तमन्त्रिणः अवकाश-नियम (Conditions) मुपक्षिप्य प्रधानिपथकमङ्गीचक्रुः ।

१९७२ दिसम्बर ६ तमे दिने तदानीन्तनोपमुख्यमन्त्रिणः बि. वि. सुब्बारेड्डिनः नेतृत्वेन नव आन्ध्रमन्त्रिणः स्वीया मसम्मतिं प्रकाशयन्तस्सन्तः मन्त्रिपदवीपरित्यागमकुर्वन् ।

मुल्कीनियमनिवर्तन - मभिलषन् आन्ध्र NGO संघः कार्यबन्ध मारेभे दिसंबर १७ तमे दिने । तदनन्तरचर्याः राष्ट्रविभजनोद्यमप्रवृत्ताः । ततः पश्चात् पृथगान्ध्रराज्यमभीप्सितं इति दिसंबर १७ दिने विजयवाडायां, दिसंबर ३१ तमे दिने तिरुपतिनगरे च आन्ध्रकांग्रेस् शासनसभ्यानां महासभास्सम्पन्नाः । पृथग्राज्यसाधनाय करप्रदानं तिरस्कृत्य प्रजाः प्रभुत्वसहकारं निराकुर्यु रिति निर्णीतम् । पूर्वोक्तोभयविधसभासु आन्ध्रप्रान्तीयानां १४१ संख्याकानां कांग्रेसशासनसभ्यानां मध्ये ऊनानूनं ८० संख्याकानां सभ्यानां उपस्थितेः कारणात् पृथग्राज्योद्यमाय किञ्चिदिव बल मुपगतम् ।

विजयवाडसभानन्तरं आन्ध्रप्रान्तीयाः ९ सख्याकाः मन्त्रिणः मन्त्रिपदवीपरित्याग मकुर्वन् । नवंबर २१ तः आन्ध्रप्रान्ते बहुषु सन्दर्भेषु रक्षकभटानां अग्नेया-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्राणां प्रयोगेण ३५ संख्याकाः मृताः। उद्यमकाराः रैल्वेसम्पत्ति बहुशः ध्वंसयामासुः। अनेन कारणेन आन्ध्रप्रान्ते रेल-शकटानां गतागतं स्तब्धमासीत्।

परिणामतः १९७३ जनवरि १० नमे दिने राष्ट्रस्य कांग्रेस-हठात्-संघं निवर्त्य कांग्रेसाध्यक्षः २० संख्याकैः सभ्यैः समन्वितं उन्नताधिकारसंघं न्ययुंक्त।

जनवरी ११ तमे दिने मुख्य-मन्त्रिणः सूचनानुसारेण राज्य-पालः नूतनं अष्टमन्त्रि-वर्गं नियोजयति स्म। अस्मिन् विषये प्रथमतः त्रयाणां नियोग कर्तव्य इति अधिष्ठानवर्गसूचनामति-क्रम्य मुख्यमन्त्री व्यवजहारेति प्रथते।

जनवरि १२ तमे दिने कांग्रे-साध्यक्षेण नियुक्तः उन्नताधि-कारसंघः हैदराबादे समाविश्य "राष्ट्रपतिपालनं प्रवेशनीय-मिति, तद्द्वारा राज्ये प्रशान्तिः स्थापिता स्या"दिति पुरुषकार-पुरस्सरं व्यजिज्ञपत्।

तदुपरि केन्द्र-कांग्रेस्-कार्य-वर्गः, केन्द्रमन्त्रिवर्गराजकीय-व्यवहारसंघश्च संभूय समाविश्य पूर्वोक्तं उन्नताधिकारसंघविज्ञा-पनं अनुमेते। कांग्रेसाध्यक्षः १६ तमे दिने मुख्यमन्त्रिणं दिल्ली-नगरं आहूय त्याग-पत्र-समर्पणं समुचितमिति असूचयत्।

१७ तमे दिने मुख्यमन्त्री स्वकीयप्रभुत्वस्य त्याग-पत्रं राज्यपालाय समर्पयामास। उक्तत्याग-पत्र कलिततया १८ प्रभृति राज्ये राष्ट्रपतिपालनं विहितम्।

एवं कांग्रेसपक्षाधिक्यवत्यपि राज्ये राष्ट्रपतिपालनं विहितम्। अनेन इदं सूच्यते यत् मुल्की-समस्यायाः प्रारम्भादेव आन्ध्र-प्रदेशमन्त्रिमण्डले ऐकमत्यं विच्छिन्न मिति, तच्च क्रमशः राज्यविच्छेदायापि अकल्पय-दिति। एतावता आन्ध्रप्रदेश-राज्यपरिस्थितिः कथं वा भवि-ष्यतीति प्रश्नं १९७२ संवत्सरः १९७३ संवत्सरस्य पुरस्तात् उपाक्षिपत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री जगद्गुरुबोधानन्दभारतीस्वामिनः जयन्तीमहोत्सवः

रचयिता डॉ. राणी रामानन्दशास्त्री.

नृसिंहयज्वा कालज्ञः सर्वशास्त्रनिधिर्गुरुः ।
पौण्ड्रीकातिरात्रादिक्रतुभिः परिपावितः ॥

राज्ञीवंशकुलांबोधौ जनिमाप सुधीरसौ ।
तुरीयं त्वाश्रमं प्राप्य जगद्गुरुपदं दधौ ॥

स्वपक्षस्थापने तद्वत्परपक्षपराहतौ ।
शास्त्रान्तरादृतार्थस्य प्रसक्तस्य विचारणे ॥

राजमण्ड्रीति विख्याते भारते दक्षिणापथे ।
अखण्डगौतमीतीरे नगरे त्वाध्रदेशजे ॥

कालशास्त्रप्रसङ्गेऽत्र विद्वदग्रेसरान् बहून् ।
स्वपाण्डित्यप्रकर्षेण स्ववशानकरोदसौ ॥

पुण्यक्षेत्रनदीशैलद्वीपारण्यादिमण्डितम् ।
समग्रं भारतं भूमिं चचार मतिमानसौ ॥

सर्वशास्त्रार्थसिद्धांतनिष्कर्षणचणं सदा ।
अपरं शंकरं सर्वे मेनिरे पण्डितोत्तमाः ॥

आत्मतत्वानुसंधानप्रवणैकमनाश्च यः ।
"दैवज्ञसार्वभौमेति" बिरुदं प्राप्तवानसौ ॥

शृङ्गेरीश्रीविरूपाक्षपीठाध्यक्षो महामतिः ।
जगदाचार्यवर्योऽभूच्छ्रीबोधानन्दभारती ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

स्वस्ति श्री चान्द्रमान परीधाविवत्सर मार्गशिरशुक्ल प्रतिपदि बुधवासरे (६-१२-१९७२) श्रीमत्परमहंसपरिव्राजकाचार्यवर्य सर्वतन्त्रस्वतन्त्र-सांख्याचार्य- दैवज्ञसार्वभौम - मान्ताचार्य श्रीमदभिनवविद्याशंकर श्रीश्रीश्री बोधानन्दभारती महास्वामिनः ११२ तम जयंत्युत्सवः श्री महास्वामिनः जन्मस्थले पूर्वगोदावरीमण्डलांतर्गत "एनुगुलमहल्" ग्रामे श्री महास्वामिनः शिष्यप्रशिष्येण श्रीश्रीश्री परिपूर्णप्रकाशानन्दभारतीमहस्वामिना समायोजितः ।

तस्मिन् दिने प्रभाते श्री महास्वामिनः शिष्यबृन्देन, किंच ब्र. श्री पिशुपाटि सत्यनारायणशर्मा, श्री पिच्चय्यशास्त्री, तद्ग्रामवास्तव्यः ब्र. श्री वडलि रामावधानी इत्यादिभिः एकादशरुद्राभिषेकः, आराधनं, वेदपठनं, सहस्रनामार्चनं च अकारिषता । ग्रामप्रमुखाः प्रमदाः पण्डिताश्च बहवस्तत्र सममिलन् ।

तत्छुभसमये मोडेकुर्रुग्राम संस्कृतपाठशाला प्रधानाचार्यः "तर्कविद्याप्रवीणः" ब्र. श्री राणी नृसिंहशास्त्री तद्ग्रामवास्तव्यः स्वाध्यायपरः ब्र. श्री वडलि रामावधानी च प्रत्येकं ११६/- रूप्यकैः सत्कृतौ । किंच; इतरे च योग्यतामनुसृत्य सम्मानिताः । अन्ते श्री महास्वामिनः तीर्थप्रसादस्वीकारपूर्वकं ग्रामवासिभिः भक्तबृन्दसहकारेण श्रीयुतः कर्रा वेङ्कटरामशास्त्रिणः (चिट्टिबाबु) कार्यनिर्वाहकतया भोजनतांबूलादिभिः समाराधन माचरितम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थपरिचयः

आन्ध्रकाव्यकथाः

मूल्यम् ५–००

प्राप्तिस्थानम्– S. Suryanarayana Sastry,
44, ZEERA, Secundarabad.

अयं ग्रन्थः कथाद्वादशकयुतः सरलसंस्कृतभाषायां निबद्धः संस्कृतरचनाकुशलेन श्रीमता सन्निधानं सूर्यनारायण शास्त्रिणा। अत्र बह्वीनां कथानां विषयः प्रसिद्धांध्र काव्येभ्यः संगृहीतः, कतिचन चरित्रप्रसिद्धा, एकद्वानां जनश्रुतिर्मूलं। अत्र भाषा प्रसन्ना गंभीरा कथागतिश्च स्तिमितरमणीया सहृदयहृदयहारिणी विराजते।

द्वादशसूरिचरितम्

मूल्यम् १२–००

प्राप्तिस्थानम्– श्री गोदाग्रन्थमाला,
मुसुनूरु पोस्ट्,
नूजिवीड् ता. कृष्णा जिल्ला.

इदं च श्री गोदाग्रन्थमाला निर्वाहकेण उपनिषदुद्यानकोकिलेन विद्याविशारदेन साहित्यरत्नेन भाषाप्रवीणेन श्रीमता के. टि. यल्. नरसिंहाचार्येण आन्ध्रभाषायां रचितम्। विशिष्टाद्वैत संप्रदाये आळ्वारभिख्यया प्रख्यातानां द्वादशसंख्यानां सूरीणां चरित्रमत्र निबद्धं वर्तते। रचयिता द्राविडसंस्कृतांध्रभाषासु एतत्संबन्धिनिबन्धान् बहून् परिपठ्य ललितरीत्या एतन्निबन्धमारचयत्। पदे पदे संदर्भानुगुणं द्राविडगाधानां अनुवादाः विषयोपष्टंभक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतांध्रपद्यानि च निवेशितानि भक्तिरसानुभवे सुपक्वद्राक्षा-फलानीव स्वदन्ते । भक्तानां अवश्यपठनीयोयं ग्रन्थः ।

बिडालमोक्षम्

मूल्यम् १–२५

प्राप्तिस्थानम्– गोदाग्रन्थमाला,
मुसुनूरु पोस्ट्, कृष्णा जिल्ला.

इदं च काव्यमन्यापदेशेनाधिक्षिपति अशक्तदुर्जनं, स्तौति च उदात्तगुणभूषितं कंचन पूरुषम् ।

इदं च साहित्यकलानिधिना श्रीमता न. च. कृष्णमाचार्य-कविवरेण्येन विरचितमान्ध्रपद्यैः । एतत्पद्यानि च बहुहृद्यानि पदे पदे रसं विकिरन्ति । रसिकैरवश्यं पठनीयमिदं खंडकाव्यम् ।

चाचानेहरूपितृव्यः

लेखकः– श्री लक्ष्मीकांत पंडरीनाथ जंभोरकर., तिरुपति.

"आराम हराम है" एषा उक्ति पण्डितजवाहरलालनेहरोः । या इयं उक्तिः सर्वैः बालैः तथा च सर्वैरपि जनैः हृदये सम्यकतया स्थाप्यते तथा च तदनुसार व्यवह्रियते चेत् तर्हि संपूर्णस्य समाजस्य, तथा च सपुर्णस्य राष्ट्रस्यापि महान् उत्कर्षः स्यात् । अस्माकं राष्ट्रं सर्वेषु राष्ट्रेषु अग्रेसरत्वं गच्छेत् ।

अस्माकं चाचानेचरूपितृव्यः रसिकानां महामान्यः आसीत् । अत एव तैः गुलाबपुष्पं स्वहृदये धार्यते । पंडितजवाहरलालमहाभागाः सर्वदा हसन्तः एव व्यवहारं कुर्वन्त आसन् यथा अस्मद्-गुरुचरणाः रामचन्द्र अरलिकट्टीमहाभागाः विकसितमुखा सदा वर्तन्ते । तेषां सर्वेऽपि व्यवहाराः अकृत्रिमैः स्नेहैः अनुप्राणिताः आसन् । ते अत्यन्तं स्नेहमयाः आसन् । तथा च बालकप्रिया अपि आसन् । अत एव तेषां जन्मदिनमेव बालदिनसमारोहार्थं निश्चितः अस्ति । अतः तेषां जन्मदिने यदि तेषां स्नेहांशस्यापि पालनं कुर्मः तर्हि वयं सर्वेऽपि कृतार्थतां गच्छेम । जयतु नेहरूपितृव्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरिं भज सुखंकरम्

लेखकः श्री ना. व. निगमान्तः, प्रोद्दुटूरु.

विप्रः कश्चन धर्मतत्परगुणी चारित्रशोभी सुधी-
र्वैकुण्ठं मनसा स्मरन्प्रतिदिनं तन्नामसङ्कीर्तनं ।
कुर्वन् लौकिकसङ्गवर्जनपरो वेदोक्तकर्माचरन्
कालं यापयति स्म कामविमुखो वैराग्यवारांनिधिः ॥

सोऽयं क्रोशयुगे स्थितं पुरवरं प्राप्तुं द्विजो जातुचि-
त्कृत्वा केशवपूजनं हृदि सदा ध्यायन् तमेवाच्युतं ।
मार्गेणाथ कुवृक्षकण्टकशिलाकीर्णेन गच्छञ्छनै-
र्मध्येमार्गमपश्यदन्तकमिवायान्तं महाद्वीपिनम् ॥

क्रूरव्याघ्रसमावलोकनभयाज्जातैर्वपुःकम्पनैः
कर्तव्यं स्वमतःपरं किमिति सोऽजानन् परं दैवतं ।
आर्तानामभयङ्करं बुधवरैः संस्तूयमानं हरिं
स्मारं स्मारमजं प्रपत्य तरुवद्भूमौ ववन्दे प्रभुम् ॥

क्षुत्पीडासमवाप्तमन्युविवशो विप्रं जिघांसुः पतन्
लक्षीकृत्य स दण्डकल्पपतनात्तस्मात् च्युतो लक्ष्यतः ।
तत्पार्श्वप्रवहन्नदीजलचरग्राहानने दारुणे
शार्दूलो न्यपतत्तदा विधिवशाद्भक्तश्च संरक्षितः ॥

सर्वं दैववशंवदं खलु जगत्सर्वं तदाज्ञानुगं
तद्भक्तश्च विपत्तितः करुणया संरक्ष्यते हि ध्रुवं ।
इत्येवं कथयाऽनया हरिकृपानिर्हेतुका ज्ञायते
सेव्योऽसौ हरिरेव भक्तिसुलभो लोकैरतः सादरम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गजाननसुप्रभातम्

लेखकः साहित्यशिरोमणि श्री सूरं श्रीनिवासः.

एकदन्त ! महाकाय ! प्रातः कालः प्रवर्तते ।
उत्तिष्ठ गणनाथ ! त्वं कर्तव्यं विघ्ननाशनम् ।
उत्तिष्ठोत्तिष्ठ विघ्नेश । उत्तिष्ठ गिरिजासुत ।
उत्तिष्ठाश्रितमन्दार । त्रैलोक्यं मंगलं कुरु ॥

श्रीपार्वतीप्रियविभावितपुण्यपुत्र
लोकस्थसर्वजनसन्नुतपुण्यगाथ ।
एकैकलोकजनशोकविनाशहेतो !
श्रीमद्गणाधिप शुभं तव सुप्रभातम् ॥

लोकाधिशासकविलक्षणरूपरूप
लोकाग्रगण्यविबुधाग्रसदाग्ररूप ।
त्रैलोक्यदर्शनविसारितकीर्तिचक्षुः
श्रीमद्गणाधिप शुभं तव सुप्रभातम् ॥

विद्यादिकालपरिपूज्य महानुभाव
वैवाहिकादिशुभसंभृतमुख्यपीठ ।
संपूर्णशास्त्रपरिकीर्तितभद्रनामन्
श्रीमद्गणाधिप शुभं तव सुप्रभातम् ॥

ब्रह्मादिदेवगणसेवितपादपद्म
देवप्रकीर्तितगुणैरनुगम्यमान ।
विद्याविधायकसुनिर्मलभव्यमूर्ते
श्रीमद्गणाधिप शुभं तव सुप्रभातम् ॥

अत्यन्तमोदकवश्रीकृत नृत्यकाले
लीलाविलासपरिपूरितमण्डलास्य ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यावतंस निरवद्यगुणाभिराम
श्रीमद्गणाधिप शुभं तव सुप्रभातम् ।।
लम्बोदरेण विबुधेष्वतिमन्दगस्य
विघ्नेषु सर्वसमयेषु निवेशिनश्च ।
त्रैलोक्यसर्वजनविघ्नविनाशकस्य
श्रीमद्गणाधिप शुभं तव सुप्रभातम् ।।
शास्त्रार्थसारमधुपानविमत्तभृङ्ग
भक्तौघचित्रसरसीजविभाकराथ ।
स्वेच्छाविहारविरलीकृतविघ्नसङ्घ
श्रीमद्गणाधिप शुभं तव सुप्रभातम् ।।
ईशानसद्गुणजलाकरजातचन्द्र-
ज्योत्स्नातिशुभ्रदरहासविभासमान ।
पादाब्जलग्नवरनूपुरमञ्जुनाद
श्रीमद्गणाधिप शुभं तव सुप्रभातम् ।
व्यासप्रयुक्तशुभभारतलेखनेन
त्रैलोक्यसेवितशुभंकरहस्तयुग्म ।
हेरम्ब ! पावनजनाननभास्कराथ
श्रीमद्गणाधिप शुभं तव सुप्रभातम् ।।
मंगळ विघ्ननाथाय मंगळं भद्रकारिणे ।
मंगळ विघ्ननाशाय शिवपुत्राय मंगळम् ।।
मंगळं शास्त्ररूपाय षडाननहिताय च ।
पार्वतीप्रियपुत्राय विघ्नराजाय मंगळम् ।।
द्वैमातुराय प्रमथगणेषु प्रथमाय च ।
लंबोदराय सर्वार्थप्रथायाप्यसु मंगळम् ।।
मंगळं वेदवेद्याय चित्ररूपाय मंगळम् ।
जम्बूफलादिने नित्यं मंगळं मोदकादिने ।।
धर्मसंस्थापकेभ्यश्च साधुभ्यो भुवनत्रये ।
मंगळं मंगळं बिद्याप्रदाय च सुमंगळम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तरायणपरीक्षाणां व्याक्षेपः

संस्कृतभाषाप्रचारिण्यास्सभाया उत्तरायणपरीक्षाः मार्च-मासे निर्वर्तनीयाः एप्रलमासाय व्याक्षिप्ताः । आन्ध्रप्रदेशमहा-कल्लोलेन प्रेष-पट्टिकाशकटयोरपि संस्तंभनात् अगतिकतया व्याक्षेप्तव्या आसन् । एप्रेलमासेऽपि तिथीनां निर्णये अशक्ता एव अद्य यावत् वर्तामहे यतोऽस्य सर्वकार्यबन्धस्य विमोचनं अद्यापि न दृष्टिगोचरं भवति ऊहागोचरं वा । अतः उपाध्यायान् अभ्यर्थिनश्चाऽभ्यर्थये इमं अनिवार्यं विलम्बं क्षन्तुम् ।

संस्कृतभाषाप्रचारिणी सभा,
१५–२–७३

ति. कं. तिरुवेङ्कटाचार्यः,
प्रधानमन्त्री.

पुस्तकालय
077923

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-6
R. N. 1845/60. *Postal R. H. No. 4*

Licensed to Post without Prepayment. LICENCE NO. 57

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

भारतसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ४-००

प्रहेलिका

ग्रामाः सन्ति, न सन्ति तत्र मनुजाः पौरा न मे पत्तने;
शालाः सन्ति, न सन्ति तत्र वटवो नाध्यापकानां गणः ।
नद्यः सन्ति, न सन्ति तत्र पयसामोघा, न मेऽब्धौ जलं;
सर्वो मौनमुखो जनो मम गृहे; मौनाग्रही कोऽस्म्यहम् ।।

—(आलेख्यम्)

ले. श्री वैद्यः रामस्वरूपशास्त्री, सं. बालसंस्कृतम्, बम्बई-८९.

Published by Sri N. Ramanatha Iyer B. A; B. L., Advocate
& Secretary S. B. P. Sabha, Chittoor (A. P.)
Printed by Sri T K Thiruvengadacharya
at Vijaya Press, Chittoor (A. P.) C 1500

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar